दंतपरत्वादेशविषयेऽथोनायं सामुदायिकोऽपि स्थान्यादेशभावः आर्धधातुकस्येड्वलादेरित्यादौ तु सूत्रोच्चारित
तस्यावयवषष्ठ्यंततया तद्घटितवाक्यस्य तदादिलक्षणायामपि स्थान्यादेशभावस्य दुरुपपादत्वात्स्यां ग

शं

पच्यचि स्यादे

रकस्य नेनैवानुसंधेयइत्यनुमेयः सः अवयवषष्ठ्या एवतु लक्षणया स्थानसंबंधबोधकत्वमिति तु नयुक्तं सुविभक्तो न लक्षणे
ति सिद्धांतात् अथापि तत्र लक्षणा स्वीक्रियतां एवमपि गौरवमेव सः तनश्च श्नोन् समुदायस्य स्थान्यादेशभावसंपादकतया
कृतार्थेनादेशग्रहणेनागमस्थलीयस्य नाहत्र स्थान्यादेशभावस्य परिग्रहो दुर्वच एव इत्थंच नेरुरित्यादावादेशविष
ये न दोषो नकदाप्यागमविषये तत्र सत्तिरिति प्रार्थनीयेयं परिभाषा दोषपरिहाराय स्थानि स चैवं वेति सर्वमनवद्यमिति

आनुमानि नन्वेंसामुदायकस्थान्यादेशभावपरिग्रहे सकृदुच्चरितन्यायेन वारणं स्थान्यादेशभावस्य दुर्लभ बाधिनानीत्यादौ स्था
निवद्भावेन व्यवधानस्य वक्तुमशक्यत्वात् हुघ्नपधयुणोर्वार इत्यत आह अनुमानिकस्यादिश्नोत स्थान्यादेशभा
स्येति आवश्यावर्णमात्रपरत्वेन पठितवाक्यलब्धस्य वार्णस्य त्यागइतितदर्थः यद्वा शक्तिज्ञान्योपस्थितिविषय
स्य प्राथमिकस्य तस्य न त्याग इत्यागइत्यर्थः नासंगतिरिति एवंच स्थानिवत्सूत्रे स्थानितावच्छेदेन स्थानिनः आदे
शत्वावच्छेदेन आदेशस्य चोभयोर्ग्रहणमिति भावः यद्ययं स्थान्यादेशभावो नव्यधेन तद्धर्ममात्र स्थानिवादेशस्य
दुर्लभतया व्यर्थमेवेति तदेव स्पष्टयन्नत्रार्थे प्रमाणमिति भावः आदेशग्रहणमप्यत्र प्रमाणमिति युक्तं उक्तमर्थं प्रमा
णयति भाष्ये स्पष्टमिति अत्रेदंबोध्यं नेटिणेरनिटीत्यादिज्ञापकवशात् स्थानिवत्सूत्रे साक्षाद्दष्टाध्यायीबोधितः त
२ दितिश्च स्थान्यादेशभावः सामान्येतत्पष्ठतरस्येवकस्य नापुक्तो भवतएव तत्र त्वोष्टनाभिनभं च धातुरूपं चेत्यादावनु
९ एवंच स्थानिवत्सूत्रे द्वयोरपि स्थानिनोआदेश... योश्च सामान्यधर्मपुरस्कारेण ग्रहणमिति भावः

४ रूनसिद्धांतितागमस्थानीयसमुदायक

मितस्यापितस्य स्थानिवत्त्वविषयतासिद्धिः अपिबदित्यादावजागमसहितस्यापिबाधादेशवारणं तु स्थाव स्थावस्था
यां भित्ति भाष्यवार्त्तिकसिद्धांतबलादागमविशिष्टस्य निर्दिश्यमानत्वमिस्य भ्युगमादुपपद्यत उत्सर्गावापाद स्थानी
पदबुद्धिविपरिणामसमयुक्तस्य स्थान्यादेशभावस्य न स्थानिवत्त्वविषयता शावपवादानां स्यनादीनां च्छिकरणादिति
स्थानिवत्सूत्रे स्पष्टं भाष्यकारेण तस्मादिह भाष्यवार्त्तिकं स्थान्यादेशभावलब्धार्थानुवादरूपे वैयाकरणत्वबधित्वयोरिति दे
शार्थापरिभाषेति सर्वेष्टसिद्धिरित्याहुः॥ ॥निर्दिश्यमानस्यादेशा भवंति॥ ॥अपवादसंगतिं प्रदर्शय
न्नवतारयति नन्वेवमिति। पूर्वसवर्णापत्तिरिति आगमसमवधाने विशिष्टे यदागन्यायवचनादागमित्वावच्छेद
कीभूतानां तत्समानाधिकरणानां बाधमर्णानमवशेषेणातिदेश इति स्थाशब्दबुद्धिविषयतायाभिः शिष्ट एव विश्रान्तेरेषा
पयतीत्यादावित्रसवर्त्तमानः पूर्वसवर्णभ्रांतरतम्यादिह ददानः स्यादितिभावः सिद्धांते तु निमित्तं निर्दिश्यमानस्यैव वि
शेषणमिस्यदोषः नन्वस्यां परिभाषायां किं प्रमाणमत आह षष्ठीस्थानेयोग इति आवर्त्तनतइति यद्यपि इको यण् चीत्यादा
वजु पश्चिष्ट स्येको यणि सूत्रे वुवाणिनेषु सर्वत्र परत्र वा यण्विधानायोगादावश्यकत्वादंतरंगत्वाच्चाभीष्ट स्थानसंबध
एवानिर्धारितसंबंधविशेषायाः षष्ठ्याः संबध्यत इति विनैवावृत्तिं सत्रारंभादेवैतत्परिभाषासिद्धिः तथापि मंदबुद्धिवे

शिधायावृत्तिराश्रिता षष्ठ्यंतमिति आदेशविधिदशायामुद्देश्यसमर्पकमिति तदर्थः तेनजराशब्दादेः प्रयोगेनाभि
नभं चेत्यादौ शास्त्रे च नाभिशब्दादेः षष्ठ्यंतत्वाभावेपि न क्षतिरिति बोध्यं निर्दिश्यमानमिति एतच्चाध्याहारलभ्यं उ
च्चार्यमाणमुच्चार्यमाणसजातीयमेवेति। सोत्र प्रायोगिकयोस्साद्दृश्यमूलकत्वादाभ्याध्यवसायस्सजातीयलक्षणावे
त्याशयेनदेधा तदर्थविवरणं तच्चैवमपि तदोसस्साभिसत्र तवादेशारपि निर्दिश्यमानत्वात्प्रभृतिसइत्यादौ पूर्वपदार्थादि कस्यापि
नस्यापि सत्वापत्तिरत आह निर्दिश्यमानावयवरूपमेवेति अध्याहृतस्य निर्दिश्यमानपदस्यावृत्तिवशादर्थद्वय
लाभः द्वितीये चावयवपर्यंतमपि लक्षणेति विशेषः यद्वा शास्त्रे उद्देश्यसमर्पकत्वेन यन्निर्दिश्यते तत्सजातीय
स्य प्रायोगिकस्य साक्षादवयवद्वारा स्थानप्रमुत्वेति वर्णवारणसंबंधेन योगस्येव षष्ठ्यापि नाप्यावृत्तिं वाच्यार्थः सूलं तु
पात्तितार्थाभिप्रायेणेति बोध्यं एवं च प्रदेशेषु उपदिष्टमानं निर्दिश्यमानपदं क्वचित्स्थानषष्ठी क्वचिदवय
वषष्ठीपदेकवाक्यतया चैषा विध्युपस्थापकारिकेति भावः अनिर्दिश्यमानत्वं त्वादेशादेशस्यावृत्तिरस्याः फलं ननु
प्रतीयमानमिति अथादेशविधावुद्देश्यसमर्पकत्वेन यदुच्चार्यते तत्समानानुपूर्वीकस्यैव निर्दिश्यमानत्वेवि
प्रत्तोस्या- दित उदयात्मकस्यैव विसर्जनीयपदबोध्यस्यानिर्दिश्यमानत्वोपपादनपरवक्ष्यमाणहयवरट्सूत्रस्थभाष्यवि

रोधः तदोःसस्त्वाविन्यत्रानुवर्तमानत्यदादिपदबोध्यानां त्यदादीनां निर्दिश्यमानत्वानुपपत्तेश्च न चोद्देश्यसमर्पकपदजन्योप
स्थितिविषयत्वमेव निर्दिश्यमानत्वमिति वाच्यं ग्रहणकशास्त्रगृहीतानां निर्दिश्यमानत्वाभावापत्तेः न चेत्यादिमङ्गलग्रंथा
संगतेः जरायाः जरसित्यादावधिकारप्रासंगरूपविशेष्यसंबंधमन्तरेणैव विधीरिति बोधितजरादिशब्दजन्योपस्थि
तिविषयस्य तदंतस्यापि निर्दिश्यमानत्वापत्तेश्च न च प्रकृतसूत्रीयसंबंधेन ग्रहणाधीनताहशपदजन्योपस्थितिवि
षयत्वं तत्त्वमिति वाच्यं स्वं रूपमित्येतत्संबंधेन ग्रहणाधीनजरादिपदजन्योपस्थितिविषयाणां वृक्षत्वानामपि निर्दिश्यमानत्वा
त्वादि
नुपपत्तेः धात्वादीनामनिर्दिष्टत्वादिवक्ष्यमाणमङ्गलग्रंथासंगतेश्च न च स्वरूपतदतिरिक्तेतदन्यतरमात्रोपस्थापकसंबंधेना
तिरिक्तप्रकृतशास्त्रसंबंधेन ग्रहणसहकृतताहशपदजन्यप्रतीतिविषयत्वं तत्त्वमिति वाच्यं परिभाषाणां संबंधेनान्तर्भावे लिं
गविशिष्टपरिभाषाबोधितस्यानिर्दिश्यमानत्वानुपपत्तेः इष्टत्वेहि तद्बोधितस्यापि निर्दिश्यमानत्वं तथा च २ उत्याप स
त्रेभाष्ये तयापरिभाषया महतीप्रिय इत्यत्रात्महत इत्यस्य प्रवृत्तिमात्रं व्यानिर्दिश्येन समाहितं तथा सुवतीः पत्र्यसेत्यत्र
विभक्तौ लिंगविशिष्टग्रहणेन संप्रसारणाभाव उक्तः अत एव देवीमंचतीत्यर्थे देवद्र्यङ् सिध्यति तदंतत्वाभावेऽपि यदा
गमपरिभाषाबोधितस्यापि निर्दिश्यमानत्वापत्तेश्च तस्मादनिर्वचनीयमेवेदं निर्दिश्यमानत्वमिति चेदत्रोपाध्यायानु

दंत

यायिनः आदेशविधौ श्रुतत्वमुद्देश्यसमर्पकत्वं यत्तदंतत्वसदीयोच्चारणव्यापकत्वोपस्थितिविषयत्वं निर्दिश्यमानत्वं अस्ति
जरया जरसित्यादौ श्रुतं यज्जरादिपदं तत्तदीयोच्चारणव्यापकत्वोपस्थितिविषयत्वं जराशब्दादौ अधिकारमात्रं
गपदीयोच्चारणव्यापकत्वोपस्थितिविषयस्यापि तस्य तत्कृणवशेनानुमितपदाधीनत्वोच्चारणादेव जराशब्दस्य नवि
ये धिरित्येतच्छास्त्रसदनोपस्थितस्यापि विशेषविशेष्यभाववैपरीत्यव्यभिचारिणोपस्थितिकत्वया तदुच्चारणव्याप
कत्वोपस्थितिविषयत्वाभावाच्च न तदंतस्य निर्दिश्यमानत्वं तदेः सस्मादवित्यादावनुवर्तमानस्य त्यदादीनामद् इत्यस्या
र्वा दौ हिन इंसवत्वस्यानुवर्तमानस्य त्रानुरिवश्रुतत्वं सुवचं तन्मध्यपतितल्लिंगविशिष्टपरिभाषाभ्यां तु स्थानिवद्भावेनैव
निर्दिश्यमानत्वस्यारोपणेन न दोषः यदागमन्यायेन तु न तदारोपः स्थानवत्स्थानरूपा मिडितिभाष्यकारीयसिद्धांतव्याकु
पात्परिभाषारंभाच्च न चैवं निष्ठापदोच्चारणव्यापकत्वोपस्थितिविषययोः क्तक्तवत्वोरपि निर्दिश्यमानत्वादेकदेशविकारपर
निष्ठा निष्ठांतावयवीभूतनिर्दिश्यमानावयववत्तकारवकारस्य तकारस्य ... इत्यर्थेनैव दृष्टं जीर्ण इत्यादौ धातुतकारस्य नत्वव्यावृत्तौ प्र
त्ययग्रहणे चापंचम्यायत्तपरिभाषोदाहरणत्व प्रतिपादनपरभाष्याद्यसंगतिरिति वाच्यं उपात्तयोः तरत्वेनादोषात्
अत एवानंत्यविकारपरिभाषैषयानिरूपितत्वस्य तदुदाहरणत्वं स्वरसतः उपपद्यते एवं च ननु प्रतीयमानमित्य

स्य र

स्य

त्वं न यथा कथंचित्प्रतीयमानमित्यर्थ इत्याहुः अथ विधेयस्य स्थानभावेऽव्यभिचरितोपस्थितिकत्वाद्दीर्घादीनाम्
एकारोच्चारणव्यापकोपस्थितिविषयताभावान्न निर्दिश्यमानत्वमिति साम्प्रदायिकेन चाकृते न चेति जातिपक्षे दोषाभावेऽपि
तिनत्पक्षे स्वकारोच्चारणव्यापकोपस्थितिविषयतायां अतज्जातीयबाधितत्वेन निर्दिश्यमानत्वं न स्यात् च साक्षादादेश
निवर्त्यतायां बाधितत्वात् तदाश्रयव्यक्तिषु पर्यवस्यति दीर्घादिष्वपि प्रवर्तत एव विशेषाभावादतोऽसम्भवमिष्टमिति भा
वः ननु व्यक्तिपक्षमाश्रित्य प्रवर्तनीयाः शंकायाः पक्षान्तरेण परिहारो न युक्त इत्यत आह एवं चेति निर्दिश्यमानकार्यबो
धनादिति एरनेकाचः ओः सुपि इत्यत्र ह्रस्वस्येव निर्दिश्यमानतया दीर्घाणां यणादेशप्रसङ्गवारणाय आरभ्यमाणो निषेधोऽस्यार्थ
स्य सामान्येन ज्ञापक इत्यर्थः न च भाव्यमानोऽप्युकारः सवर्णान्न गृह्णातीति परिभाषावशात् विधेयविषये दीर्घोपस्थि
तेरस्तु वचनेनोद्देश्यसमर्पकोच्चारणव्यापकोपस्थितिविषयतारूपस्य निर्दिश्यमानत्वस्य दीर्घोकारेऽप्यबाधान्नभश
इति निषेधवैयर्थ्यमिति वाच्यं तादृशपरिभाषाज्ञापकभूतस्य दिव उदित्यत्र तपरकरणस्य स्वांशे च दीर्घोपस्थितेः
प्रतिबंधकतया तदुपस्थितेर्व्यापकताविरोधेन निर्दिश्यमानत्वाभावात् यत्तु भुवौ सुधियावित्यादौ विशेषयणूचीति
प्राप्तस्य यणो वारणायोक्तनिषेधस्यावश्यकतया ज्ञापकत्वविरोध इति तदभसात् एचूर अत्रत्यादेशस्य तत्र विधेयविष

इग्यणः संप्रसारण

२स्यादेतत्   सुधीत्यस्य संबंधेभ

मे व्यभिचरितोपस्थितिकानां दीर्घउकारादीनामिकोयणचीत्यत्रानिर्दिश्यमानत्वेन न स्यापि यणोऽभर्ल्लभ यामिति
हस्यादेतत् सुधीत्यस्य संबंधेन्निमित्तकस्य स्येवनिषेधारंभार्थेभोः सुधीः स्यत्र हस्वोकारादस्य यण्भाविनो ऽप्र
सिद्धेः सूत्रवैयर्थ्यवशेन एदीनानां दीर्घाणां प्राप्तस्य यणो वारणाय यत्शब्दनिषेधेऽभावत्वपक्षः यदितु प्रियं स्वलपु
कुलं ययोस्तावितसर्थेयण्विधायनात् सार्थक्यमित्युच्यते तर्हि स्वयंभवतीति स्वयंभुब्रह्म सुष्ठुध्यायतीति
सुधिकुलं तत्प्रियं ययोस्तावित्यर्थेप्रियस्वयंभुवौ प्रियसुधियावित्यादौ प्राप्तस्य यणो वारणायापि निषेधेऽपि
तत्पक्षेभवेत् नच गतिकारकेत्यादिनिषेधादुभयोरप्यंसंबद्धेतिवाच्यं नाडञनिषेधस्य गतिकारकान्यतरघ
टितोपेतरपदकत्वाभाववत्त्वेनादोषात् नच श्रीपामेसत्रानोल्लोपइव प्रकृतोदाहरणेषु लुग्वधणापि भा दुर्ल
वैवीतिवाच्यं अनित्यत्वेन प्रकृतपरिभाषायाः प्रकृतविषये प्रवृत्त्यभावेनादोषात् अत एव स्व्यत्यादिनि
विकृतनिर्देशः सार्थकः अन्यथा सख्याख्वीयतेः क्विपि सख्युरित्यादौ अनयापरिभाषया यणः प्रवृत्तो
तद्वैयर्थ्यं स्पष्टमेव तथा च पूर्वोक्तप्रकारापन्ने हरदत्तोदाहृते प्रियग्रामिण्यावित्यादौ यण्निर्बाधः

३संनिपातपरिभाषाविरोधोदि   ४अत एव सुत्तग्रामण्योर्यणसिद्धिः   प्रकृत

वेत्ति चेन्मैवं प्रकृतनिषेधस्य ह्रस्वस्थानिकयण्मात्रविषयकत्वे दीर्घोच्चारणवैयर्थ्यस्य तदवस्थत्वेनाभीष्टार्थसिद्धेः यत्तु भस्मादेवं निषेधादुद्देश्यसमर्पकपदजन्योपस्थितिविषयार्थसमभिव्याहृतल्लिंगबोधकप्रत्ययेनराघटितत्वं निर्दिश्यमानत्वमिति ज्ञाप्यते एवं च यादृक्शास्त्रगृहीतानांल्लिंगविशिष्ट परिभाषालब्धस्य तन्मध्यपतितन्यायागोचरस्य च ननिर्दिश्यमानताहानिः यदागमायेनविधिरस्येव उभयबोधितस्य तु ननिर्दिश्यमानत्वं उद्देश्यसमर्पकस्थाशब्दाधुपस्थितिविषयार्थसमभिव्याहृत अर्थांतरघटितत्वादितिवदंति तदसत् तदोरित्सत्सदजन्योपस्थितिविषयतकारदकारसमभिव्याहृतोर्थांतरघटितानां त्यदादीनामपर्यंतपदार्थसमभिव्याहृतार्थांतरघटितयो युष्मदस्मदोश्च निर्दिश्यमानतानापत्तेरितिदिक्। ननु वर्णग्रहणे अस्याः परिभाषायाः प्रवृत्तौ। रीङ्। ऋ। रिङ्। त्वव्यर्थमित्याशंक्याह। रीङ्रिङोर्ङित्वमिति स्पष्टार्थमिति नात्र फलांतराभिवेशः कार्यः भाष्याविचारितप्रयोजनानां सूत्राक्षराणामस्मादादिभिः फलकल्पनायुक्तत्वात् अन्यथाभवगणतः पतंजलेरज्ञानकल्पनाप्रसंगा

त्। ननु वर्णग्रहणे तत्र तत्र प्रवृत्तपरिभाषाप्रवृत्त्ययत्नाभगवता सूत्रकृतैवायमर्थ इति चेदत्राह भाष्येणाविरोधादि
ति यदि च वर्णग्रहणे इत्यत्र अक्षरसमाम्नायक एव वर्णो विवक्ष्यते तर्हि तत्रापि दोषः स्यादिति वदन्ति सर्वैर्वर्णं निर्दिश्य
मानस्वरूपं प्रदर्शयन् परिभाषाफलमाह अनयेति यद्यपि प्रकृतग्रंथस्यारस्याधस्तागमसयेन विधिरस्तेनतदन्य
तरानधीनप्रतीतिविषयत्वाविशिष्टत्वं निर्दिश्यमानत्वमिति परिष्कुर्वन्ति तदप्ययुक्तं अन्यतरानधीनप्रतीतिवि
षयतायाः प्रत्येकमुभयोरपि तदधीनप्रतीतिविषयायाः एव सत्त्वेनाव्यावर्तकत्वात् विशेषणांशस्वस्य च रू
पस्येति वाक्यशेषेण स्वरूपप्रतीतेरपि येन विधिरित्येतच्छास्त्राधीनत्वेन केवलस्यापि जरादेर्निर्दिश्यमानत्वा
नुपपत्तेश्चेति। आस्तां तस्य व्यपदेशिवद्भावलब्धार्थानुवादरूपत्वेन केवलस्यापि तदंतत्वेन ग्रहीतव्यतया येन विधि
रित्यधीनप्रतीतिविषयतायाः दुर्वचत्वात् सूत्रे तं निर्दिश्यमानत्वानुपपत्तेश्च सुपद इति यत्तु अंगभसंज्ञानिमि
त्तभूतप्रत्ययसंबंधवैयधिकरण्याच्चयेचाश्रित्य भसंज्ञकांगावयवस्य यत्नाभ सर्वनामस्थानस्वादिप्रत्ययपरक
स्य पाच्छब्दस्येत्येवं व्याख्यानेन विनेव परिभाषामभीष्टसिद्धेर्नेदमस्याः परिभाषाया उदाहरणमित्याहुः अत्रेदं
निमि वक्तव्यं अंगभसंज्ञानिमित्तप्रत्ययसंबंधः कार्यकालपक्षावलंबनेनार्थापत्तिमूलाक्षेपाद्वा नाधः भावकारीय

संज्ञासु कार्यपक्षानभ्युपगमात्। अभ्युपगमे वा कार्यकालपक्षेऽपि संज्ञासु वाक्यैकवाक्यतायाएव सिद्धांतितया
तादृशान्वयो दुर्लभः प्रवृत्तिस्तु गौरवाद् युक्त एव नापि द्वितीयः इत्यत्नित्यादावंगमंतरा प्रत्ययोपलंभात् सुप
सुरित्यादौ प्रत्ययमंतरेण भसंज्ञोपलंभाच्च ताभ्यां प्रत्ययाक्षेपासंभवात् आक्षेपे वा पदजन्यपदार्थोपस्थितेरेकशा
ब्दान्वयहेतुतया कथमाक्षिप्तस्य तथाविधान्वयसंभवः यदि स्यात्तथाप्यन्याक्षिप्तस्यान्वयो विरुद्धः पक्षद्वयेपि
पदांगाधिकारद्वयनिर्वचनव्यतिरेकेण वैयधिकरण्यान्वयश्च दुर्वचः प्यङ् इति सूत्रस्थभाष्यं तु एकदेशिन एवेति स्प
ष्टमन्यत्र यदपि द्विपात्सुपद इत्यादौ निर्दिश्यमानस्यैव पूर्वपद षष्ठ्यन्तस्य पदादेशवारणाय लक्ष्यानुरोधादाक्षेपा
दिपरिक्लेशानभ्युपगम्य कथंचिद् तुरीनेरेवाश्रयणीयतया सुपद इत्यादावपि तथैव निर्वाहेऽस्परिभाषावलं
बोधस्थैव अनंत्यविकारपरिभाषा तु न प्रकृतोपयोगिनी वार्णिणोऽयसदेशत्वासंभवादिति तदप्यकिंचित्करं पाच्छ
ब्दांतांगावयवस्य निर्दिश्यमानस्यैव स्वर्थप्रत्यासत्तिवशादंगचरमावयवत्वापन्नस्यैव लाभेनोपपत्तावेवंविध
परिक्लेशस्यानुपयुक्तत्वात् वैयधिकरण्यवादिनामपि प्रकारांतरेण प्रत्यासत्तिरावश्यकी अन्यथा सुपद इत्यादान्
तेनेत्यर्थे सुपात्रीयत इत्यत्र रामादाय भसंज्ञकांगावयवत्वाद्वलुपमादाय यनाधसर्वनामस्थान स्वादिप्रत्ययप

(margin: न्यत्रा)

(margin: परिभाषा)

(margin: परिभाषा भ्युपगमे पि)

(margin: पाच्छब्द स्यैव)

६ तस्मात्परिभाषावरूपको

९ तयेवरीत्या सर्वत्र येन विधिस्तदन्तस्य [illegible] स्यादेशवारणसं

९ भवादेतदर्थं प्रवृत्ता

रकृत्वाच्चदोषोद्धारः तस्मादियं ह प्रकृतपरिभाषयैव निर्वाहउचितस्तेन तदुदाहरणस्य परिभाषाविषयत्व
प्रदर्शनपरं पादपदिति सूत्रस्थभाष्यस्वरसत्वात् अस्थ्यादिति उदस्थ्नःस्थंभोरित्यत्र सवर्णग्रहणेन प्रश्लिष्ट
स्य वा स्थानषष्ठ्यंतत्वकल्पनायां परिकृतत्वात् प्रकृतपरिभाषोदाहरणत्वमेव युक्तमित्यपाशयः आदिशब्देनमूर्धा
भिषिक्तोदाहरणस्यापि बहदित्यस्य संग्रहः नहि तत्र वैयधिकरण्येनान्वयेनापि निर्वाहः स्थानस्थायामेवाङ्गेतिसि
द्धांतात् प्रथमतस्तदुक्तत्वाचागमविशिष्टस्यांगावयवस्य पाशब्दस्यानर्थकत्वेनार्थवद्ग्रहणपरिभाषयापि वा
देशायोगात् यत्तु तत्परिभाषालभ्यस्यार्थवत्त्वांशस्यांगविशेषणत्वाभ्युपगमेनार्थवदंगावयवस्य पाशब्दस्य तिव्या
ख्यानात्परिभाषामंतरापि निर्वाह इति वदंति तेषु दानमेव स्वंरूपमित्यस्येन तत्स्थास्तु सिद्धायास्तत्परिभाषा
शब्द या अस्मिन् संज्ञेतिनिषेधेन शब्दशास्त्रीयसंज्ञासु प्रवृत्तिविरोधात् न्यायसिद्धत्वेपि शांतसंख्यावाचकषट्शब्द
स्य षट्संज्ञाविधानबलेनैवंविधविषये तत्परिभाषाप्रवृत्तेरनिष्टत्वाच्च प्रवृत्तौ वा परिभाषायास्तदर्थविशि
ष्टस्वरूपबोधकत्वादंगांशेन तत्संबंधे तदवयवस्य पाशब्दस्येत्यर्थस्य दुर्वचत्वाच्च भणिदापयतीत्यादो पुग्विशिष्टेदा
शब्दबुद्धेरिव यदागमन्यायात्प्रकृतेप्यागमविशिष्ट एव पाशब्दबुद्धेर्विश्रांत्या विशिष्टस्याभादेशप्रसंगाच्च उक्त

सा श्रौ रुङ्क्लिष्टदं तु शब्दावयवेऽपि हृन्युपधादीर्घनियमापत्तेश्च एतेनांगावयवावयोर्थवान् तदवयवस्य पा शब्दस्ये
सेवं व्यधिकरणाच्चयपरंपरया निर्वाह इत्यपि निरस्तं व्यपदेशवद्भावेनोक्तविषये दोषश्चो व्यादित्तेनावृत्तिं चेदेत
त् अथ यथोद्देशमन्यायगोचरस्य निर्दिश्यमानत्वाभावेऽनेनासोरित्ति सूत्रे तत्प्रकरणस्याभीयसिद्धत्वमित्यत
त्रापत्त्युपपादनपरभाष्यकारीयसिद्धान्तव्याकोपः तदधिपरत्वादष्टमेऽन्तरंगत्वाद्धृद्बोऽल्लोपाभावायाभीयत्वेन
आङागमस्यासिद्धत्वं तु व्यर्थमेवत दिस्सनित्यतायां त्रावं तद्रुक्तमन्तरङ्गेति सूत्रे भाष्ये अन सोरिति सूत्रकारेण ज्ञाप
नेऽपि च तत्रासन्निमिति उक्तविषये निर्दिश्यमानत्वाभावे हि ज्ञापितायामनित्यतायां स्वांशे चारितार्थ्यविरहात्तदसं
गतिरेवेति चेत्सत्यं यद्यागमन्यायेन निर्दिश्यमानानुपूर्व्यनतिदेशेनाति तद्विषयैयस्य निर्दिश्यमानत्वाभाव
इति सिद्धान्तः प्रकृते चयोः तावद्विभागवग्र पुनरुत्तानि देशसत्त्वेनिरूक्तज्ञापकं नानिर्वहतीति नविरोधइत्याहुः
नन्वेवमपि नदोरिति सूत्रस्थ सेवत्वविरोधः तन्नहि तेरिति तु नोक्तमनेपस्यादेोनस्याप्यापत्तेरित्युक्तं यदि च यदा
गमन्यायगोचरस्य निर्दिश्यमानत्वाभावः तर्हि तुटः सत्त्वापादनं तस्य नत्त्विति हि तनिर्दिश्यमानत्वाभावादिति चे
न्न विशिष्टस्य निर्दिश्यमानत्वाभावेऽपि आर्धधातुकेति विसनच्छात्रे स्वावधिनस्यतादृशास्यदावयवस्य

२ त्वेन उपदर्शितेषु

नत्राम्याघातान् अत एव च स्वीकृत्य नेङ्स्यादौ रीङ्को रेफस्य लत्वसिद्धिः उरस्छादित्यादौ तु निर्दिश्यमानस्यादेशा
व्यवधानान्न दोषः स्वावयवस्य स्वव्यवधायकत्वाभावदर्शनप्रवादस्य तु स्वत्वेनाभिमतायरूपादाउ पूर्वाधत्वस्य स्वव
वधायकत्वाभावदर्शनं तदर्थः नेदिदमभिसंधाय पादःपादि नित्सूत्रे भाष्ये प्रकृतपरिभाषोदाहरणभूतानि सर्वस्य द्वा
यु दीर्घ्युदाहृत्य यत्र तर्हि निर्दिश्यते न तस्य तत्स्थाने भवतीत्यसंशंक्य निर्दिश्यमानस्यागमेन व्यवधानादिति तत्र तत्र स
माहितं भाविविशेषदर्शनरहस्य सूत्रशेखरादौ स्पष्टम् इटः परत्वेन नपीध्वमाऽऽदयो विशेष्यं ते अवयवावयविनोः पौर्वा
पर्यासंभवादिति तु चिंत्यमेव निर्दिश्यमानषीध्वमादीनामिड्वधिकपरत्वस्य अवधित्वात् तदन्यदन्यत्र विस्तरः
(स्यादेशा) न चैवमपि निर्दिश्यमानपदस्य वर्णनिमित्तं तरणे तु नैव वाक्येन साक्षात्परंपरया साधारणत्वस्य निर्दिश्यमान [illegible] ण्येन
धत्वप्रसंगस्तथा संबंधो न यापरिभाषयाऽबाध्यत इत्यभ्युपगमो यदि तदाऽवयवषष्ठीविषये चरितार्थायाः प्र [illegible] स
कृतपरिभाषायाः सार्वधातुकार्धधातुकयोरित्यादौ चरितार्थेनाङ्ग्रोऽस्य स्येसनेन परत्वाद्बाधे द्विस्त्राब्यदाचार
द्विवंगाल्लुर्नरिङ्क्षिपिद्विच्छब्दस्य तांतस्यानिर्दिश्यमानस्यापि सन्लिङ्योर्जेरित्यादौ सावकाशेनादेः परस्य
त्यनेन परत्वाद्बाधात् उरस्छादित्यत्र एव सवर्णोऽडितो रखे सतः अनयोर्निर्विरोधाभावादिति पदार्थसमन्व

पदाधत्वप्रसंगः तदा

यत्वात्त एव पदोपस्थापनेन पदैकवाक्यतया विध्युपकाराय प्रवर्तमानात्विप्रकृतपरिभाषावाक्यार्थबोधो नतरां वा
क्येकवाक्यतया नियमेन स्थानि विशेषनिर्णयात्मनो विध्युपकाराय प्रवर्तमानाद्यात्तोंऽत्यस्येत्याद्यरनिर्विभिन्न
वात्त प्रवर्तनिवृत्तात्तत्कथं विरोधः असति विरोधे कथं बाध्यबाधकभावकृतस्मात् त्यदादीनामः इत्यादौ त्यदाद्यंगांग
वयवीभूतानां निर्दिश्यमानानामकाराभवति सचान्त्यस्य भवतीत्येवं समावेश इति भावः नन्वेवमुपजीव्यत्वाद्ऽलो
न्त्यस्येत्यादि ईः २ रस्याः साक्षादेव संबंधोस्तु प्रकृतपरिभाषासंबंधाभिश्चालोंऽत्यस्येत्यादिभिः त्यदाद्यंगांगीभूतानां
मकारो भवतु निर्दिश्यमानान्त्यस्य भवत्वेवं सकृदेव विध्युपकारकत्वपरमनुकूलमित्यत आह नाप्यंगांगीभावइति।
२ पदार्थत्वेनेति गुणानां च परार्थत्वादसंबंधः समत्वादिति न्यायेनेति भावः सति त्वंगांगीभावेऽलोंत्यस्यादेः परस्ये
त्यनयोरनिर्दिश्यमानप्रदेशेष्वप्रवृत्त्यापत्तेरिति बोध्यं ननु सत्यपि समावेशोपादः पदित्यादावनेकाल्सूत्रेकवाक्य
तयापाच्छब्दांगांगावयवस्य निर्दिश्यमानस्य पदादेशो भवतु सर्वस्य भवतीत्यर्थे सर्वशब्दस्य बुद्धिविषयतावच्छे
दकावच्छिन्नपरतया तदंतस्याप्यादेशो दुर्वार इत्यत आह अनेकाल्शिदिति एतत्परिभाषाबोधित एवेति एतद्वि
षयकत्वेनोपस्थितनिर्दिश्यमानांशस्य नैष्फल्यमेवात्र हेतुः एतद्बाधकमिति प्रकृतपरिभाषाया अवयवष

ष्ठीविषये चारितार्थ्यादनिर्दिश्यमानांशे सावकाशत्वाभ्यां तयोः परत्वं बाधकत्वं विभिन्नकालप्रवर्तकयोरपि पौर्वा
पर्यं बाधप्रयोजकत्वेन दृष्टमादिवृद्धेरंत्योपधायाः धोऽभ्युपाभावः उदस्थादिति तत्र विषय इति उदस्थादित्युदु
दाहरणविषयत्वं यत्तत्र मुदस्थास्तंभोरिति तद्रूपे आदेः परस्येत्यनेन परिभाषाविषयेऽस्त्यर्थः ननु निर्दिश्य
स्या मानानुवृत्तिवशादर्थद्वयेपि पृथगेव व्यापार इत्यभ्युपगमे षष्ठ्याः न पृथक्त्वं तन्निर्दिश्यमानांशस्यालोन्त्यस्येत्या
धयास योग्ये चारितार्थ्याभावात् सत्यपि संभवे बाधनं भवतीति न्यायेन प्रथमद्विर्वचनस्य द्वितीयद्विर्वचनमि
वेयं परिभाषा तयोर्बाधिका स्यादित्याशयेनाशंक्य परिहरतीति नाप्यत्र योगे इति निर्विषयत्वप्रसंगादिति ननु
सार्वधातुकार्धधातुकयोरित्यादावुपस्थितस्यैकपदस्य श्रुतत्वाभावात् तद्ध्यानो मनिर्दिश्यत्वं सन्निधिरोर्जे मान
दा रित्यांवुपस्थितपरशब्दबोध्योपि नादृश एवं ततश्च कथमनयोर्विषयत्वमिति चेदत्राहुः नभसुधियोरिति ज्ञापकेन र्नि
ग्राहकशास्त्रविषयाणामविशेषेण निर्दिश्यमानत्वमिति रसद बाध्यानामस्येव गतं भत एव स्वोयणचीत्यादावपि
नक्षतिः सन्निधिरित्यत्रापि मंडूकानुवृत्त्या चजोरित्यस्य संबंधः यद्वा तावन्मात्रपूर्णत्वेन तत्रैवादेरिति श्रयात
द्वित्रत्यय स्वकुरित्यत्र तु पदांतग्रहणं संबध्यत एवान्यत्र स्थानिनिर्दिष्ट एवेतिक्कतयोर्विषयः सिद्धांते तु ध्वंने

लेपा

रूपसर्गेभ्योपरत्वं स्यदादीनामित्यादिभिराधंतयोभवृत्त्यर्थमावश्यकत्वेनेति वस्तुतो निर्विषयत्वं न समावेशसाधकत्वे हेतुः तस्यो
भयसाधारणतया पर्यायेणतायोऽपि सुवचत्वात् तस्मादिह समावेशपादः परिति सूत्रस्थं पूर्वोक्तमेव भाष्यं ज्ञापकमि
ति शमाणिवृः पंथाः तदेतध्वनयन्नाह कैय्यट इति निर्विंशतेरिति सूत्रारंभादेवाऽलोंत्यपरिभाषायानिवृत्तेस्त्विग्र
हणाच्च सर्वादेशतापादनं निर्दिश्यमानस्यैव प्रवृत्तावनुपयोग एव निर्दिश्यमानपरिभाषाया इत्यपि तत्रैव कैय्यटः
स्यादेतत् प्रकृतपरिभाषायाऽलोंत्यस्येत्यनया समावेशे यद्वक्तं अलोंत्यस्येति सूत्रे शेषे रे अल् इति विधि अंत्यस्य
पदस्य मा भूत् स्वनडुह्यामिति तद्विरुध्येत न समावेशोऽस्त्यनुडुहश्छब्दांतपदावयवस्य निर्दिश्यमानस्य द्वारादेशाभ
वनं त्यस्येत्यर्थे हकारस्यैव तत्प्रवृत्त्या दोषाभावात् न च व्यपदेशिवद्भावेनांत्यत्वं स्वतो निर्दिश्यमानत्वं चास्तीति अनुडु
हश्छब्दात्मकस्य पदस्यैव तत्प्रवृत्त्यापत्तिरिति वाच्यं तथा सति क्वेवलेप्यनडुह्यामित्यत्र दोषसंभवेन तदं नपर्यंततानुधा
वनप्रयासवैफल्यापत्तेः न च मुख्यांतसंभवे परिभाषायां गौणांत्यग्रहणस्यायुक्तत्वात् सामानाधिकरण्यानुरोधाच्च समु
दायनिरूपितांत्यत्ववतो निर्दिमानस्यानडुहश्छस्यैव तत्प्रवृत्त्यापत्तिरिति वाच्यं वाक्यैकवाक्यताया एव तत्रानिरूढत
या निर्दिश्यमानस्यादेशाभवनं त्यस्य सूत्रे प्रत्यासत्त्या निर्दिश्यमाननिरूपितांत्यत्ववतोऽग्रहीतमोचिस्येन तत्रमु

ख्यत्वसामानाधिकरण्ययोर्दुर्लभत्वात् सत्यं अध्युपग्रहणाभावे निर्दिश्यमानावयवस्योहशब्दस्य स्यादित्याशयादविरो
धः न चात्र सोऽश्वेति विहितत्वाभ्रस्यायां जेनोहशब्देन क्वणितिवाख्यारव्याख्येन्वृस्यादिना सुकुडुत्पत्तेः पूर्वमेव समासेन स्याप
दसंज्ञायाः पूर्वं च त्वात् पदस्य मा भूदित्युक्तिरसंगतेति वाच्यं पदशब्देनार्थवच्छब्दरूपस्य विवक्षितत्वेनादोषात् स्यानि
यानिर्वाहाय वस्तिनार्थवत्त्वाहि तत्रापि सुबन्तत्वात् कथमन्यथा स्वतंत्रप्रयोगित्वात् उहच्छब्दस्य वापदत्वमुत्तरपदत्वेन
तिनिषेधात् यद्यपि वेव्लानुहच्छब्दएव निरूढरित्यादोपसंभवेन तदंतपर्यंतानुधावनवैफल्यं तदवस्थमेव
तथापि समावेशस्फूर्त्यर्थमेव तथाप्रदर्शनमिति वदंति ननु तन्मध्यपतितन्यायगोचरस्य निर्दिश्यमानत्वं दुर्
लभेइति सूत्रस्थभाष्यविरोधः तत्र हि भिंधकीत्यत्रावुचिरूते निर्दिश्यमानस्येहरभावाधितं नत्याभोसंती । स्यश
क्यपरत्वाधितमित्यादिना समाहितं यदि च तस्य निर्दिश्यमानाभावस्तर्हि सदादिसूत्रस्थभाष्यविरोधः तत्र हि
वादेशाः खलु अवरूपं वक्तव्यः सावकाशार्थमित्युक्तं न तन्न्यूनमत्र न्याय्यमत आह अवृत्तिविषये नायं न्याय इति तद्बुध्ये
वेति तन्मध्यपतितन्यायेन निर्दिश्यमानत्वापत्तिर्देशाः तत्र च त्यदादिसूत्रस्थमुपदर्शितमेव भाष्यं प्रमाणं दुर्
लभ्य इति सूत्रस्थं तु भाष्यमेकदेशिन एवांगेरंगत्वाभ्यासस्यादचः परत्वाभावेन बाधायोगादिति स्पष्टमेवतद्

दामेवेत्याशयः अत एव नेदमदसोरकोरिति ककारवत्पर्युदासस्य नाडच्छन्यायत्वापवृत्तोपपादनपरं येनविधिरिति
सूत्रस्थं भाष्यमप्युपपद्यते अन्यथा साकच्कयोरिदमदसोर्निर्दिश्यमानत्वाभावेन तदाधेयत्वासंभवात्स्वांशे चारिता
र्थ्यायोगेन न तत्संगतिः स्पष्टं चैव निर्दिश्यमानावयवरूपमेव हे तं वशस्य फलं प्रदर्शयितुमिदं येनेति अतिस्पष्टमिति भ
नं त्पविकारपरिभाषयातु नात्र निर्वाहः अंत्यवर्णतद्धर्मयोरितरात्र्यवधान एव प्रवृत्तेरिति द्रष्टव्यं अवयवषष्ठीवि
षये प्रवृत्तो बीजमाह यादः पदिसादि भाष्ये स्पष्टेति अनित्यस्य सुपदस्याभुभयविरोधादाहरणप्रदर्शनादर्थद्वयप
रत्वेनेयं परिभाषाभाष्ये स्पष्टेत्यर्थः। निर्दिश्यमानावयवस्यानेन युज्यतइत्येतावतैव निर्दिश्यमानस्यापि पदेश
वत्त्वेनेन निर्दिश्यमानावयवरूपत्वान्निर्वाहे निर्दिश्यमानस्थानेन युज्यते इत्यंशो निष्फल एव निर्दिश्यमानावयवरूपमे
वेत्येवकारं पठन्तः फलकारमप्युमर्थमभिप्रेताभिनवं केचित्तु स्थान्यादेशभावबोधतात्पर्यविषयीभूतेन विधावुद्देश्य
तेन साक्षादुच्चार्यमाणेहैव हि निर्दिश्यमानपदार्थः त्र्यज्वक्रोष्टुरित्यादेरतिदेशरूपत्वेन वाच्यवत्त्वात्स्थान्यादेशभाव
बोधकत्वाभावेपि फलाभिन्नतद्बोधविषयताया अव्याघातानुप्रियत्रोष्टेस्याद्विसिद्धिः येनविधिस्तदन्तस्य बोधितत्त
स्य यदागमन्यायलब्धस्य साक्षादुच्चारणाभावान्न निर्दिश्यमानत्वप्रसंगः हयवरट्सूत्रस्थं भाष्यमंत्र यहणसं

बभ्रस्यैव पदाधिकारस्य संबंधात्पदांते वर्तमानस्य विसर्जनीयस्येत्यर्थः यद्वा पदाधिकारस्यान्यत्र प्रायेणावयवषष्ठ्यं
न तोया अपि क्लृप्तत्वया प्रकृतेपि पदावयवस्य विसर्जनीयस्येत्यर्थः मास्तु पदाधिकारो मंडूकानुवृत्तिरपीह बहुशोद
र्शनादित्यनेकधा नास्ति भस्त्रोंत्य परिभाषाया उपयोगः यच्च षष्ठ्यानिर्दिष्टपदेन तस्यैवादेशो भवतीत्यभिप्रायकं तन्न
तु प्रकृतपरिभाषाप्रवृत्तिपरं उक्तमाश्रित्यैनियमाभावात् नियमकारिण्याः परिभाषायाः प्रवृत्त्ययोगात् इत्थं च
धातुप्रातिपदिकादिसंज्ञाविषयस्यानिर्दिश्यमानत्वाभावेपि न क्षतिः तन्मध्यपतितन्यायलिंगविशिष्टपरिभाषाभ्यां
च तत्तद्ग्रहणप्रामाण्यात् स्थानिवत्सूत्रेणैव निर्दिश्यमानत्वस्याप्यातिदेशादुक्तस्य दोषः अवयवषष्ठीविषये तु नास्याः
परिभाषायाः प्रवृत्तिः प्रदेशेषु स्थानिसमर्पकस्यैव परिभाषोपस्थापकत्वात् तस्योपस्थापक सामानाधिकरण्यानुरो
धेन स्थानषष्ठीविषयतायां एव युक्तत्वात् परिभाषाया आवृत्तिवशेनार्थद्वयाश्रयणादुभयविषयकत्वमिति चास्तु
तु मेव गौरवात् तदोः सस्सावित्यादौ लक्ष्यानुसारिणा वैयधिकरण्यान्वयेनैव निर्वाहे गस्य सदादीनां तकारदका
रयोः सकारः इति पादः पदित्यादौ च सर्वस्येदस्यादेः स्मायादिवारणार्थमेवस्याभ्युपगंतव्यत्वया प्रकृतपरिभाष
यैव सामानाधिकरण्येनोपपत्तौ जघन्यस्य वैयधिकरण्यस्य प्रयुक्तत्वनिमित्तसंनिधानाभाव इति सुपदस्या

२ प्रपठ्येत्यादौ तदंगस्य त्वम्बुकारणार्थं च

प्रदर्शनपरभाष्यासंगतिः॥

देशेनोदाहरणत्वानुपपत्तेः तस्मादवयवषष्ठीविषयेप्रकृतपरिभाषाप्रदर्शनंभाष्यकृतांप्रौढिवादएवेतिपादः पदिति सूत्रस्थकैय्यटाद्यग्रीयते एवं च त्यदादिपदबोध्यानामनिर्दिश्यमानत्वेप्यतिस इत्यादावभीष्टासिद्धिरित्याहुः॥ ॥यत्रानेकविधमान्तर्यंतत्रस्थानतआन्तर्यंबलीयः॥ ॥उक्तपरिभाषास्थानित्वप्रयुक्तमतिप्रसंगं वारयतीयंचादेशकृतमित्यनयोरसंगतिरुदाहृ ननु चेत्यादि अकारोपीतिस्थानेन्तरतमइत्यत्रप्रथमान्तएवपाठः ननु सप्तम्यन्तः अन्यथास्थानित्वं तरतमेभवत्यादेशइत्यर्थे विसदृशस्थानिव्यावर्त्तनविशेषणचीत्यादिनादीर्णो र्थो१ मादेशानापत्तेः तादिन्याकाशेषुतस्यत्यादिभ्य इत्यादिनिर्देशास्यतद्दोषनिवारणायपयत्नेनाभ्युपगमेचप्रथमान्तपाठसार्थक्यमेवतस्ययुक्तत्वाद्यवात् तस्माद्विसदृशादेशनिवर्तनार्थमेवस्थानेन्तरतमइतिसूत्रमस्यांचावस्थायांस्थानितिरूपितान्तर्यस्येजः कारोभयसाधारणत्वेनपाक्षिकएवाभ्रात्वात्प्रसंगइतिभावः यादृशादेशविषयेस्थानतद्भिन्नप्रयोज्यमनेकविधंस्थानिनिरूपितमान्तर्यमादेशप्रवर्तकंतयाप्रसक्तं तत्रस्थानप्रयोज्यमान्तर्यंबलीयइतिपरिभाषार्थः बलीयस्त्वं च अन्यानपेक्षस्वमात्रप्रयोज्यसादृश्यप्रयुक्तकार्यनिवाहत्वेनेहविवक्षितमितिद्रष्टव्यं१ ननुस्थानकृतान्तर्यस्यान्तरंतर्येणादेशप्रवर्तकत्वेबाध्यरिरित्यादोजायमानः पूर्वसवर्णःचतुर्थवदन्यो

स्य

पि स्यात् एवं हो ह इत्येरित्तिकृत्वविषयेपि दोष एवेति चेत्सत्यं संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृताव
र्ण इति एचोयवायाव इत्यत्र तद्विषयकं यथासंख्यसूत्रस्थभाष्यप्रामाण्येन यत्र स्थानकृतमान्तर्यमधिकरणस्ये
व गुणादिकृतान्तर्यस्य कार्यप्रवर्तकत्वेन प्रसक्तिः तत्रैवास्याः परिभाषायाः प्रवृत्तिरित्यभ्युपगमे वाग्धरिरि
त्यादौ स्थानकृतान्तर्यसमानाधिकरणस्य गुणकृतान्तर्यस्य प्रसक्तिरिति तस्य स्थानकृतान्तर्याबलम्बनया
परिभाषया बोध्यत इति न दोषः स्थानार्थगुणप्रमाणकृतमिति उक्तत्रितयान्तिरिक्त साहचर्यप्रयोजकं वर्ण
गतो धर्मस्तु गुणपदार्थः ननु बाह्यप्रयत्नमात्रेण एतेनान्तर्यमेवोत्तयोरान्तर्यमित्यत्र परम् इति सूत्रभाष्यो
क्तिनस्यानान्तर्यस्याधिकृतस्य साहचर्यपरिगणनविरोध इति परास्तं एकदेशानुवृत्त्येति एकदेशानुवृत्तिर्य
थातावन्मात्रे स्वरितत्वप्रतिज्ञयानयोरित्यर्थः वाक्यभेदेनेति तत्र प्रमेयथा वाक्ये तरवर्थस्यापि विवक्षा हि तौ
येपि स्थानपदं स्थानित्वादिस्थानपरं सामर्थ्यादिति भावः सतिसंभवे इति स्थानगतस्य गुणादिकृतस्य च
परस्परवैय्यधिकरण्येन यत्र कार्यसमर्पकत्वं तत्रेत्यर्थः इदं च पूर्ववाक्यवैय्यर्थ्याल्लभ्यत इत्यर्थकमिति
संपधन इति शेषः अतो न विपरिणमय्येतिल्यपत्रं तस्यानुपपत्तिः नन्वनेकेषामान्तर्यनिरूपकाणां प्रमाण

आंतर्यस्यादेशसमर्पकत्वं अन्यथैवसिद्धं

सिद्धत्वेन तदांतर्यस्यानुवादकार्यसमर्पणाच सूत्रस्योपयोगाद्वाक्यभेदेनोक्तार्थसिद्धिरिति युक्तं तदभावे च कथं वाक्य
भेद इत्यत आह तमपग्रहणमेवेति ननु विनापि वाक्यभेदं स्थानेंतयोंतरतमः संभवतीत्यर्थकतया स्थानेंतरतं
तर्यस्यैवान्यूनानतिरिक्तत्वरूपातिशयस्याभाय तमपग्रहणमस्तु स्थाकृतिरित्यादौ वकारव्यावृत्तिः फलं भविष्यती
ति न च यथासंख्यविज्ञानादिकोऽयं यणाचीत्यत्र वकारव्यावृत्तौ नैतत्फलमिति वाच्यं तथा सति सावर्ण्यवशात्
ऋकारलृकाराभ्यां परस्परग्रहणेनादेशव्यत्यासस्य दुर्वारत्वात् किंच हरिणांउसपामित्यादौ दीर्घविधानेन
प्रसक्तस्यैकारादेर्वारणमपि फलं न चानेकविधांतर्यसत्तायां न तमपः प्रामाण्यसंभव इति चेन्मैवं अंतरे
णापि तमपग्रहणं स्थानेंतरतरस्येतन्मात्रोक्त्यापि स्थानग्रहणसामर्थ्यादेवान्यूनानतिरिक्तत्वरूपाति
शयविशिष्टत्वादिकं तमेवांतर्यमित्यर्थस्य सुलभतया प्रागुक्तदोषनिवारणसंभवादवशिष्टं तमपग्र
हणमभीष्टसाधकमेवेत्याशयात्पूर्ववाक्यफलं क्रमेणोदाहरति तत्रेत्यादि प्रसिद्धमेवेति यदि च तत्र
स्वमते यथासंख्यसूत्रेणैव निर्वाहः परस्परसावर्ण्यप्रयुक्तादेशव्यत्यासरूढीय सावर्ण्यानित्यत्वेनैवानभ
वतीति सिद्धांतिमतं तथापि कोऽयं यणाचीयस्येत्युदाहरणत्वमित्युच्यते तद्ध्यादिपदयोरपभ्रंशः सवर्णे

दीर्घ इत्यादिषु फलं द्वयं स्पष्टं पूर्व इत्यादाविति न चात्र स्थानिनामनुच्चारणादेशनिरूपितान्तर्यविरहवतां स्थानिना
मेव व्यावर्तनीयतया विसदृशादेशनिवर्तनार्थे सिद्धान्ते प्रथमान्तपाठे प्रथमस्योदाहरणं न त्वाह। स्थान्यर्था
भिधानसमर्थस्येत्यादि अयं भावः आनन्तर्यस्य स्थान्यादेशभावप्रयोजकत्वमुत्सर्गस्वीकृतं हि अयं सिद्धान्तः
तत्रादेशेषु स्थान्यर्थाभिधायित्वं यथा हि स्थानिषु तदर्थाभिधायित्वं तस्य तुल्यं विनिवेधनया तद्गृहस्यापि सो
लभ्यात्पदाद्यादेशैरनुमीयमानाः स्थानिनोऽप्यादेशाः समानार्थकाः पादादयो लभ्यन्त इत्यादेशाः सदृशा एव भवन्ति
यदि च स्थान्यादेशभावप्रयोजकत्वं समर्थत्वानन्तर्यस्य न स्यात्तर्हि समानार्थकानामपि स्थानिनामाक्षेपः स्यादिति
विसदृशाप्यादेशा भवन्त्येव न स्थाननिवर्तकत्वमस्याः परिभाषायाः इति तदा तत्समानार्थेति न चार्थस्यैवेत्यत्र
स्थापकत्वे चरणशब्दस्यापि पदादेशापत्तौ पदमङ्घ्रिश्वरयोस्त्रियामिति कोशात्तस्यापि लिङ्गं तथा चरणानीत्यर्थे
पदादित्यस्यापि प्रसङ्गः न च स्थान्यर्थाभिधानसमर्थस्यैवादेशतया न दोषः स च विशिष्टार्थाभिधानसामर्थ्या
भावादेव न तादृशस्य चरणशब्दस्य पदादेश इति वाच्यं एवमपि रात्रिशब्दस्य निशादेशोऽस्मिन्परतो रूप

राचीत्यत्रनुशब्दस्यरुत्वापत्तेः नच नलोपः प्रातिपदिकांतस्येतिसूत्रस्थभाष्यपर्यालोचनयाराजेतिसमासां
तर्घटितपाठस्यैवलाभान्नायं दोष इतिवाच्यं एवमपिमुखशब्दस्यापि आसन्नादेशेतस्य मुखं स्वांगमितिबहु
व्रीहावंतोदात्तत्वेगौरादित्वरस्यादाद्युदात्तनिवृत्तिस्वरापत्तेः तथाभं भशब्दस्योदात्तादेशे ओत्तसतोभस्
त्यभसावुक्तमित्यत्रेव उद्गवत्तमित्यत्र अलुग्प्रसंगइत्यत आह। तास्समानवर्णेति तत्वंचतदवयवभूतौवी
तवर्णौ तयोर्भिन्नत्वात् स्थानजन्यवर्णावयवत्वं एवं च स्थानतोनंतर्यस्यापि सत्त्वयतयाक्यंप्रवेर्तनत्वे संभवति
तदपेक्षायां मानाभाव इत्याशयः ननु पादादीनां पदादीनां च सार्वत्रिकत्वेन प्रयोगविषयतायाः प्रसंगेनियत
प्रयोगस्याभावेपि इदं सूत्रं ननु स्थान्यादेशभावबाधनार्थमिति प्रवृत्तसूत्रे भाष्ये सिद्धांतितं तत्तस्य कथमिदमुदा
हरणमत आह लव्यत्स्रोतौ ष्ठुरिति इदमपि प्रयोगनियमार्थमेव सूत्रमित्याशयेन तुतुं वक्षांविषयवाङ्मयमुखसिद्ध
रद्वंद्वं रवेत्यादीन्युदाहरणानि इष्टव्यानि गुणतो वा ष्ठ्युरिरित्यादाविति आभ्यंतरप्रयत्नस्याप्यत्र गुणत्वेनाभि
मतत्वात् विवृता घोषस्य महाप्राणस्य तस्य नादघोषवत्कार इत्यादेर्नासंगतिः प्रमाणतोऽदसोसेरिति अ

[?]र्द्धमात्रिकभिन्नत्वमेव ह्रस्वव्यंजनयोरांतर्यप्रयोजको धर्मस्तन्निबोध्यं केचित्तु कवयः कविभिरित्यादिभाष्यकारो
दीरितत्सोऽवयवान्तरवत्त्वादेव विसदृशाच्छब्दाद्वाध्यावर्त्यमाणं सूत्रमनारब्धमेव प्रकृतमर्थं गमयतीति तिन्न सूत्रा
वतिमत्तुकवाक्यभेदस्योपयोगः अनेकविधांतर्यसत्त्वेऽपि स्थानकृतमेव सिद्धान्ति हि सादृश्यप्रयोजकानां धर्माणां शास्त्रे
कसमधिगम्यत्वात् क्वचिद्दृष्टान्तस्मादिह तमपरत्वस्य सूत्रस्य नियामकत्वे प्रकृतशास्त्रे स्थानव्यतिरिक्तानामां
तर्यप्रयोजकानां निवर्त्तकत्वम् अनिरासाय किंच परः प्रसंगेन तत्कार्योच्चारणसमर्थ एव विशिष्टो यथा याजकादिभिरिति
प्राप्नोतीत्युक्तं शब्दस्यार्थप्रविशेषप्रतिपादनाय उच्चारणप्रसंगे विधीयमानः शब्दोऽपि तदर्थाभिधानसमर्थ एव
भवतीति वक्तुं स्थितिः एवं च विसदृशार्थप्रतिपादकादेशवारणाय तेनये प्रयत्नांतराश्रयणं वथैव गुणशब्दस्तिह
वर्णगतधर्ममात्रपरः स्थानेतु न तथा तत्र तस्य पृथग्युक्तिः आभ्यंतरप्रयत्नोऽपि बाह्यप्रयत्नवत्वर्णेष्वारोपि
तः वर्णधर्म एव अतां तर्यमप्यांतर्यप्रयोजकं स्थानरहितस्यमेवेति न वर्णधर्मा ध्वनिरेकः प्रमाणस्य ह्रस्वत्वा
देरपि तथात्वविशेषास्य पृथग्युक्तिः ब्राह्मणवसिष्ठन्यायेनेति युक्तमित्याहुः ॥ ॥ अर्थवद्ग्रहणे नानर्थकस्य ॥

एवं स्थान्यादेशभाववत्त्वातिप्रसंगस्य वारणे निमित्तनिमित्तिभावग्रस्यान्ताद्यतिप्रसंगस्य निवारणं न्त्रमत्रासमि
ति संगतिं सूचयन्नवतारयति । ननु प्रौढवति स्यादिति । दीर्घः स्यादिति । तथा गर्मत्तु स्थानमित्यत्र उरस्थे तिपूर्व
सवर्णस्याश्च स्यादिति बाध्यं अर्थविशिष्टस्य ग्रहणे संभवति नाङ्गहितस्य ग्रहणं नेति परिभाषार्थः । परिभाषा
। सिद्धिं प्रदर्शयति विशिष्टरूपोपादन इति वृत्तिनिरूपकतावच्छेदकीभूतान्तर्वर्तिविशेषणविशिष्टवर्णस
मुदायस्य शब्दस्वरूपोपादाने इति तदर्थः । मानाभावो ऽस्या इत्यत्र इति । अयं भावः फलव्यापारयोर्धात्वनामिव
शब्दानामपि शब्दस्वरूपतदर्थयोरुभयोरपि परस्परं विशेषणविशेष्यभावानवगाहित्वरूपविशिष्टं रवस्त्वोप
हितशक्तिरभ्युपगन्तव्या तत्रैव पदोपस्थाप्ययोरपि परस्परान्वयाव्युत्पत्तिवैचित्र्यात् पृथगुपस्थितयोश्च त
योर्विशेषणविशेष्यभावेन व्यभिचारः । लोके गामानयेत्यादौ गवादिशब्दप्रकारकार्थविशेष्यकबोधः शब्दसमभि
व्याहृत तत्र्म तु विरोधात् गामाहित्यादौ तु शब्दविशेष्यकार्थप्रकारकश्च सः नाह शविरोधादेव । अयमेवं ग्रत्यादौ
शास्त्रेऽप्यर्थे कार्यस्य बाधाच्छब्दस्वरूपविशेष्यकस्तदर्थप्रकारकश्च बोधो भविष्यतीति सिद्धमिष्टं यद्वा

शब्दप्रकारकप्रत्यार्थे शब्दानां शक्तिर्यतः तदनुरोधादुपस्थितेन शब्दविशिष्टेऽर्थे तन्तत्कार्यविरोधाद्विशेष्यविशेषणभाव
वैपरीत्येनार्थविशिष्टस्य शब्दस्य लक्ष्यत इत्यभीष्टसिद्धिः तथा च सर्वथा लोकन्यायसिद्धैषेयं परिभाषा न तु शक्तेति न
नु सिद्धान्ते पदस्य वाक्यस्यैवार्थवत्त्वं ननु तद्व्यतिरिक्तस्य न तथात्वमेव यानि स्वत्रापि पदे वृद्धेशे भूतस्फोटशब्दस्य तु तत्र
त्वमांनोढवच्छद्दृष्टविलक्षणत्वेन कथमनया परिभाषया व्यवस्था स्यादित्यत आह। तत्रार्थवद्ग्रहणादि। प्रक्रियानि
र्वाहाय शास्त्रकारकल्पितेनान्वयव्यतिरेकाभ्यां कल्पितः प्रकृतिप्रत्ययादीनां यः शास्त्रेषु समधिगम्योऽर्थः शा
स्त्रीयः यश्च लोके विशिष्टपदजन्यप्रतीतिविषयः तदुभयमप्यत्र शास्त्रे गृह्यत इत्यर्थः द्वितीयस्य फलं पदान्तमि
त्येव वार्ये इष्टं। तत्र ग्रहणे बीजमाह। सस्थ्याया भनिशं ता याश्नि भाष्य इति तत्र धनेनान्यायेनार्थवत्तिशब्द
स्य ग्रहणमित्युक्तं नन्वेवं वत्यां विशेषणत्वेनान्वययोग्यस्यार्थस्य यत्रोपस्थितिः तत्रास्याः परिभाषायाः प्रवृत्तिरिति ल
ब्धं तथा च वर्णमात्रोच्चारणप्रयोगे वासुदेवार्थवत्त्वं स्यादिति कोशबलात्तथाविधार्थोपस्थितेन स्वत्वाद्विशिष्टरूपो
पादानमित्यसंगतमत आह। इयं चेति लस्येति सूत्रे भाष्ये ति तत्र हि लिट् स्तुनातीत्यादौ नित्वादि वृमाशंक्य विशिष्टविशेष
णेन परिहृतं वर्णग्रहणेप्यस्याः परिभाषायाः प्रवृत्तौ तु नातिलुक्यार स्यानर्थकत्वादेनातिबाधनासेरादसंगतिः स्पष्टैव त
त्रोविशिष्टरूपोपादानविषयत्वमस्याः सिद्धमिति भावः। नन्वधिकारिति निषेधोप्यत्रार्थे प्रमाणं अर्थवतो ररेवग्रे

कारयोर्ग्रहणे हि निषेधो निरर्थक एव स्यात् अत्रार्थे प्राचीनानां विप्रतिपत्तिरपि नेत्याह। अत एवेति यथाः कृतिकारादयः
कात्यायनानुकृत्यं दर्शयन्ति एतन्मस्तकमेवेति वर्त्तिकमिति चोषः यदि च वर्णग्रहणेप्यस्याः प्रवृत्तिस्तर्ह्यनर्थकेनेति
विशेषणमसंबद्धं स्यात् अथास्याः परिभाषायाः लोकसिद्धत्वनिर्वाहक पूर्वोपपादितपक्षद्वयेपि शब्दार्थयोः इतराल्लिंगत
योरेव सर्वत्र भाननियमात् कुघटः कलशस्त्येवं पर्यायाणां सहप्रयोगापत्तिः आनुपूर्वीविशेषवैशिष्ट्ये नोद्देश्यतावच्छेद
कविधेययोर्भेदस्य सत्त्वात् यदि चानुपूर्व्यतिरिक्तमयुक्त एव तयोर्भेदस्सामानाधिकरण्यं तत्र मननुभवानुरोधित्वात्कार
णकार्यभावे स्यैति मन्यते तर्हि कुत्र किं च शाब्दानुरोधिनी शब्दशक्तिः कारणस्य कार्यानुरोधित्वात् नहि लोकगामानयेत्या
दौ शब्दप्रकारकत्वेनार्थस्य भानमनुकरणेषु वा तत्तदर्थप्रकारकत्वे न शब्दस्य भानं कस्यचिदनुभवसिद्धं किं तेनाद्यशक्तेरनि
र्णायकशक्तिद्वकासिद्धान्तवासनावशादेव न च शक्तिभ्रमादिजन्यालौकिकविशिष्टबोधाभाव इति वाच्यं स्वाभवाद्यपरस्परा
नुपहितयोरेव शब्दार्थयोश्शक्तिः विशिष्टबोधश्च शक्तिभ्रमाधीनो लाक्षणिकोपि समस्येव युक्तत्वात् अपि च केवल
एवार्थे शब्दानां शक्तिरनुकरणे च विशिष्टशब्दसमभिव्याहारे तदभाववाभेदविवक्षायामनुकार्यानुकरणयोः साहश्य
स्य संबंधेनोपस्थितस्यार्थस्य शाब्दबोधे भानं व्युत्पत्तिवैचित्र्यात् अभेदविवक्षायां प्रत्यक्षेणगृहीतस्यैव शा

नुकार्यस्य शाब्दान्वयि
प्रतियोगित्वं

ब्दस्यशब्दाचर्यविषयत्वमुक्तरीत्येतिप्राचीनपरिदृष्टिलिनमार्गएवयुक्तः लघुतरत्वात् । तस्मात्कथमस्याः परि
भाषायाः लोकसिद्धत्वमतआह । किंचेति तत्र यदि शब्दार्थयोः पृथक्शक्तिरितिमतं तर्ह्यनर्थकेपिशब्दे प्रसक्त
स्यशास्त्रस्यार्थविशिष्टएवप्रवर्तकत्वमपर्यवसानेन तत्र शक्तिनिर्णायकं लक्षणातात्पर्ययाहकं वायदातु केवलएव
अर्थः शब्दानांवाच्यः कचिच्छब्दस्यापि प्रयत्नलभ्यतएवेतिपक्षस्तदार्थबोधितस्यकार्यस्याविशेषात्पर्याय
मात्रे प्रसक्तस्योपात्तशब्दएवेति नियामकं स्वंरूपमितिस्वेनच्छास्त्रमितिविवेकः अत्रेदमवधेयं यदातु पर्यायमा
त्रे प्रसक्तस्यकार्यस्यप्रत्यासत्तिवशादेवोपात्तशब्दे प्रवृत्तिरितिमत्याख्यातमतस्तत्रं तदापि परिभाषासिद्धावपि
सेवगतिः श्रीरदेवादयस्तु ज्ञापकेनामुमर्थंसाधयंति तथाहि अश्वादिसूत्रे राजेः पृथक्भ्राजिग्रहणमस्यां ज्ञापकं
अन्यथा राजग्रहणेनैव वर्णनिरूपकतावच्छेदकीभूतानादेशानुपूर्व्याश्रयत्वस्यापि भ्राजेन्तर्गतस्य षत्वविधानसंभ
वात्तिंतेन नच फणादिना राजिना सहचर्यात्तथाविधस्यैव भ्राजेर्ग्रहणार्थं तस्यावश्यकतया तज्ज्ञापकतासंभवः
तिवाच्यं प्रस्यामवस्थायामफणादिभ्राजेन्तर्गतस्यापि राजिग्राहणेन प्रसक्तया फणादिमात्रग्राहकसाहचर्यस्य

नापन्न

दुर्लभत्वात् नचैवमपराभ्यामितिसूत्रोदीरितभाष्यरीत्याण्णाधोरेवोभयोर्ग्रहणार्थत्वादितिवाच्यं तावन्मात्रफलक
त्वे भ्याजभोसेतिभ्राजिग्रहणाकरणलाघवानुरोधेनण्णोणादिव्यतिरिक्तेऋकारातिरिक्तानुबंधोच्चारणेनभ्रस्जा
दिसूत्रेराजइतिपाठेनचनिर्वाहात् नचराजृइतिपाठेउत्संतवऋकारवत्त्वोधातोरित्यर्थेभ्राजवयवस्यरा
जेर्ग्रहणमेवदुर्लभंऋकारस्यसमुदायानुबंधत्वेनमहिङोऽङ्कारवत्तदवयवानुबंधत्वायोगादितिवाच्यं ऋ
कारानुबंधोच्चारणमहिम्नैवतल्लाभसंभवात् नचभ्रस्जादिसाहचर्यात्स्वतंत्रस्यधातुसंज्ञावतएवग्रहणा
भ्राजंतर्गतस्यतदभावतोग्रहणसंभवइतिवाच्यं तथासतिनिर्दिश्यमानपरिभाषेकवाक्यतयाधातुसंज्ञा
वतोनिर्दिश्यमानस्यभ्रस्जादेरित्यर्थेलाघवस्थायामजितिभाष्यकारीयसिद्धांतानुरोधादज्झलमित्यादावज्ग्र
मसमवधानेकेवलस्यानथात्वेनैषवानापत्तेः नचराजिग्रहणनानर्थकस्यभ्राजंतर्गतस्येग्रहणेपितदंशो
विधीयःषकारादेशोनार्थनरकेस्तोऽस्यविधिरितिपरिभाषयासर्वादेशःप्रसज्येतेतितद्वारणायभ्राजिग्र
हणमावश्यकमितिवाच्यं प्यनेषकेइत्यादौत्यदादीनांस्यांत्यादेशत्वसिद्धवदन्त्येत्यादेशापरिभाषाभाष्ये

ध र

त्यारव्यानात् सत्वेवा यत्रानर्थकमात्रग्रहणं तत्रैव तत्प्रवर्त्तिः स्वीकाराच्च यत्तु विभ्राट् विभ्राट् इति रूपद्वयं
हि भ्राष्ट्रादिषु भ्राजिग्रहणेन साधनीयं तत्र भ्राजतेः षत्वेन फणादि धफणादिसाधारणतया भ्राजतेः कुत्वेन
च विनैव षत्वविधौ भ्राजिग्रहणं सेत्स्यतीति ज्ञापितायामपि परिभाषायां साग्निशेचारितार्थ्याभावात् न तापनसं
भवः न च फणाधफणादेः द्विबंतयोः सहविवक्षायामेकस्य कुत्वमपरस्य षत्वमिति द्वौ चेद् भक्ति वैप
रूप्याज्जननी परिच्छेत्तव्या च वृद्ध्योर्मात्रशब्दयोरिवोत्कृशेषाप्रवृत्त्या विभ्राडुविभ्राजाविति प्रयोगसिद्धिरास्मूल
मिति वाच्यं सरूपसूत्र दृष्ट्या कुत्वादीनां तेषामपिद्विशासिद्धत्वेन तल्लुनबेरूप्यैकशेषस्यैव ज्ञापकत्वानिबंधकत्वायो
गात् न च सामर्थ्याद्सिद्धत्वबाधः इति वाच्यं उभयोरपि समानार्थकतया विरूपाणामपि समानार्थकानामित्य
स्य दुर्वारत्वादिति वदंति तदसत् भ्राजानामस्त्वोकरूपान्तक्षाणौ भ्राजरूपान्तरूपा थाचक्षाणो वा भ्राजिस्यसेत्वषत्वा
र्थं तस्यावरूपकत्वात् न च तयोरप्युभयत्वापन्तदंतस्य तयोर्निरनुबंधकत्वेन सानुबंधकस्यैव तंत्रस्यैषसार्थं रीति इतरा
ग्रहणं प्रागुपदर्शितस्य भ्राजेः षत्वार्थं भ्राजिग्रहणमिति द्वयोरपि सार्थक्यात् तापदत्वस्यैवानुपपत्ति भा

ग्रहणे त् भ्राट् २ग्रहीतुमशक्यत्वात् सानुबंधकस्य२

१ ज्ञापितायां तु परिभाषायां राज्ञा नमाप्तेष्टरादिसस्यार्थवत्तयाग्रहणेन कृतार्थतया द्वितीयराजि
१ ग्रहणेनापि निरुक्तभांजन्तर्गतस्यानर्थकस्य ग्रहणं न स्यादिति भाजिग्रहणं सार्थकमुक्तवचनं

रितिवाच्यं तथा सति द्विवारं राजग्रहणां ज्ञेनेव सिद्धे भ्राजिग्रहणस्य ज्ञापकत्वमेवेत्याशयान् तयोरभिधा
ने प्रमाणाभाव इति तु न शक्यं सूत्रकारानुग्रहीतस्य भ्राजग्रहणस्यैव तदभिधाने प्रमाणयितुं शक्यत्वात्
स्माधुत्वमेवेदं ज्ञापकं परंतु न्यायसिद्धेर्थे ज्ञापकानुसरणं नातीवोपयुज्यत इत्युपेक्षितोपाध्यायेनेत्याहुः।
केचित्तु परिभाषासिद्धेत्राक् राजिग्रहणेन भ्राजयते: क्विपि भ्राट् भ्राजयते: क्विपि भ्राडित्यादावपि षत्वस्य
प्रसक्तत्वाद्भ्राजिग्राहणस्य तत्र नियामकतायामपि सावकाशत्वान्न ज्ञापकत्वसंभव इत्युपाध्यायाशय इत्यस
स्यंति॥ ॥ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः॥ ॥ अर्थोपस्थितिमत्त्वं तत्साम्यमपवादा
पवादकाभाव एवात्र संगतिरिति ध्वनयति न चैवमपीति अनर्थकव्यावर्तनावपीत्यर्थः आचापतिरिति
महदित्यत्र महच्छब्दस्य प्रत्यासत्त्या गौणार्थाभिधायी तथाहि कृभ्वस्तियोगे संपद्यकर्तरि च्विरि
ति च्विप्रत्ययो विधीयते संपद्यकर्तरीति षष्ठी तत्पुरुषः संपद्य: संपत्ति: निपातनाद्भावे प्रत्ययः अन्य
थाभवनं तदर्थः विकार इति यावत् स चोहारोपितो विवक्षणीयः तदुक्तं कात्यायनेन अभूततद्भाव इति व

६ प्रातिपदार्थे कृतं तयवमात्रे न कुत्रापि प्रसिध्यति [illegible]

कव्यमितियोवस्तुनोयेनरूपेणाभूतस्तस्याथायर्थेनतेनरूपेणभवनमभूततद्भावः नतुवस्तुनस्तेनरूपेण
भवनं तथासतिवस्तुभूतप्रकृतिविकृतिभावस्यैवपर्यवसन्नतयासंपद्यकर्तरीत्यनेनसौत्रेणैवतत्सिद्धावसं
भवेवार्तिकारंभस्यवैफल्यप्रसंगात्स्पष्टमिदमुद्योतेकृत्स्नपदं आश्रयपरंतेनतस्याः समभिव्याहृतकृभ्वाद्यर्थ
क्रियान्वयितयाआरोपविषयीभूतविकारप्रकारकप्रकृतिविशेष्यकप्रतीतिजनिः१ नतुकर्तृविकृतिवाचकात्च्वि
रितिफलितोर्थः अतएवाकारणीभूतोदंडः कार्यीभूतोघटइत्यादयोनप्रयोगाइतिवक्ष्यते तदेवाभिसंधा
यभाष्येप्योत्तरत्रौदोच्वंतार्थेगौणइतिव्यवह्रीयते ननुच्विप्रत्ययस्यकृभ्वाद्यर्थक्रियायोगेनिमित्ततया
तदर्थस्याक्रियायामेवान्वयोन्याय्यः अतएवक्रियायोगनिबंधनगतित्वप्रयुक्ताः पिंडीभूयसंघीभूय
इत्यादयःप्रयोगाः ननुश्चमहद्भूतइत्यत्रमहच्छब्दस्यप्रधानीभूतकृप्रत्ययार्थान्वयित्वात्समानाधि
करणोत्तरपदपरत्वप्रयुक्तस्यात्वस्याभावस्तेनायमेतत्परिभाषाविषयइतिचेन्नमहच्छब्दार्थस्यस्वकर्तृ
कत्वसंबंधेनभवनक्रियामेया१न्वयेपिकृप्रत्ययार्थादतिरिक्ततयावस्तुभूत सामानाधिकरण्यस्य
सुवचत्वेनात्वप्रवृत्तेर्दुर्वारत्वात् पूर्वोत्तरपदार्थयोःसामानाधिकरण्येनान्वयएवतुतत्रात्वनिमि

प्रतिपाद्य

धोसे निपातस्यार्थेन ॥४ किंच भक्तप्रवर्गसधीनमप्यर्थवत्त्वं अर्थवत्सारभाषाविषयः ॥ अतएव

त्वमिति वक्तुमशक्यं महान्तमात्मानं मन्यते महामानीत्यादौ आत्वासिद्धिप्रसंगात् यदपि निपातानां द्योतक
तासिद्धान्तात्त्वं तस्यापि सैव रीतिरर्धजरतीयन्यायापत्तेरित्युच्यते तदाप्यर्थकत्वबोधकत्वरूपं सामानाधि
करण्यं सुवचमेव अर्थवत्त्वं तु निर्विवादमत एव नमस्करोति देवानित्यत्रोपपदविभक्तेरिति न्यायेन चतुर्थीता
रणमाकरे अथ प्रकृतिविकृतिभावस्थले विकृतेरेव समभिव्याहृतक्रियाकर्तृत्वं दृश्यते एवं वृक्षः पंच
नौकाः भवन्ति सुवर्णं कुण्डलं भवतीत्यादौ तत्र महच्छब्दोऽरोपितविकृतितावच्छेदकीभूतमहत्त्वपुरस्कारेण स्य
प्रकृतिभूतार्थमहदर्थबोधकत्वान्न त्वाब्दस्य च विकृतिबोधकत्वात् सामानाधिकरण्यमस्तीति चेत् अत्र केचित्
यत्र विकृतिवाचकस्यारोपितविकारविशिष्टप्रकृतिबोधकत्वं तत्र विकृतेः पार्थक्येनास्मरणात् प्रकृतेरेव स
मभिव्याहृतक्रियाकर्तृत्वं यत्र विकृतिवाचकमनारोपितविकारविशिष्टमेव स्वार्थं प्रत्याययति तत्र प्राधा
न्याद्विकृतेरेव कर्तृत्वं अन्तरा वाक्यत्वं संपद्यते संघीभवन्ति ब्राह्मणा इत्युभयविधप्रयोगसिद्धिः अहं रामो
भविष्यामि सीतात्वं भव पार्वतीत्यादिरप्यारोपविषय एवेति न तदनुपपत्तिः आन्महत इति सूत्रे भाष्ये स्फुट
मेतत् तत्र हि अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमा इत्यत्र भवच्छब्दोयं तस्मादात्वमात्मत्वमित्याशंक्य प्रधानतो वाड़तो

२ महान् समहारथादौ असंत रू देशु जहास्वार्थतया वृत्तिघटकस्यानर्थकस्यापि आत्वप्रवृत्तिरीतिदिक् ॥

इति रीतिसमाहितं अगोमतीगोमती संपन्ना गोमत्तीभूता भवतीति तस्य पक्षोऽस्ति तत्र भाष्योदाहृते सामानाधिकर
ण्य निबंधनं पुंवत्त्वं न भवति गोमतीशब्दस्य तत्र रूढ्या नदीविशेषबोधकतया भाषितपुंस्कत्वाभावादिति स्पष्टमेव तत्
इति वदंति। गौणमुख्ययोरपि कार्यप्रसंगे मुख्य एव कार्यं भवतीति निश्चयः इति परिभाषार्थः अत्र दीक्षितादयः गौणश
ब्देनानुकरणलाक्षणिकशाकृतसंकेतितविषयाणां त्रयाणामपि ग्रहणं तदुक्तं अभिव्यक्तपदार्थाये स्वं तत्रालोक
विश्रुताः शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु इति तत्र हि विशेषणत्रयेण क्रमात् तत्त्रितयव्यावृत्तिः एवं च ते
षु शब्देषु शास्त्रप्रतिपाद्यं कार्यं प्रवर्तनीयं न तु तत्सदृशेष्वन्येष्विति तदर्थः कपिंजलाधिकरणन्यायेन प्राथमिक
बुद्धिविषयीभूतमर्थमुदाय शास्त्रार्थो निष्पन्ने पाश्चात्यबोधविषयाणां शब्दस्वरूपादीनां शास्त्रविषय
त्वमेव युक्तमाकांक्षामानाभावादिति न्यायसिद्धेषा परिभाषा न तु श्रुमुख्यत्वं प्राथमिकबुद्धिविषयत्वं गौणत्वं तु पा
श्चात्यबोधविषयत्वमिति निष्कर्षः अनुकरणस्य गौणत्वात् अभक्तस्येत्यनुकरणं चानतिपरमिति गौणत्वं संज्ञावत्त्वं अनु
करणभक्तेयुष्मच्छब्दप्रत्यये तरपदयोश्चेत्यस्याप्रवृत्तिः लाक्षणिकस्य गौणत्वात् वाहीकार्थबोधकगोशब्द
तु गोपयसोर्यदित्यस्याप्रवृत्तिः आधुनिकसंकेतविषयस्य गौणत्वात् पुरुषविशेषसंकेतितयोरग्निसोमपदयोर्द

ष्टे सत्यग्रे ऽङ्गनित्यादिनाषत्वाप्रवृत्तिरित्यादीनि फलानि ईदृशं चार्थवत्परिभाषाविहितशिष्टरूपोपादानविषयैव अर्थोप
स्थितिस्तु रोधि चान्तरङ्गापवादत्वाच्च अतएव गणपाठे त्यादावपि सिद्धिः पदत्वार्यमात्रविषयतानुनयुक्तमानाभावा
त्तु युष्मदस्मदोस्त्व रूपमात्राश्रयाणां बाधादेशानामुपसर्जनतायामिव संज्ञाशब्दमपि प्रवृत्त्यापत्तेश्च संज्ञोपसर्ज
नीभूतास्तु न सर्वादय इत्यत्र संज्ञाग्रहणमेतत्परिभाषासिद्धार्थानुवाद एवेति स्पष्टं हरदत्तग्रन्थे अस्तु वा अरूढत्व
जाति ग्राहणवदिदमपि परिभाषायां अनित्यत्वे प्रमाणं फलं तु पुराडाशाशाब्दस्त लक्षणया तत्सहचरितमंत्रप
रत्वव्याख्याने थैढनि पुरोडाशिव इत्यादेः सिद्धिरित्याहुः सोऽयं प्राचीनमार्गो वक्ष्यमाणदोषदूषित इत्यादरणीयः इत्या
दायेनान्यथाव्याचष्टे गुणादागत इति ऽधस्तोऽधि गौणत्वस्य गौणत्वे अक्षरम यदि विरोधः ध्वजत्वादेः स
हचर्यादर्थान्तरप्रत्यायकत्वेऽप्यात्मुर्यादेरभीष्टासिद्धिः प्रसंगश्च न्यायनिस्सतेनतत्समर्थनं तु न युक्तं प्रसिद्धफला
भावात् प्रक्षालनादिन्यायेन तथाविधगौणत्वाभावस्यैव न्यायत्वादित्याशयः ज्याज्यादि गुणनिमित्तार्थ इति तात्
त्वा गुणारोपप्रयुक्त सादृश्याख्यसंबंधप्रयोज्यारोपविषयीभूतत्वात्तधर्मप्रकारकप्रतीतिविषय इत्यर्थः सद्विविध
इत्याह वाहीकोऽप्रसिद्धश्चेति अनादितात्पर्यविषयार्थान्तरप्रतीतिनिरपेक्षप्रतीतिविषयः प्रसिद्धः तद

संकेतविषये प्रसिद्धत्वे

न्यस्त्वप्रसिद्धः संज्ञादिरिति। संज्ञा संकेतः आदिर्यस्येति विग्रहः न चायं तत्तः पूर्वमस्तीत्यादिशब्दोऽप्रसिद्धत्वस्फो
रणाय ननु गोपालकमानयेत्यादौ प्रकरणादस्य प्रसिद्धगोपालगतगुणवैशिष्ट्ये नैकस्मिन् पितृगोपालकप बोधः
दवत्वेनैव न तच्च कथमाधुनिकसंकेतविषयस्येति रूढं गौणत्वं नेत्राह तद्गुणारोपादेवेति प्रसिद्धिगतगुणारोपा
देवेत्यर्थः अपि हि चैत्रोयतः तद्गुणारोपादेव बुध्यते नतः सो गौण इत्यर्थः अयं भावः पित्रादिसंकेतितानामप्यनादि
संकेतवशात् अन्यत्र प्रसिद्धानां स्वस्वप्रवृत्तिनिमित्तवैकल्यादाधुनिकसंकेतमात्रेणार्थान्तरे प्रवर्तमानानां तत्तत्प्र
सिद्धपदार्थगतगुणारोपादेव प्रवृत्तिः स्पष्टं चेदं तत्त्वभावरत्नसूत्रभाष्ये तत्र हि डित्थादिषु भावप्रत्ययेन विवि
भिधीयत इत्याशंक्य अनादिरयं शब्दव्यवहार इत्यभिप्रायेण पूर्वपूर्वडित्थादिगतगुणाद्यारोपेण प्रसय इत्यु
क्तं एवं चारोपितत्वगुणादिप्रकारक एव संकेतितार्थबोधो न्याय्यः कस्यचिदन्यथा प्रतीतिस्तु भ्रांतिवशादेव हर्या
दिपदेषु मर्कटादिप्रतीतिर्न प्रसिद्धभगवद्गुणारोपेण किंतु मर्कटत्वादिनैवेति न तेषां गौणता एवं च गौणलाक्ष
णिकयोः स्वतोऽविद्यमानेष्वपि गुणेषु त्वाक्यगतेभ्यः कायाभिन्नतया तद्गुणभूयोधर्मवत्त्वरूपसादृश्यस्य दुर्वच
त्वाच्चादृशगुणारोपमूलकसादृश्यात्मकसंबंधेन शक्यतावच्छेदकारोपः संकेतविषये त्वसंभवद्विद्यमानानां

मेव प्रसिद्धगतगुणानामारोपोनुगतत्वमुख्यमन्यस्यारोपः तयोर्भेददर्शनं मुख्यमिव प्रधानत्वादिति यद्यपि शक्यता
वच्छेदकारोप एव लक्षणा सर्वत्र शाब्दिकनये सादृश्यप्रयुक्तदारोपे गौणोन्यत्र लक्षणेति संज्ञाभेदाद्व्यवहारभेदः
ततश्च शुद्धलाक्षणिकस्यापि निरूढमुख्यत्वसंभवस्तथापि प्रागुक्तदिशा यन्निरूढं मुख्यमित्यत्र तात्पर्याददोषः
नदेतन्मते नयन्तादृप्रसिद्धत्वं गौणलाक्षणिकं चेति । द्विप्रकृते गौणलाक्षणिकत्वानुत्तसंग्रहः स्वरूपोपसर्जनस्येति
।तत्कं गौणत्वमिति प्युदासश्च सिद्धशनिभावः नन्वेवमस्मभयुक्तप्रसिद्धस्यानुकरणगौणत्वस्य परित्यागेन यु
क्तशंति चेद्भ्रान्तः अस्मत्वस्येत्यादौ यथेकत्वसंख्याविशिष्टबोधकयुष्मच्छब्दादेरिदमनुकरणं तदा गौणत्वपु
रस्कृतयप्रकृतपरिभाषायायुष्मदादिशब्दस्वरूपात्मकानुकार्यगतैकत्वनिबंधनाधोपदेशिनी त्वाद्यादेशप्रा
प्तिर्वार्यते यानुप्रकृतिवदनुकरणमित्येतत्प्रयुक्ता तादृशानुकार्यगतैकत्वनिबंधनप्राप्तिरादिदेशकृतसानु
वार्यते तथातिदेशकस्यापि प्राप्तिरनयापरिभाषया वार्यत इति वक्तुं शक्यं कार्यातिदेशपक्षस्यैव तत्र सिद्धां
ति तया विशिष्टरूपोपादानाभावेन तदंशे प्रकृतपरिभाषाप्रवृत्तिदौर्लभ्यात् यदि चास्य नामी धर्मित्यादेः सूत्रो
पाभाववदनुकरणस्वरूपभंगभयादनिमत्ताद्दा प्रकृतिवदित्यस्याप्राप्तिरित्युच्यते तदर्थोपदेशस्यापि तथात्वा

स्तु त्विमनया परिभाषया किं चार्थवद्ग्रहणपरिभाषायामर्थशब्देनानुकार्यस्वरूपमितरत् एव ग्रहीतुमुचितः ऽअ
न्यथा नादृशार्थस्य सर्वत्राव्यभिचारितनया परिभाषाया निर्विषयत्वमेव स्यात् तस्मादेतादृशविषये बाधा
देशानामानर्थक्यादेवाप्राप्तिरतो निष्फलमिहानुकरणस्य गौणत्वं अभियुक्तोक्तभिव्यक्तपदार्था इत्यस्यापि मंवि
शेषणद्वयं विवरणभूतमत एव मध्ये यच्छब्दः प्रयुक्त इति तदुक्तिरपि नानुकरणस्य गौणत्वं स्पष्टमिति तदे
तद्धि पश्चिक्तु विचारयंत्विति उपसर्जनस्य गौणत्वाभावे फलमाह तेनेत्यादि ननूपसर्जनस्य लौकिनिरूप
गौणत्वेन परिग्रहेऽपि संज्ञोपसर्जनीभूतास्तु न सर्वादय इति वार्त्तिकस्य अनवचनस्य सार्थक्याय अस्याः परिभाषा
याः पदकार्यविषयत्वस्य वक्तव्यतयात्र यादेशस्यातथात्वादेव निर्वाहादिदं प्रयोजनं चिंत्यमत आह वृत्ते चेति
अत्र च महामहामानीत्यात्वादौ कृते तस्यान्महत इत्यात्वस्य महाबाहुरित्यादौ प्रवृत्तिः फलं मद्राह्मणो चेति निर्देशस्तु
प्रमाणमिति बोध्यं न च प्रातिपदिककार्यैरिति ननु प्रातिपदिककार्यं यदि वस्तुतः प्रातिपदिकसंबंधिकार्यमित्युच्यते
तर्हि आन्महत इत्यस्यापि प्रकृतपरिभाषाविषयत्वाभावान्महच्छब्दत्वादात्वापत्त्यप्रसंगः यदि च प्रातिपदिकसं
ज्ञावच्छिन्ननिमित्तनाशकं कार्यमित्युच्यते तर्हि राजन्ध्वे उदराश्वदित्यादि नखिलविधेरपि प्रातिपदिकाधिकारीयतया

निरूढप्रातिपदिकार्थत्वविशेषणस्य कृतपरिभाषायां भवतो गौणलाक्षणिकाध्यासुरशब्दादेः ध्वाङ्क्षार्य इत्यादि
प्रसंग इत्यतो वक्ष्यमाणपदार्थयोर्निरुक्तमिह प्रातिपदिकार्थत्वे न विवक्षितमित्याशयेनाह किंचिदिति उपात्तत्वं
प्रकृतशास्त्रीयवाक्यार्थसमर्पकत्वेनोच्चरितत्वं विशिष्यार्थोपस्थापकत्वसमुदायस्य तावच्छेदकरूपावच्छिन्नोपस्थि
तिजनकत्वं विशिष्टरूपतावच्छेदकवर्णसमुदायान्यतमत्वमिति इत्थं च पदार्थ इति। न तु तमोस्तत्रैवेष्टपदार्था
र्थेष्वयं न्यायो न प्रातिपदिकार्थेष्विति वस्तुभूतसर्वं न तव्याप्योद्देश्यतावदिह पदार्थत्वेन विवक्षितं पदत्वम
पदेशास्यत्वं न निवेशः ध्वाङ्क्षार्य इत्यादावुपजनिष्यमाणन्यायेन भाविभक्तिविषयतामादाय पदत्वोपगमस्यादोषत्वा
त्यात्र तत्त्वविनिमयत्वगीत्यादिसिद्धये व्याप्यत्वनिवेशः अन्यथा सर्वनाम्नामधिगोमत्पञ्चमस्ययनिमित्तत्वापार
पितव्यादेशयोर्वस्तुभूतसर्वं नत्ववदुद्देश्यतया तदनुपपत्तिः व्याप्यत्वनिवेशे च प्रथमयनिमित्तत्वापादादे
शयोः तादृशनिमादयनीत्यादावपि प्रवर्तेरिष्टतया नादृशोद्देश्यतायाः सर्वनामत्वव्यपदेशव्याप्यत्वाभावाददो
षः यत्तु पदत्वं तद्व्याप्यान्यतरत्वं धर्मावच्छिन्नोद्देश्यताकं कार्यमिह पदकार्यमिति तदसत् आन्तरतम इत्यादेरस्य

उत्तरपदाक्षिप्तंपूर्वपदमादायप्रवृत्तंचेत्पदत्वनिमित्तत्वेनपदकार्यसंभवेपितद्भिन्नविधेःपदत्वनिमित्तत्वाभा
वाद्बहुलंतनेष्वित्यलुग्विधानमहिम्नासुपःपरत्रनिमित्तानामुत्से तावत्प्रातिपदिकपदस्यनत्रसुबंतलक्ष
णायांमानाभावइतिनव्यसिद्धांतेसुबंतत्वनिमित्तत्वाभावाच्चभवत्यरसशब्दात्पत्यादौम्बारुम्बर्यइत्यादिनि
ब्दस्यदुर्वारत्वात् एतेनसंज्ञाभ्यांनाभ्यांसज्जरनडुहच्छब्दाभ्यांभ्यामादावनयापरिभाषयास्त्वजयोः तापक्वाद
र्ययोरप्रवृत्तिप्रसंगइतिनिरस्तंएवंचसंज्ञाविषयेप्युपसर्जनतायामिवयुष्मदस्मत्स्वरूपाश्रयाणांत्वाहाद्यबाधा
देशानांप्रवृत्तौसत्यभिधानेइष्टापत्तिरेवेत्युपाध्यायानुयायिनः नन्वस्तुविशिष्टरूपोपादानविषयत्वमर्थ
मत्तीनिमलत्वादर्थवद्ग्रहणपरिभाषापवादत्वाद्वाप्रवर्तनपरिभाषायाः निरुक्तंपदकार्यविषयकत्वंतुनयुक्तंप्र
माणवैकल्यादत आह परिनिष्ठितस्येत्यादि। संस्कृतस्यसंस्कारान्तरपदानुत्पत्त्यंतेतेषांयथेष्टमभिसंबंधोभवती
तिवधिसूत्रभाष्यादौ रीतेपदसंस्कारपक्षेवाक्यार्थमादायैवप्रातिपदिकसंस्कारायुक्तः तत्कालेपदांतरसमभि
व्याहारमप्युक्तान्वयानुपपत्त्यादिरूपलक्षणाबीजपरिस्फुरणाभावात्पश्चात्तुपदांतरसमभिव्याहारेसमास
पिलक्षणायांनातसंस्कारांतनिवर्तनमनुक्तवंतमितिन्यायात् यथागंगायांघोषइत्यादौ रूपादिः एवंचसत्यव

त्तिहेतुभूतायाः गौणार्थभक्तीर्नप्रातिपदिकसंस्कारवेलायामभावादप्रवर्तमानस्यास्य न्यायस्य न्याय्यपदवाच्यार्थवि
षयत्वमिति भावः नच स्वपदवाच्यार्थविषयत्वं विशेषविषयतायां । किंपूर्णमत आह स्वस्वरसहचरस्येत्यादि स्वस्वरस
वस्तुनोपात्तः प्रातिपदिकपदं तु न विशिष्यार्थोपस्थापकं मतरतिच न विशिष्टरूपमिति भावः विशिष्यार्थोपस्था
पकत्वाभावादिति यावत् प्रातिपदिकपदवाच्यानुगतस्य कस्यचिदखण्डधर्मस्याप्रसिद्धेस्तत्तद्रूपाणां चानन्त्येन दु
र्ज्ञेयत्वात्स्वरूपमेव प्रातिपदिकपदस्य प्रवृत्तिनिमित्तमिति भावः निपातपदमतो विलक्षणं तद्वाच्यापरिमित नां
धर्मवत्तया तत्तद्रूपेण वाचकत्वासंभवात्तस्मान्नास्यास्तत्र भाष्यविरोध इत्याह । निपातपदं त्विति चादित्वे
नेत्यस्य चत्वादिनेत्यर्थः यद्यपि च्वंतानां निपातपदं न विशिष्यार्थोपस्थापकं किंतु च्व्यंतत्वेनैव तथापि चादि
नां यद्विशिष्यार्थोपस्थापकत्वात्तत्र प्रवर्त्तत एवेति न प्रकृतपरिभाषाप्रवृत्तेर्विरोधः अथार्थविशेषोपस्थिति
रेतत्परिभाषाप्रवृत्तेर्निमित्तमिति तावन्निर्विवादं अतश्चेयं मुख्यार्थवाचकस्य प्रवृत्तिं गौणार्थवाचकावृत्तिं च व्यवस्था
पयति । निपातपदेन च्वंतचादीनामुपस्थितावपि तदर्थोपस्थितावपि तदर्थोपस्थितौ मानाभाव उच्चारितत्र
तत्र स्वार्थद्योतनसंप्रतीयमानश्च इति भाष्यादितः कथमनयोगो भवदित्यादेर्गौणत्वस्य व्यावृत्तिरिति चेत्सत्यं चादयो

मिति सूचयन्नाह। नन्वेवमित्यादि। प्रत्ययग्रहणे तदंतग्रहणे चेत्यर्थः ह्रस्वापत्तिरिति। ब्राह्मणीशब्दरूपमपि
तसिलादिष्विति पुंवत्त्वं जातेश्चेति निषेधे घरूपेति ह्रस्वः। ततः कुमारीशब्देन बहुव्रीहौ वयोवाचित्वेन नावैकल्पिकत्वा
ज्ञिकार्यस्य जातेरस्त्रीविषयादिति सूत्रभाष्यारूढतया पुंवत्त्वनिषेधे तदंतविधिना ह्रस्वापत्तिरित्यर्थः। ब्राह्म
धामेरा। लुप्तिःसवभूतेन पुंवत्कर्मधारयेत्यनेन पुंवत्त्वे ब्राह्मणरूपेति भवितव्यं कुमारीगोतरेत्युदाहृतत्वेनाभा
ष्यकारस्याप्ययमेवाशयः। एवं च वाक्यमित्यभिप्रायेणेत्यस्य समासोपलक्षणत्वं। तत्र कुर्वैटस्य प्रामादिकी
तिद्रष्टव्यं तथाविधप्रत्ययान्तोत्तरपदपरकत्वाभावान्न ब्राह्मणीशब्दे ह्रस्वानापत्तिरप्यत्रदोषः। तदेवग्रह
णादिति यत्तु उत्तरपदाधिकारस्य यत्किंचिन्निरूपितविशेष्यत्वाभावएवज्ञाप्यतां एवं चोक्तरूपरीतिरि
मित्याशयविशिष्टवैषीकामान्तानामित्यादिना विधीयमानस्य ह्रस्वादेर्वारणार्थमुत्तरपदविशेष्यकत्वेन भास
स्य भानियदि तदंतविधेर्निषेधाय गिल्ग्रहणेचेत्यस्य ज्ञापकत्वाश्रयणकृद्ग्रहणापिनेत्यपरमतं नवकूलमिसा
हुः तद्भसान्न तथासति तस्मान्नजिचिद्रसीत्यादौ उत्तरपदाविशेष्यत्वभयात्तस्य तदादिविधेरपि दोषेऽ

प्रत्ययग्रहणस्युपलक्षणं

भ्यापत्तेः अण् प्रत्ययांशे योग्यताविरहात् उत्तरपदे इत्यस्यासंबंधेपि प्रत्ययग्रहणपरिभाषाप्रयुक्तस्य शब्दस्वरू
पविशेष्यनिबंधनस्य तदंतविधेर्दुर्वारतयालेखग्रहणस्य चारितार्थ्यायोगाच्च अनभिधानाद्विति ज्ञापक
परं भाष्यमेवात्र शरणं भाष्ये स्पष्टेति तत्राहियद्गण् ग्रहणे रूपग्रहणं लेखग्रहणादुपक्रम्यापरं आह अल्पमि
दमुच्यते सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणं लेखग्रहणादित्युक्तं अत्रेदमवधेयं धर्मिग्राहकसू
जात्या देशसंबंधिविषयोयं तदंतातिनिषेधः सच विधिरादेशस्य प्रवर्तकस्त्वनिकृत्वेपील्लुगधिकारस्य संप्र
हः ततश्च रात्रेः कृतीत्यादावगमविधौ न दोषः चैतत्परिभाषाया अप्रवृत्तावपि संज्ञाविधावित्यनया प्रदेशेष्व
पि तदंतविध्यभावस्य मल्लकग्रेण व्यवस्थापिततया दोष एवेति वाच्यं कुमारीगौरितरेत्यत्र घांतोत्तरपदपरत्व
प्रयुक्तस्य ह्रस्वनिवृत्तिरेतत्परिभाषारंभप्रयोजनत्वोपवर्णनपरहृदयस्येति सूत्रस्थभाष्यप्रामाण्येन प्रत्ययग्रह
णे चापंचम्या इतिवत् तस्याप्युपात्तविशेष्यनिबंधनतदंताशनिषेधकत्वाभावकल्पनेनादोषात् स्यादेतदिदं तत्रै
व सूत्रे कैय्यटे न च सामर्थ्याद्रात्रेः कृतीत्यत्र तदंतविधिर्न हि रात्रिशब्दात् केवलः कृत्प्रत्ययः संभवतीति
वाच्यं आचारक्विबंतात् क्तिन्नादौ रात्रयितेत्यादिषु तत्संभवात् न च रात्रेः कृतीत्यत्रैतन्निषेधाभवत्येव धर्मिग्रा

नेरपसमर्थानिर्देशेषु तदंतांशज्ञापकत्वमुपेक्ष्य परशब्दाध्याहारबोधनद्वारा तन्निषेधबोधकत्वमेवास्यायोग्यत्वादि
त्यभिप्रायः अचेदं बोध्यं अनया परिभाषया शब्दस्वरूपविशेष्याध्याहारः फलत्वं तु तदंताङ्गनिषेध्य नेन तु उपात्त
विशेष्यांतरनिबंधनः अत एवोत्तरपदाधिकार इति वक्ष्यमाणपरिभाषायां हृदयस्येति सूत्रस्थलेखयत्ग्रहणस्य
ज्ञापकत्वं भाष्यारोपवर्णितमुपपद्यते परिभाषा च प्रयोजनवती हृदयस्येति सूत्रे चाणं तेऽन्तरपदे हृदयशब्दस्य
हृदादेशस्यार्थे तल्लेखशब्दस्याप्यणं तत्तयाहृल्लेख इति सिद्धिरिति तिन्हितस्य ज्ञापकत्वा यदि च तदंतविधिर्निषिद्धः स्या
त्तदा सबंधार्नेह त्वादुत्तरपदे हृदस्याणप्रसक्तौ शेति च्नो स्वीयविधानावध्यादेः हृदयशब्दस्य हृदादेशस्तस्यार्थे
लेखशब्दे प्रसंगाभावात् ज्ञापकत्वानुपपत्तिः स्पष्टैव घरूपत्वादावनया परिभाषया सुपि चेत्यादाविव तदंत
ताशनिषेधेन स्यात्प्रयोजनाभावेऽपि स्यरत्वप्रकृतभाष्यबलादुपात्तविषये सर्वशब्दाध्याहारकल्पनाद्वारा
तदंताभ्यनुज्ञानेतु तदेतदुभयं सुस्थं अत्र हि प्रकरणपाठमुत्तरपदाप्ताङ्गं विशेष्यमुपादीयत एव न तु पूर्वपदाप्ता
हारेप्यणु प्रसंगोपस्थितिजतदाघशस्यश्रूयमाणस्थानिभूतहृदयशब्दविशेषणतायाएवन्यायतयाप्रकरणप्रा
प्तोत्तरपदविशेषणत्वेन प्रत्ययस्य तदंतविध्यसंभवात्लेखशब्दे हृदादेशापत्तेस्तद्विधानार्थमावश्यकत्वस्य तस्यव

र्थं ज्ञापकत्वमिति वाच्यं ज्ञापनपरभाष्यप्रामाण्येन यत्र तदादि तदंता शायोस्तयोरुपस्थितिस्तत्र तयोस्स
मानविशेष्यत्वमिति नियमस्यापि ज्ञापनेनादोषात् स्पष्टं चेदमुद्योते एवं च निरूपितः इत्याद्योपं चम्यं तौ स्मर र्था
त्वेन यद्धीनस्यापि निरूपितः पदाधिकारविशेषणतया तदंतविधिर्भवत्येव न च सामर्थ्यादेव तत्र तदं
तविधिः नशि गिंगनापदादाम्रः केवलौ निरुक्तः संभवतीति वाच्यं अति सेरित्यादौ तत्संभवात् यत्तु रदाभ्या
मित्यत्र निष्ठेत्यस्य स्य तु त्तपष्ठीत्वं पृथक्पदत्वमाश्रित्य निष्ठांतावयवरेफदकाराभ्यां परस्य प्रत्ययस्य निष्ठांता
वयवतकारस्य न तस्मिन्नर्थे नैव निर्वादस्य सूत्रस्य भाष्ये तत्परिभाषोदाहरणत्वमयुक्तमित्याहुः तदसत् तदुदाहरणपरि
भाषया विशिष्टस्यैव निष्ठांतमादाय शीर्णवानित्यादौ धातुतकारस्य न त्वापत्तेर्दुर्वारत्वात् ध्वत्वं च सेटीडुंजो वेत्यादौ सेव
र्दसतम्पात्सादंतसप्तम्यन्तरितिषाष्ठभाष्यवत्तन्निर्दिष्टपरिभाषोपस्थितिप्रयोजकीभूतलोपश्लेषेविकल्पानवस्य
स्याभावात् न परशब्दाध्याहारस्तत्वं स्वं तदंताशनिषेधस्य इति सर्वमनवद्यमित्याहुः ॥ ॥उत्तरपदाधिकारेऽ
प्रत्ययग्रहणे तदंतग्रहणं नास्ति तदंता शनिषेधप्रसंगादेवं ज्ञापकस्य परिभाषांतरस्यात्रैव निरूपणं युक्त

हृत्साजात्यादेतस्याः स्वरूपेण श्रूयमाणप्रत्ययविषयत्वमिति भट्टाचार्येणोक्तं युक्तमिति वाच्यं घटकालतनेष्विव्या
दौ प्रकृतपरिभाषाया अप्रवृत्तिप्रसंगात् कुमारीगौरितरेत्यस्य घरूपेत्येतत्सूत्रविषयस्य प्रकृतपरिभाषोदाह
रणत्वं वदता भाष्यकारेण विरोधाच्च खित्यनव्ययस्येत्यत्रानव्ययस्येति पर्युदासमहिम्नैव तदंतविधिरिति
स्पष्टं भाष्ये। यद्यपि ल्लेख्वग्रहणेन प्रातिपदिकप्रत्ययोभयसाधारण्येन तदंतात्तन्निषेधस्य सामान्यतो ज्ञापयि
तुं शक्यत्वात् परिभाषायां प्रत्ययपरत्वस्याय युक्त्या अनुवादकत्वेन समर्थने प्रातिपदिकसंबंध्युत्तरपदविशेष्य
कतदंतात्तन्निषेधोपि प्रयत्नांतरमंतरेणानयैव परिभाषयांगीकर्तुं शक्यते तथाप्यादेशसंबंधिविधिमा
त्रविषयः प्रत्ययांशे तदंतविधिनिषेधः प्रातिपदिकविषये तु कुमारीसत्यागदस्येत्यादावागमविधिविषयोपेतेवि
शेषात् प्रत्ययमात्रविषयैवेयं परिभाषा प्रातिपदिकांशे तु ज्ञापकांतरसाध्योतिरिक्त एव तदंतात्तन्निषेध इति रमणीयः
पंथाः किं चायमुत्तरपदाधिकारे तदंतात्तन्निषेधः केवलोत्तरपदविशेष्यकस्यैव न तु पूर्वपदविशेष्यकस्य तेन ष्यङः
संप्रसारणमित्यत्र कृषीवलमात्मानमित्यादौ पूर्वपदविशेष्यकत्वात् तदंतविधिर्भवत्येव उपसर्गस्य घञीत्यादौ तूत्तरपदवि
शेष्यकत्वेपि तदंतविधिः सामर्थ्यादेव भवतीति सकलेष्टसिद्धिरित्याहुः॥ स्त्रीप्रत्यये चानुपसर्जनेन॥

तदंतात्रनिषेधप्रसंगाच्चेत्तदंतात्रनिषेधस्याप्युपस्थितत्वात् संदर्भः नन्वेवमिति। तदादिनियमोपस्थापकतया परिभा
षाभ्युपगमेत्यर्थः इत्यत्रैवेति। इवापिशब्दो भिन्नक्रमो। मात्रदस्मिन्नुक्तार्हितवदभावे दृष्टांतः॥ अतिकारीषगंध्यापुत्र
इव परमकारीषगंधीपुत्र इत्यत्रापि संप्रसारणं न स्यादित्यर्थः यद्वा परमकारीषगंधीपुत्र इत्यत्र तदादिनियमाद्भावात्सं
प्रसारणस्य साधनायोत्तरपदग्रहणस्य पूर्वपदात्मकविशेषणसद्भावेप्यंतरशब्दस्वरूपविशेष्याशे व्याहारणवतोरत्रेत्यत्रै
व तदंतविधिद्वयाश्रयणस्यावश्यकत्वात् अतिकारीषगंध्यापुत्र इत्यत्रापि संप्रसारणप्रसंग इत्यर्थ एवं यथाश्रुतु
मेव साधु एवं च तदंतविधिद्वयानभ्युपगमे परमकारीषगंधीपुत्र इत्यत्राव्याप्तिः तदभ्युपगमे चातिकारीषगंध्यापु
त्र इत्यत्रातिव्याप्तिरिति सर्वथा तदादिनियमो न युक्त इत्यत्र तात्पर्यं न च सत्यामपि परिभाषायां तदंतविधिद्वयाश्रयणा
त्तिकारीषगंध्यापुत्र इत्यादौ दोषोद्धार एवेति वाच्यं आरंभसामर्थ्यात् परिभाषासत्त्वे तदंतविधिद्वयानभ्युपगमेनादो
षात् गोस्त्रियोरित्युपसर्जनं प्रातिपदिकमिति विशेष्यद्वयमुपादीयत इति न तत्र तदंतविधिद्वयाश्रयणानुपपत्ति
रिति वाच्यं केचित्तु गोस्त्रियोरिति सूत्रे भाष्ये स्त्रीप्रत्यये नेति सामान्यतस्तदादिनियमाभावमुपगम्यातिकारीष
गंध्यापुत्र इत्यादौ दोषवारणाय स्त्रीप्रत्यये चानुपसर्जनेति पठितं एवं चांगाद्वयवतीयं परिभाषा तत्र प्रथ

त्र रू

मानाभावादिति। एवं च निषेधे तदन्यनिषेधप्रयोजकस्य संनियोगविशिष्टत्वस्याभावादित्यर्थः। असंनियुक्तत्वपक्ष
मथ रूढ्यन्तिरूपितमेव तत्त्वं तयोरंशयोरसंनियुक्तता। आनेमुगिति सूत्रस्थ भाष्यविरोधः तत्र हि पचमानइत्या
दावदंतांगस्य मुगित्यर्थे सार्वधातुकस्यागमेन व्यवधानादतुपदेशासत्त्वाभावेन स्वरानुपपत्तिरिति मंत्रांशक्य वैय्यधि
करण्येनान्वयेन समाहितं यदि च प्रकृतपरिभाषया तदंतातनिषेधेपि तदाद्यंशोपस्थिते तेऽदुपदेशांतात्सदादे
रित्यर्थेन सामानाधिकरण्येपि स्वरस्य निर्बाधत्वात्तदसंगतिरेवेति चेन्न अंतरंगपरिभाषायाख्यत्वयपर्यवसान्य
परिभाषायोऽपि साहाय्यमंतरेणान्वयवैचित्र्यादेव स्वरसाधनार्थं प्रौढिवादत्वेनादोषात्। अत एवांगस्येति सू
त्रे भाष्ये तदधिकारप्रत्याख्यानावसर इत्याह्य। इति न्यासमुपक्रम्य तदंतांशाभावेपि तदाद्यंशमादाय प्रकृतेरिति दा
कुपसर्गस्त्वं प्रसक्तयोरज्झटोः व्याहृतिमदर्शितेति प्राहुः॥ ननु तदंतांशोपस्थितावपि रेफादंतात्तात्सदादेः
परस्य निष्ठांतावयवतकारस्येत्यर्थे प्रागुक्तदोषस्य प्रसक्त्यभावात्तथैव तदंतविधिनिषेधप्रयासस्तदात्
दंतांशोपस्थितावितिएवं विषयत्वमिति। तदंतविधिप्रयोजकप्रसक्तिस्तशब्दस्वरूपविशेष्यस्यैव तदाद्यंशो
पि विशेषणं स्याद्यत्र तथात्वं सत्वादिति भावः नन्वेवमपि यत्र पंचम्यंतार्थातरत्वेन प्रसक्त्यानाश्रीयते तत्रासौ

थमांतमवष्टभ्यांऽशांतरस्येदमवतरणं अत एव तदादिनियमस्यात्र संबंधः स्यादुः नन्वनुपसर्जनत्वस्य स्त्रीप्र
त्ययविशेषणत्वादेवन्यायत्वात्तथाभूते स्त्रीप्रत्यये गृह्यमाणे तदादिनियमो नेत्यर्थस्यैवानया परिभाषया लब्धा
भाहुःसंप्रसारणविधौ च ष्यङः प्रसंगस्य स्येउपसर्जनानुपसर्जनरूपोभयसाधारण्येन गृहीतत्वादेतन्नियम
निषेधपरस्यैतेन सत्यामपि परिभाषायामिति कारीषगंध्यापुत्र इत्यत्र दोषोद्धारिद्ध्मत आह विषयस
प्तमीति अनुपसर्जन एसे त्यैतदित्यर्थः ननु स्त्रीप्रत्यय इति तत्स्य गृह्यमाण इत्यनेनान्वयानुपपत्तेः एवं चा
स्त्रीप्रत्यये गृह्यमाणे अनुपसर्जनस्त्रीप्रत्ययविषये तदादिनियमो नेत्यर्थे ष्यङः संप्रसारणमित्यादौ संग्रा
हकवाक्यस्योभयसाधारणत्वेऽप्येतत्परिभाषावशादनुपसर्जनस्त्रीप्रत्ययविषयकत्वेनोपकल्पितेन वाक्येन तदा
दिनियमोऽन्यत्र तदादिनियम इति व्यवस्था सुवचा अनुपसर्जनत्वं च स्त्रीप्रत्ययगतं विवक्षितं तच्च तदास्त्रीयो
पसर्जनत्वाभावः तस्य सत्त्वस्त्रीप्रत्ययसाधारणत्वेन व्यावर्त्याभावात्किंतु स्वघटितवस्तुपरस्याप्रतीतार्थांतर
निरूपितविशेषणत्वाभावलक्षणं प्राधान्यं एतदेव लौकिकमिति सूच्यते तच्च स्त्रीप्रत्यये प्रकृत्यर्थद्वारकमाश्रीय
ते स्वघोत्स्यार्थस्य स्त्रीत्वरूपलिंगविशेषस्य प्रकृत्यर्थं प्रति सर्वत्र प्रकारतयैव भासमानतया तन्मूलकस्य तस्य

कुत्रापि संभवाभावात् तदेतत्सर्वमभिप्रेत्याह । यः स्त्रीप्रत्यय इत्यादि । विषयसप्तमी स्वीकारादेव परिभाषाप्रयोजन
वत्ती अन्यथा द्वित्वस्यापि शास्त्रस्यानुपसर्जनस्त्रीप्रत्ययमात्रग्रहणबोधनः प्रसिद्ध्यभावात् तदर्थं न शक्यं स्पष्टमेव यत्तु
विषयसप्तमी स्वीकारे अनुपसर्जनेवदुपसर्जनांशेपि वाक्यवृत्त्यन्न सन्न्यायप्राप्तेन या नाद्दशावाक्यसाधुत्वापत्त्यन्यथानु
पपत्त्या स्वीकृतत्वेन तदंतविधिद्वयेन स्यादेव निवारी पगंध्यापुत्र इत्यत्र संप्रसारणमित्याहुः । तदसत् सत्त्वस्य रीपगं
ध्येव मनुष्य इत्यर्थे इञ्वत्प्रतिकृताविति विहितस्य कनो लुकि निष्पन्नस्य करीषगंध्याशब्दस्य पदशब्देन समासे
संप्रसारणसंभावत्वतया नादृशवाक्यस्य सार्थकत्वेन तदंतविधिद्वयापादकसामर्थ्यस्य दुर्वचत्वादित्यादिक् । अथ
गोस्त्रियोरिति सूत्रभाष्योदाहृते अतिराजकुमारिरित्यत्र ह्रस्वानुपपत्तिः गोस्त्रियोरित्यत्र हि शास्त्रीयमुप
सर्जनं कुमारीशब्दप्रकृतिकस्य स्त्रीप्रत्ययस्य स्त्रीत्वविशेषोपसर्जनत्वं तायां निर्विवादत्वात् परिभाषायाश्चेत्प्रयोजकत्वस्यानु
पसर्जनत्वस्याभावात्तदादिनियमवर्त्तनो विषयवाक्यमतिनियतविभक्तिकत्वेन स्त्रीयोपसर्जनं यद्राजकुमारीतित
त् स्त्रीप्रत्ययांतं यच्च स्त्रीप्रत्ययांतं कुमारीति तदुपसर्जनमिति स्त्रीप्रत्ययांत नाद्दशोपचारपदत्व समासरूपप्रा
ति पदिकत्वस्य ह्रस्वप्रवृत्तिप्रयोजकस्य तत्र दुर्वचत्वात् न च गोस्त्रियोरित्यत्रापि स्त्रीविशेषोपसर्जनमेवाश्रीय
ते न तन्नश्च कुंजेश्रीपुत्र इत्यत्र ह्रस्ववारणार्थप्रत्यासत्त्यायस्य समासस्य ह्रस्वप्रवृत्तिर्विषये तत्र अनुपसर्जनीर

लु त्रलुग्धेरित्यादौ तत्र तदंतांशो दुर्वारः नहि त्र्युग्नं पूर्वत्वं वानोधाः रसंभवि येन तदंतांशो निवर्त्येत अत आह । स्यतासी
लि परयोरित्यर्थ इति । निर्दिष्टपरिभाषया सप्तमीनिर्देशेषु पूर्वशब्दस्येवाध्याहारवत् स्मानावदिह परशब्दस्येवाध्या
हारः तस्याः खलु परिभाषायाः सप्तमीनिर्देशघटितशास्त्रेण विधीयमानं सप्तम्यंतार्थादव्यवहितस्येव पूर्वस्येवेति निय
मः प्रयोजनं स च प्रदेशेषु परशब्दाध्याहारेपि युज्यत एव अत एव तस्मिन्निति सूत्रे भाष्ये सप्तमीपंचम्युभयनिर्देशेषु
संदेह इति रूपणावसरे तास्यादिभ्यः परस्य लसार्वधातुकस्य लसार्वधातुके परतः तस्यादीनां वेत्यादिभ्युक्तिः स्वरसतः उ
भयथापि त्रिचपरशब्दाध्याहार एव न्यायः अन्यथा अनेन परिभाषाविषयीभूतायाः सप्तम्याः परसप्तमीत्वव्यवहारो
भाष्यवाराणदीनामनुपपन्नः स्यात् स्वादिष्वसर्वनामस्थान इत्यादावुपस्थित तदाधंशस्याकांक्षावशादवध्यासंज्ञित्वेनावधि
त्वेन च संबंधस्तत्रायः एतेन निर्दिष्टपरिभाषया पूर्वशब्दाध्याहारे त्रलुग्धेयपरयोरित्यर्थस्य फलविधयाभासमा
नत्वेपि शब्दत्वाभावेन पंचम्यां तार्थात् शरत्वेन शाब्दान्वये प्रवर्तमानस्य प्रकृतपरिभाषाप्रयोज्ये तदंतांशनिषेध
स्य प्रसक्त्ययोगात् त्रियोयं ग्रंथ इति परास्तं उपस्थितभागेरित्यादि तनुउपस्थापित तदाधंशस्य योग्यतावशात्
पंचम्यंतत्वमाश्रीयत इति भावः । इदमेवयुक्तं धातोरित्यस्य अव्यचोगौरवात् एवंच सुपि चेत्यादावपि परत्रा

ध्याहारे बाधकाभावेन प्रत्ययस्य । तदाधंशात्मकपंचम्यंतार्थात् रत्वेनाश्रयणमस्त्येव तत्र च प्रत्ययस्य निमित्तत्वे
नाश्रयणेयत् तदंतांशनिषेधः सोप्यस्याएव परिभाषायाः कोजीवारः निषेधप्रयोजनं तत्र प्रत्ययाश्रयणं परिभाषायां नि
मित्तत्वेन कार्यित्वेनैव सत्त्वनाग्रह इति परमार्थः न चैवं हलङ्याब्भ्य इत्यत्रापि ङ्याप्प्रत्ययगत परत्वस्यावध्याकांक्षाया
मुपस्थित तदाधंशस्यावधित्वेन योजनीयतया तदंतांशनिषेधे स्वीयतदादेः परत्वेङ्याप्तदंतात्सुतिसि विधा
नावध्यादेः परस्य स्तस्यसलोपः स्यात् अर्थात् अनुपसर्जनस्त्रीप्रत्यये तदादिनियमस्स्वात् बहुश्रेयसीत्यादौ सुलोपो
दुर्लभ इत्यत आह हल्ङ्याब्भ्य इति । अपेक्षायाः अभावादिति ङ्याप्प्रत्ययगत परत्वस्य वस्तुसत्वेपि शाब्द
तया शाब्दावध्याकांक्षास्फूर्त्ययोगादित्यर्थः सिद्धांते तु तदंतविधिद्वयाश्रयणाद्दोष इति स्पष्टं शब्दरत्नादौ यस्त
कस्यापि विशेष्यतामादाय तदंतविधिः स्त्रीयविधानावध्याध[illegible]यवकरणे नियम इत्यभिमानः अंगसूत्रस्त
त्र इति उपस्थित तदाधंशस्य प्रत्ययेन सामानाधिकरण्यासंभवात् वृत्तिस तदाधंशेनान्वये वैयधिकरण्याच्च पं
चम्यंततानस्येत्यपि बोध्यं अजर्तवेति । सप्तमीनिर्देशेषु परशब्दाध्याहार इति प्रकृतपरिभाषावशात् तदंतांश
निषेधाभ्युपगमादेवेत्यर्थः निर्देश इति । तदंतविधावेव शब्दे दीर्घेत्यादिनिबोध्यं प्रकृतनिर्देशस्य प्रकारां

तो यः स्त्रीप्रत्ययः तदंतस्य नाद्दत्रासमासरूपप्रातिपदिकस्य ह्रस्व इत्यर्थे लक्ष्यासंभवादनन्यतदंतविधिद्वयाश्रय
णेनोपसर्जनीभूतस्त्रीप्रत्ययांतांतसमासरूपप्रातिपदिकस्य ह्रस्व इत्यर्थस्तथास्य न्यायनयायुक्तएवाति राजकु
मारिरित्यत्र ह्रस्व इति वाच्यं राजकुमारीमिच्छन् आचरन्वा ब्राह्मणो राजकुरीत्यादावपि ह्रस्वापत्तेः तस्मादयुक्तं
गोस्त्रियोरित्यत्राणस्त्रीयमनुपसर्जनमात्स्थानु मिसाति राजकुमारिरित्यत्र दोषस्तदवस्थ एवेत्यत आह प्रत्या
सत्त्येति एवं च यस्य स्त्रीप्रत्ययांततेनत्रिघस्ताश्चितन्निरूपितोपसर्जनत्वाभाववान् यः स्त्रीप्रत्ययः तदंतोपस
र्जनांतप्रातिपदिकस्येत्यादिगोस्त्रियोरित्यस्यार्थः पर्यवस्यतीति भावः। अनुपसर्जनस्यमेवेति। स्त्रीप्रत्ययगतमि
तिशेषः अतएवेति। स्त्रीप्रत्ययगतानुपसर्जनत्वस्वीकारादेवेत्यर्थः असंभवादिति नहि समासशास्त्रीयप्रथ
मांतपदबोध्येसंवियत्वाक्यीयनियतविभक्तिकत्वं वा स्त्रीप्रत्ययमात्रस्य संभवतीति भावः ननु वासुदेववाचका
दवाराननुपुंयोगलक्षणेऽपि निष्पन्नेन हरिश्चावदन आदिसमासेन हिरित्यादौ न संभव इति चेन्नहि स्त्रीप्रत्ययसामा
न्येन तदसंभव इत्याशयः यद्वा अतएवेत्यस्य एवंविधपरिभाषांगीकारादेवेत्यर्थः अन्यथा स्त्रीप्रत्ययोऽनुपस
र्जनस्येसेन श्रूयात् तथा हि सति स्त्रीप्रत्ययग्रहणे अनुपसर्जनस्येत्यस्योपस्थितिरित्यर्थे ष्यङ इत्यादौ स्त्री

प्रत्यासत्तेर्यदुपसर्जनत्वं स्त्रीत्वोपसर्जनाभिन्नं तदंतस्य पूर्वपदस्य संप्रसारणमित्यर्थेन परमकारीषगंधीपुत्रस्या
दावभीष्टसिद्धिरिति कारीषगंध्यापुत्र इत्यादावनिष्टनिवृत्तये श्चवत्थैव तदादिनियमत्वनया प्रकृतपरिभाषाश्रयणं स्यादित्या
शयः। अत एव परमकारीषगंध्येव मनुष्यः परमकारीषगंध्या तस्य पुत्र इत्यर्थे परमकारीषगंध्यापुत्र इत्यत्र संप्रसा
रणाभावः तत्र ष्यङंतस्योपसर्जनत्वसत्वेन तदादिनियमप्रवृत्तेः पूर्वपदस्य ष्यङंतत्वाभावात्। अतिगोवधूयणीत्यत्र
वधूयणीशब्दस्य स्त्रीत्वोपसर्जनत्वाभावेन पूर्वनिपाताभावेपि गुणत्वं यचितत्वाल्लोके उक्तोपसर्जनत्वानपायादु
प्रवृत्त्यर्थद्वारत्वं स्त्रीप्रत्ययस्योपसर्जनत्वमादाय तदादिनियमप्रवृत्त्या स्त्रीप्रत्ययांतोपसर्जनांतोत्तरपदत्वाभावान्न गो
स्त्रियोरिति ह्रस्वाभावश्चेति सर्वं निर्दिष्टं केचित्तु स्त्री स्वयमेवात्रोपसर्जनं अनुपसर्जनमिति च प्रसज्यप्रतिषेधः
चरमनयत्रोभेदेन संबंधः स्त्रीप्रत्यये गृह्यमाणे तदादिनियमो न तदादावुपसर्जनत्वं निषेधो नेति परिभाषार्थः
अत एव गोस्त्रियोरिति सूत्रे भाष्ये अतिराजकुमारिरित्यादौ ह्रस्वसंरक्षणाय स्त्रीप्रत्ययेन नेति तदादिनियमनि
षेध एवारब्धो न तु तत्रोपसर्जनत्वप्रतिषेधः अन्यथा अतिगोवधूयणिरित्यत्र ह्रस्ववारणाय स्वोपि वक्तव्यः स्या
त्। अस्मन्मते तु कुमारीवधूयणीशब्दयोरविशेषादनुवृत्तिः एवं चातिगोवधूयणिरिति ह्रस्वो भवत्येव तथा परम

कारीषगंधेव मनुष्यः परमकारीषगंध्यायास्य पुत्र इत्यर्थे संप्रसारणेन परमकारीषगंधीपुत्र इत्येकविभक्त्यं कारीष
गंध्याशब्दस्य तत्रास्त्रीप्रत्ययोपसर्जनत्वाभावात् इत्थं च एकदेशिसमासत्वाख्यानं भाष्यमप्युपपद्यते अन्यथा
र्धपिप्पलीमित्यत्र इनिग्रहे एकदेशिसमासपक्षे ङीप उपसर्जनत्वान्नदादिनियमेन ह्रस्वप्रसङ्गेनार्धपिप्प
लीति भवति कर्मधारयाश्रयणेन तु व्याख्याने तु स्त्रीप्रत्ययस्यानुपसर्जनत्वान्नदादिनियमाभावेन ह्रस्वप्रसङ्गोऽर्ध स्य
पिप्पलिरिति भवतीति फलभेदेन व्याख्यानासंभवेनैतदनुपपत्तिः स्पष्टैव । अस्मन्मते तु पिप्पलीशब्दस्य पक्षद्वये
ऽप्यस्त्रीप्रत्ययोपसर्जनत्वाभावान्नदादिनियमनिषेधेन ह्रस्वो भवत्येवेति न कोऽपि दोषः अतिबहुश्रेयसीत्यत्र नास्माक
मपि ह्रस्वः श्रेयसीशब्दस्य तत्रास्त्रीप्रत्ययोपसर्जनत्वेन नदादिनियमात् प्रियादिबहुश्रेयसिरित्यत्र ह्रस्वो भवत्येव
प्रत्यासत्त्या स्त्रीप्रत्ययान्तत्वेन जिघृक्षितसमुदायनिष्ठसमाससंज्ञाप्रयुक्तोपसर्जनत्वाया एव ग्रहणात् परिभाषाविष
यत्वात् एवमप्यर्थकारीषगंधीपुत्र इत्यत्र संप्रसारणमपि निर्बाधमेवेत्याहुः ॥ सामान्यग्रहणे विशेषग्रहणे हावे
ति गोस्त्रियोरित्यादौ सामान्यग्रहणं ष्यङः संप्रसारणमित्यादौ विशेषग्रहणं ध्वनितं चेदनर्थकत्वं चेदिति तत्र हि समासग्रह
णं नियमार्थमित्युक्तं यदि हि स्त्रीप्रत्यये स्त्रीप्रत्ययग्रहणेपीयं परिभाषा स्यात्तर्हि राजकुमारीत्यत्र प्रत्ययान्तपर्यु

दासवञ्चानुपूर्वसूत्रेणाप्राप्तायाः प्रातिपदिकसंज्ञायाः प्रवृत्तिनियमसमासग्रहणस्य चरितार्थेन तदसंगतिरेवेति
भावः॥ अथ सत्यां परिभाषायां दृष्टागौरीत्यादौ समदृश्याङ्डुत्सर्गिकैकवचनसंपन्नेङ्ज्याब्ग्रहणस्यावश्यकत्वात्तन्न
प्रत्याख्यानपरङ्ज्यासूत्रस्थं भाष्यं विरुध्येतेन च तत्र सुबुत्पत्तेरनदन्तत्वाहल्ङ्यादिलोपेन विशेषाभावश्चेति वाच्यं
दृष्टागौरीत्यादिसमुदायस्यैकपदे प्राग्दृष्टागौरीदेवदत्त इत्यादावप्येवं तरमिति स्वरापत्तेरिति चेन्न ङ्याब्ग्रह
णस्योपन्यासार्थतोपवर्णनपरभाष्यप्रामाण्येन प्रातिपदिकसाहचर्येण च पृथगर्थोपस्थापकविभक्त्यन्तानव
यवकस्यैव ङ्याब्ग्रहणेन तत्र ग्रहणेनादोषात् अत एव नपिविभक्तिसत्त्वे नैकपदत्वाभावात् सूत्रस्य दुर्लभत्वाच्चेतत्र्या
स्पष्टं अत्रेदं अवधेयं यदि च ष्यङः संप्रसारणमित्यत्र योनुपसर्जनस्येत्येवास्तु मास्तु परिभाषा तस्या सत्त्वे पूर्वपदभि
रूपितोपसर्जनत्वाभाववान्न्यायः ष्यङन्तं तदन्तस्य पूर्वपदस्य संप्रसारणमिति तदर्थः तेन परमकारीषगन्धीपुत्र
स्यत्र संप्रसारणमिति कारीषगन्ध्यापुत्र इत्यत्र तदभावश्च सिद्धः अत्रोपसर्जनत्वस्य स्त्रीत्वविशिष्टस्य स्त्रीप्रत्ययान्तगतस्य
विवक्षणाल्लुबन्तकारीषगन्ध्याशब्दमादाय समासेपि संप्रसारणं भवत्येव ष्यङन्तस्य लुबन्तादाननिरीक्षितेन तस्य
तन्निरूपितोपसर्जनत्वायोगात् न चानि राजकुमारीरित्यत्र ह्रस्वानापत्तिः निरूपसर्जनस्य राजकुमारीत्यस्य स्त्री

प्रत्ययांतत्वाभावात् प्रत्ययग्रहणपरिभाषालब्धतदंतांशस्योपसर्जनविशेष्यत्वेन पुनस्तदंतविधौ स्त्रीप्रत्य
यांतांतं यदुपसर्जनं तदंतस्य प्रातिपदिकस्य ह्रस्व इत्यर्थे नादोषात् घरूपेत्यत्र तदंतविधिद्वयमभीष्टमेव।
परिभाषाश्रयणेपि बहुश्रेयसितरेत्यादौ ह्रस्वसाधनाय स्त्रीभ्यो ढगिसूत्रे तु स्त्रीवाचकशब्दग्रहणं ढग्विलो
पश्त्वस्यारंभात् अतो न कोपि दोष इत्युच्यते तर्हि इको ह्रस्व इत्यनेन राजकुमारीपुत्र इत्यत्र पूर्वपदस्य
व्यंजनभिन्नत्वेन प्राप्तस्य ह्रस्वस्य वारणार्थमियं परिभाषा न हि तत्र ङ्यंतांतमेव पूर्वपदमित्येकं वले च व्यप
देशाद्वङ्गवरणीवतुं युक्तं विशेष्यांतरासंनिधानेन द्वितीयतदंतविधेर्दुर्लभत्वात् किंच स्त्रीभ्यो ढगिसू
त्रे स्त्रीप्रत्ययस्यैव ग्रहणं ऋष्यादिषु कद्रुशब्दपाठात् पितृष्वसृमातृष्वसृशब्दाभ्यां ढग्विलोप इत्यनेन
प्रसंयोज्ञाप्यत इत्येव युक्तं अत एव रनोरपत्यस्य संदानव इत्यस्यासिद्धिः एवं च राजकुमारेय इत्यादौ कु
सिध्यर्थमपीयं परिभाषा न हि तत्र तदंतविधिद्वयमाश्रियतुं शक्यते यत्र यो यश्च स्यादविवक्ष्यमाणवि
शेष्यसद्भावे सत्व स्वरूपविशेष्याध्याहारस्यायुक्तत्वात् युवजान्यंत यो ण्मादिभ्योपि त्ववूप संगाच्च अपि
च गोस्त्रियोरित्यत्र तदंतविधिद्वयाश्रयणे गोशब्दांतेपि तदापत्तौ सोभनागोः सुगोः तामनि रूपं तो

उगितिसुगोरित्यत्रापिह्रस्वप्रसंगः तस्मादत्रपक्षीयं परिभाषा परं तु लौकिकमेवात्रोपसर्जनत्वं प्रकृते इति सूत्र
स्थभाष्यस्वरसात् तत्र हि यो धातूपसर्जनं भवत्येषा परिभाषा तत्रोपतिष्ठत इति प्रकृतपरिभाषार्थो वर्णितः
अत्र पक्षे एकदेशिसमासप्रत्याख्यानस्यारंभसामानफलकत्वसंपन्नमर्थमस्यैर्थवारीषगंध्यापुत्र इत्यादि
नामनभिधानमेव शरणमिति सुधीभिर्विभाव्यमित्याहुः ॥ ॥ संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं ना
स्ति ॥ ॥ इयं स्त्रीप्रत्यये चेत्यतः प्रागेव निरूपयितुमुचिता तदा [illegible] परिभाषाद्वयमध्ये निरूप
णे संगत्यभावात् तरबंतादेः संज्ञा स्यादिति एवं च घरूपेत्यत्र घशब्देन प्रत्ययांतस्यैवोपस्थानात् प्रत्ययग्रहण
भावेन तल्लिंगायामुत्तरपदाधिकारपरिभाषाया प्रवर्त्तेः कुमारी ब्राह्मणितरेत्यत्र ह्रस्वत्वापत्तिदुर्वारेत्यत्र तामर्थं
अंतग्रहणमस्या ज्ञापकमिति न च प्रत्ययग्रहणपरिभाषया तदंतलाभे पृथक्श्रूयमाण तदंतलाभे ध्यांतग्रहण
मिति वाच्यं तथा सति तनूसवुध्योरित्यस्य वैयर्थ्यापत्तेः धर्मिग्राहकमानाज्जात्यादेरस्य प्रत्ययस्य संज्ञित्वसंभा
व्यनेनेन प्रत्ययेन तदंतग्रहणं नेति परिभाषार्थः ॥ तेन द्रव्यादिद्विवचनमित्यत्र वर्णग्रहणे तदंतविधानवदंतद्वि
वचनस्य प्रगृह्यत्वमव्याहतं ॥ तथा च न तेन इति सूत्रे तदंतत्वलाभस्त्वर्थवद्ग्रहणानुवृत्तेः तस्य च लौकिकार्थवत्त्वात्

कृमस्तुम्बोश्च तयोस्तादन्तार्थवत्तासंभावादिति स्पष्टमन्यत्र उ तरज्तमयोस्तु सर्वनामसंज्ञायां फलाभावादेव
तदंतलाभः न च संज्ञाविधौ तदंतविधिनिषेधेपि प्रादेशिकेपि न तदंतविधिना सर्वनामसंज्ञा प्रवृत्तार्थेनि
भिर्वाहरिति वाच्यं वर्णाश्रमेतराणामित्यादौ सुडादिवारणार्थं आमि सर्वनाम्नः सुडित्यादेरवर्णात्तादंतासरस्य
सर्वनाम्नो विहितस्येत्यस्यार्थकृतायावत्त्वपक्षे नागस्येत्यस्य सर्वनाम्नां शेषविशेष्यत्वाभावादेव आदेशोऽपि तदंतवि
धेर्दुर्लभत्वात् एवं वतुडत्योरपि संख्यासंज्ञायां फलाभावादेव तदंतताया लाभः न च द्विकसंख्ये संज्ञायामित्यत्र सम
र्थविशेषणत्वेन तदंतविधौ फलसंभव इति वाच्यं समासप्रत्ययविधाविति तत्र तदंतविधेः प्रतिषेधात् सा
मर्थ्यमित्यत्र च महासंज्ञाकरणबलादेव तदंतताया लाभ इति स्पष्टमन्यत्र अत्रेदं बोध्यं परिभाषायां संज्ञावि
धाविति संबंधसामान्यषष्ठ्या समासः तेनश्च संज्ञासंबंधिविधानाधिकरणं प्रदेशोपीति तत्रापि निषेधः भ
वत एव परिभाषायाः साफल्यं अन्यथा संज्ञासूत्रे निषेधेपि प्रादेशिके न तदंतविना विशिष्टकार्यप्रवृत्तेर्दुर्वारत
या तदानर्थक्यं स्पष्टमेव तदुक्तं सुप्तिङंतमिति सूत्रे शेखरे एतत्सामर्थ्यादेव प्रदेशेष्वपि न तदंतविधिरिति
न चैतत्परिभाषाया अभावे संज्ञासूत्रीय एव प्रादेशिकेषु ग्रहीतव्य इति तदंतविधिद्वयेन कुमारीपरमब्राह्मणि

तरेत्यत्र ह्रस्वप्रसंगः सत्यां तु परिभाषायामादेशत्वात् एवं कस्तदंतविधिरिति नत्र ह्रस्वप्रवृत्तिः एवं च फलवैचि
त्र्यात् कथं सामर्थ्यस्पष्टं चेदं कैयटइति वाच्यं इच्छिकापरिरचितमुदकधिवासइत्यादौ ह्रस्वो दादेत्रादिवारणार्थेन
गिलगिलेचेतिज्ञापकसिद्धेन उत्तरपदविशेष्यकप्रातिपदिकीयतदंतविधिनिषेधेन परिभाषाया अभावे घरूपेत्य
त्र घांतप्रातिपदिकोपस्थापकेन घशब्देनोत्तरपदविशेष्यकद्वितीयतदंतविधेर्दुर्लभयत्वात् फलविशेषस्य दुरु
पपादत्वात् न च प्रगृह्यसंज्ञाविषये ईदूदेद्द्विवचनमित्यत्र तदंतविध्यभावसंपादनेन परिभाषायाः साफल्यं प्रगृ
ह्यपदस्य प्रत्ययाप्रत्ययसाधारणतया तत्प्रदेशेषु प्रत्ययग्रहणपरिभाषाप्रवृत्तेस्तदंतताशस्य दुर्लभत्वादि
ति वाच्यं इदाधंतंयद्द्विवचनं तदंतं प्रगृह्यमित्यर्थेन सत्यपि तदंतविधौ कुमार्योरगारं कुमार्यगारं वध्वोरगारं व
ध्वगारमित्यत्र प्रगृह्यत्वाप्रसंगात् परिभाषायास्तत्र फलाभावादप्रवृत्तिरेवेत्याशयात् न चैवमपि तु त्ववतीति
ष्टेत्यत्र तदंतताशनिषेधः फलं तत्प्रदेशे क्लिशः क्त्वानिष्ठयोरित्यादौ प्रत्ययग्रहणे चापंचम्या इत्यनया तदंतताशनि
षेधसंभवात् न च निष्ठापदेनैव क्तक्तवत्वोर्निर्विधानेन संज्ञाप्रवृत्तेः प्राक् प्रत्ययत्वज्ञानाभावात्तयोः प्रत्यय
त्वतदाप्त्यान्यतरधर्मप्रकारकोपस्थितिजनकत्वासंभवेन प्रत्ययग्रहणपरिभाषाप्रवृत्तेस्तदंतताशस्य दुर्लभ
तया फलाभावात् स्वोपस्थापकलिंगाभावादप्रवृत्तिरेव तत्रास्याः परिभाषाया इति वाच्यं द्विवचनग्रहणेन

तदंतग्रहणाभावस्यप्रकृतपरिभाषाविषयत्वप्रतिपादनपरग्रंथसंज्ञाप्रकरणस्थलक्षण भाष्यप्रामाण्यात्तु तदा
भ्यामित्यत्र तदंतग्रहणाभावस्य प्रत्ययग्रहणे चापंचम्याइत्येतत्परिभाषाविषयत्वोपपादनपरयेन विधिस्त
त्र स्थ भाष्यप्रामाण्याच्च भावप्रत्ययसंज्ञाकार्यत्वविशिष्टतत्तदानुपूर्वीप्रकारेणैव कृत्तद्धितादीनां स्वार्थोपस्थाप
कत्वमवश्यमभ्युपेयं अन्यथा निष्कुष्ठोपमानादन्यतरस्यामित्यादौ संबध्यमानपूर्वपदादिरूपविशेष्यमहिम्ना
तदंतोऽशलाभेपि तदाधंशस्य दुर्लभतया सुरापीनं मुखं यस्य समर्थे सुरापीतमुखमित्यादौ विशिष्टस्यपूर्वपदस्य
निष्ठांतत्वाभावाद्योत्तरपदाद्युदात्तत्वादिरूपकार्यप्रसंगः तत्पदश्च प्रकृतेपि प्रत्ययग्रहणपरिभाषया प्राप्तं तदं
तोऽशस्य दुर्वारतया तन्निवारणाय अस्याः परिभाषायाः आवश्यकत्वात् किंच कृत्तिङित्यत्रापि तदंतांशनिषेधो
ऽस्याः फलं तथ्वदेशे ह्रस्वस्यपिति कृतीत्यादौ प्रत्ययग्रहणे चापंचम्याइति तदंतांशनिषेधसंभवादिति चेत्सत्संकल्प
कल्पपक्षे तथ्वदेशे कृत्वाक्यतापन्नसंज्ञाशास्त्राणां वाक्यैकवाक्यतया पृथगेव स्वस्वसंज्ञाप्रतिपादकत्वात् सं
ज्ञावाक्येष्वेकवाक्यतापन्नात्प्रकृतपरिभाषा तदंतांशं निवारयति विधिवाक्येपि यदि प्रकारांतरेण निवारितत
दंतांशः प्राप्नोति तर्हि तमपि वारयतीत्याशयो विभावनीयः ननु प्रदेशे तदंतनिषेधस्य फलाभावः घरूपत्वत्रोक्त

रपदाधिकारपरिभाषयैव नदंतांतत्वनिषेधसंभवात् नचोत्तरपदस्य विशेष्यतामादाय मातरत्व नदंतांतत्वस्य नि
षिध्यते ननु शब्दस्वरूपविशेष्याध्याहारमूलक इतिवाच्यं तथासति तत्परिभाषायानर्थक्यप्रसंगात् ज्ञापिताया
मपि लेख्यग्रहणस्य चरितार्थ्याभावेन ज्ञापकतापरभाष्यविरोधापत्तेश्च नस्सस्यत्पादौतु प्रत्ययग्रहणे चापंचम्या
इत्यनयैव नदंतांतत्वनिषेध इति चेन्नहि आहु नमस्यपित्र्यासु इत्युपरस्मैरे प्रभृदाने भिन्नेत्वे सेस्सनयोरुत्तम
परस्मैपदसंज्ञाभ्यां नदंतांतत्वनिषेधः प्रकृतपरिभाषाबोध्यप्रदेशनिषेधस्य फलं नन्वहि विकरणव्यवधाने
पि प्रवृत्तत्वयधातोरित्यस्य विहितपंचम्यंततया प्रत्ययग्रहणे चापंचम्या इत्यस्याप्रवृत्तेः यथापिपिठाधाति
देशबलान् नदंतांतत्वनिषेधः सुवचः तथापि नाहदशनिर्देशस्य साक्षान्नदंतांतत्वनिषेधकत्वकल्पनामपेक्ष्यो

कृ. क्तार्थस्योपोद्बलकत्वकल्पनयैव ज्यायसीत्याहुः केचित्तु संज्ञाविधायिनि कर्मषष्ठ्यंतेनैव समासः तत्तश्च सं
ज्ञा कर्मकविधानाधिकरणे संज्ञा सज्ञास्त्वेरवनिषेधो नतु प्रतिदे अनत्व गतिकारकोपपदात् कृत्स्वरत्वादौ नदंतां
तत्वलाभः न चानया शब्दस्वरूपविशेष्याध्याहारमूलकत्वं नदंतांतत्वनिषिध्यते ननु पाविशेष्यनिबंधन इति
हृदयस्येति सूत्रस्थकैय्यटोक्तरीत्या निर्वाह इति वाच्यं एवमपि निष्ठेति पूर्वनिपातविधायके विशेष्यांतरसां

निष्पाभावेन शब्दस्वरूपविशेष्याध्याहारमूलकतया संपादनीयस्य तदंतांशस्य निबाधापत्तेः नच तत्रोपसर्जनं
पूर्वमित्यत्र उपसर्जनपदानुवृत्तेरुपाधीयत एव विशेष्यमिति वाच्यं एवमपि निष्ठा चक्षुसृजनादिस्तत्र शब्दस्वरूप
विशेष्याध्याहारमूलकस्य तदंतांशस्याभीष्टस्य दौर्लभ्यापत्तेः तत्र संज्ञायामित्यनुवर्त्तमानस्य प्रथमया विप
रिणामाद्विशेष्यत्वमित्युक्तौ च क्लेशः अनादिस्सत्स्य प्रसज्यप्रतिषेधपरतया प्रत्ययग्रहणे चापंचम्या इत्यस्या प्र
वृत्तेः । तथाच रदाभ्यामित्यत्र प्रत्ययग्रहणे चापंचम्या इत्यनया निष्ठांशे तदंतांशनिवर्त्तनपरं येन विधिस्तत्र
स्थं भाष्यमप्युपपन्नमिति हृदयं ॥ ॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं ॥ ॥ समासेन स्यादिति ॥
शेषपूरणमिति सूत्रे तेनाहारात्रावयववेत्यत्र तु नेतिवर्त्तनेः समर्थग्रहणस्य विशेष्यतामादाय द्वितीयतदंतविधि
स्तु न भवति समासप्रत्ययविधौ तदंतविधिप्रतिषेधादिति भावः अस्यां ज्ञापकमिति । एकदेशानुमत्यावचनरूप
णत्वांतरपरिगृहीतायाः संपूर्णपरिभाषाया इहाप्यनुमितिः कृत्यन्तरस्य तत्तासंयं एतेन क्वारवांशेपि ज्ञा
पकस्याभेपि न क्षतिः निघातएवेति । एवं च ज्ञापितायामपि चारितार्थ्याभावात्तदंशापकं युक्तमित्याशंक्याभि
प्रायः पदांतरस्याभावेन चेति चोद्ये तौ न तु समुच्चयेनेत्यत आह पदांतरस्याभावस्तत्र पादादिस्थत्वमिति तद

र्थः गतिर्गतावित्यत्र त्वनुदात्तं सर्वमपादादावित्येवानुवर्तनेन तु पदादित्विति तस्य हि कुत्सने च सुपीमतः प्रागेव
निवृत्तिरित्यत्रान्यत्र स्पष्टं नन्वेवमपि चारितार्थ्यं दुर्निरूपमेव ज्ञापनोचरासु छृतशब्दस्येव कृगतया तन्विसपिता
आनंतर्यस्याभिशब्देपि संभवादत आह तत्सामर्थ्यादिति एवं चानेकगतिसमभिव्याहारे व्यवहितस्यानंतर
ग्रहणात्सन्निहितस्य पूर्वपदाधिकारबलाच्च प्रकृतत्वात्स्याविषयत्वादेकगतिसमभिव्याहृतं प्रकृतं प्रहृतमित्यादि साध
स्योदाहरणं न चाहि समासस्वरापवादभूतमव्ययपूर्वपदप्रकृतिस्वरं बाधित्वा मासस्य तत्स्वरस्य थाथा
दिस्वरस्य च बाधकोयं सति शिष्टो गतिस्वर इति सिद्धांतः न च अभ्युद्धृतमित्यादौ व्यवहितनिवृत्तिरेव यथानंत
रग्रहणस्य फलं स्यात्तदा विनापरिभाषां तादृशफलाप्रसिद्धेरस्तु ज्ञापकता प्रकृते च वाक्यभेदेन सामर्थ्यात्पू
र्वपदाधिकारसंबंधविरहितेन पुनर्विधानादनंतरस्यारभ्यादेरस्थाथादिस्वरं बाधित्वा पूर्वपदाधिकारादप्राप्त
स्य गतिस्वरस्य प्रापकत्वादनंतरग्रहणं सफलमिति कथं ज्ञापकत्वं न चास्यामवस्थायां तद्ग्रहणपरिभाषाया
अभावात् उद्धृतशब्दस्य कृत्त्वाभावेन गतेः कारकाद्वा उपपदाद्वा पूर्वपदात्परे कृत्प्रत्ययांते उत्तरपदे प्रकृतिभा

नस्यथाथादिप्रयुक्तांतोदात्तस्य प्रकृतेऽप्रसक्त्यभावात्कथं तद्बाधकगतिस्वरविधानेनानंतरग्रहणस्य साफ
ल्यमिति वाच्यं भाष्यसंमतपूर्वाभावेन थाथादिसूत्रे पूर्वपदाधिकारसंबंधानभ्युपगमेनादोषात् तस्मादयु
क्तमेवेदं ज्ञापकमित्याशयेनाशंकते। नचेति। गतौ स्त्वनुवर्तते ति। सोपमानात्कृदुत्तरः कृदिति वर्तते पूर्वपदाधि
कारे एवेह संबध्यते न तूत्तरपदाधिकारः योग्यताविरहात् ततश्च कारकात्पूर्वपदात्परो यो गतिस्तत्परं
तांतमंतोदात्तमिति तदर्थः थाथादिसूत्रेणैव सिद्धे नियमार्थमिदमिह तावत्कारकाद्देवेत्यादि। कृत्स्व
रेणेति न त्वस्यामवस्थायामुप्रतिशब्दस्य कृदंतत्वाभावात्कृदंतत्वप्रयुक्तगतिस्वरस्य वक्तुमशक्य
त्वात् कथमुक्त्वा उदात्तत्वसिद्धिः। यत्तु गतिकारकोपपदात्तत्र तदंतविधिद्वयाश्रयणेन कृदंतमुत्तर
पदं प्रकृतिस्वरमित्यर्थादिह न दोषइति तदयुक्तं तथा सति देवदत्तकुस्त्वयेत्यादौ कारकपूर्वपदसमा
से कृदंतत्वप्रयुक्तेन प्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वप्रसंगात्। कुस्त्वये शब्दे हि तत्पुरुषे तु स्वार्थे इत्या
दिना कुशब्दोदात्तस्वरसिद्धिः। समासांतोदात्तत्वमिष्यतइति चेन्नहि ज्ञापकपरभाष्यग्रामा

ण्यादीर्घत्रोषु कारकषष्ठ्या समासस्यानभिधानमिति मन्युदेवादेवादयः केचित्तु ज्ञापितायां परिभाषायामुत्त
रशब्दस्यानया परिभाषया ग्रहणं चात् थाथादिस्वरेणांतोदात्तत्वप्रसंगः इष्यते हि तंत्रोदरवोदात्तत्वं तस्मात्
र्वपदग्रहणं बाधनेनाकृते गतिकारकोपपदस्य गतेरुदात्तत्वप्रवृत्ति प्रयोजनकत्वमेवानंतरग्रहणस्येति युक्तं त
तु व्यवहितनिवृत्तिफलकत्वेन परिभाषाज्ञापकत्वमित्याशंकाभिप्रायः सत्यामपि परिभाषायां थाथादिस्वराप्र
वृत्तिप्रयोजकस्य नियमस्य सुवचत्वात् गतिस्वरेणाद्युदात्तस्यापि तच्छब्दस्य कृदंतत्वात् गतिकारकोपपदादिति कृ
त्तरपदप्रकृतिस्वरेणोदरवोदात्तसिद्धेर्न लक्ष्यासिद्धिप्रयुक्तो दोषः परं तु तत्र ग्रंथतात्पर्यं यद्वा ज्ञापकत्वापत्तेः
कृतराशि ज्ञापकत्वं तत्रास्वभावात् वाचितिं कृतस्यैव कृदंतत्वानुमति न्यायस्यैव वा स्वीकर्तव्यत्वेन लक्ष्यानुरोधात् तत्कृति
क्येवेष्टिविशिष्टपरिभाषास्वीकृत्य इह तावदनंतरग्रहणं तदभ्युच्चयमित्यादौ अनेकगतिकेषु थाथादिस्वरबाध
नार्थमस्तु मास्तु परिभाषाज्ञापनार्थमित्याशयो मात्र शंकाबीजं उपदर्शितस्थले थाथादिस्वरनिवृत्तिपूर्वकृत्गतु
दात्तत्वस्य अन्यथासिद्धत्वात् व्यवहितनिवृत्तिरेवानंतरग्रहणस्यासाधारणं फलं न च विना परिभाषां न संभ

भवतीति सुस्थं ज्ञापकत्वमित्याशयः समाधानबीजं । तदंतविधिद्वयाश्रयणे हि तुल्ययुक्त्या गतिरनंतर इत्यत्रा
पि तथापत्तावभ्युदयनिर्देशोपि नैव परिभाषांशुभे स्वरवारणार्थमनंतरग्रहणस्यावश्यकत्वात् ज्ञापकत्वोपवर्ण
नमसंबद्धमेव स्यात् ज्ञापकपरभाष्यप्रामाण्यात् गतिरनंतर इत्यत्र तदंताश्रयणमिति तु न संमतं संबंधं चेद
वदन्त्वत्र स्वविरिंसाद्गवपि व्याप्तस्य कृदुत्तरपदप्रकृतिस्वरस्यानभिधानेन वारणमपि सहृदयैर्दयानामुद्धेय
रमिति सुधीभिर्विभावनीयमित्याहुः । तत्त्वदेवं माल्लोऽप्यव्यवहितत्वनिबंधनस्वार्थकत्वेनैव साधुत्वमनंतरग्रण
हस्य न त्वर्थे समुपसंहरति । ज्ञापकमेवेति । यत्तु अहीनवाचिनि समासे क्तांतोत्तरपदे द्वितीयांतं प्रकृत्यर्थकत्वा
हीने द्वितीयेत्यत्र मनुपसर्ग इति वर्तते व्यभिनिवर्तितत्वमेव मैवं तस्यां परिभाषायां ज्ञापकत्वमित्याशयो न चे
सादि ग्रंथप्रवृत्तिर्हेतुरिति । तदसत् ज्ञापकत्वं तरसिद्धस्यार्थस्य पुनर्ज्ञापकत्वेन साधनस्यास्वारसिकत्वात्
वाचिनि कृत्वेन तदंगीकार तात्पर्यकत्वेऽनुमंत्रां तराभ्युपगतस्यार्थस्य लक्ष्यानुरोधेनात्र शास्त्रे स्वीकारात् ज्ञाप
कत्वेन तत्स्वीकारो न्याय्य इति वक्तुं युक्तत्वादिति दिक् । परिभाषायामपि शब्देन गतिगीकारकसमभिव्याहृतस्य केवल
स्य प्रत्ययग्रहणपरिभाषाबाध्यस्य ग्रहणमिति केषांचिद्व्याख्यानं खंडयति । तद्विशिष्टस्यैवेति । यस्य गतेः

कारकस्य चानिमित्तोद्देश्यता च न तद्रूपेण ग्रहणं पुनः सामर्थ्यादेव कृदन्तत्वेन न ग्रहणं यथा गतिकारकोपपदात्कृद्ग
ति रनंतर इत्यादौ तदन्तविधिः गतिकारकसमभिव्याहारविशिष्टस्यैव ग्रहणमिति तदर्थः परत्वादिति भावः को
शाह्नीत्यादौ स्त्रीप्रत्यये तदादिनियमनिषेधेन ङीत्रा ह्युदः प्रसक्तस्य णचः स्त्रियामित्यस्य वारणेनास्याः परि
भाषायाः साफल्यं विरोधोपि परिभाषाणां नियामकत्वादस्यैवास्यान्याय्यः परत्वादित्यस्योत्कृष्टत्वादपवादत्वादित्यर्थः
णचः स्त्रियामञ् इत्यत्र स्त्रीप्रत्यये चानुपसर्जने इत्यनेन तदादिनियमनिषेधेपि प्रत्ययग्रहणपरिभाषा अत्र
नियोग्यता मात्रस्य दुर्वारत्वेन तदप्रसिद्ध्योग्यं चारितार्थ्याभावमूलकत्वस्य तत्रक्तौ ङि न्यायस्य सत्त्वाच्च त्वादिति
केचित् उक्तव्याख्याने फलमाह अतएवेति गतिकारकसमभिव्याहारे केवलस्य कृदन्तत्वेन ग्रहणाभावादेवेत्य
र्थः इदमिति केवलस्य ग्रहणाभावरूपमित्यर्थः समासेनञ्पूर्वे त्यादि नञ्रहितत्वापत्ति कृतमादौ त्वक्त्वावा
रणाय नञ्भिन्नपूर्वपदकस्य ल्यपं नोत्तरपदकस्य समासस्यावयवो यः क्त्वा तस्य ल्यबित्यर्थः प्रत्येकं सादोषक
न परिभाषया विशिष्टस्यैव क्त्वान्तत्वेन ल्यबभावमात्रांश अनञ्पूर्व इत्यनेन तन्त्रास्याः परिभाषायाः अप्रवृ

र्ग्रापिणा कैय्यटे च प्रकृतपरिभाषाप्रवृत्तौ हि समासस्यैव कृदंतत्वात् तदंतस्य समासस्य तत्र भिन्नपूर्वपदक
स्यैवार्थसंपद्येत नत्वत्र योगे गतिकारकाभ्यामितिरित् चात् पूर्वपदकस्य कृदंतसमासस्यासिध्यापत्त्यर्थम
नत्र पूर्वग्रहणमतः परिभाषाया अप्रवृत्तौ ज्ञापकमित्याशयो भाष्यकारस्य वर्णितः एवं च गतिकारकसमभि
व्याहारे केवलस्य कृदंतत्वेन। न ग्रहणाभावस्य स्पष्टं भाष्यकैयटाभ्यामभिहितत्वमिति भावः। नन्वेवं देवदत्तेनकृत
मित्यादौ कारकसमभिव्याहृतस्य केवलस्य कृतशब्दस्य कृदंतत्वाभावात् प्रातिपदिकत्वानापत्तिः। तथा
मूलकेनोपदंशमित्यत्र केवलस्योपदंशमिसस्य कृदंतत्वाभावात् कृन्मेजंत इत्यव्ययत्वमपि न स्यात् स
स्यंधर्मिग्राहकसाजात्यात् परिभाषायाः समासघटकगतिकारकमात्रविषयत्वाभ्युपगमाददोषः किंच
धर्मिग्राहकसाजात्यादेवास्याः कृन्मात्रविषयत्वमपि तद्वाहर्यिदं चेति। अनुपसर्जनादित्यादि। तत्र हि भा
ब्ये अनुपसर्जनाधिकारस्यापि तदंतविधेरुदाहरणमनेकुंभकारी सत्र प्रकृतपरिभाषया संघातस्यैवाऽ
पंतत्वात् ङीपोऽन्यथासिद्धिरित्याशंक्य कृद्ग्रहणपरसूत्रे न चेदं कृद्ग्रहणं कृदप्ययमणूनधिनोपीन्यु

त्यासमाहितं तेन ञ्जिनित्यादिर्नित्यमित्यादावस्याः परिभाषाया अप्रवृत्त्या डुनिर्हरिरित्यादौ विशिष्टस्य
नाधुदात्तत्वं अत्रेदं बोध्यं गतिकारकपूर्वस्येत्यत्रावधारणपूर्वपदो बहुव्रीहिः तेन यत्र गतिकारकादन्यत्
पदं मध्ये प्रविशति तत्र कृदंतस्य तेन विशिष्टस्य ग्रहणं तेन देवदत्तसुंदरकृतिरित्यत्र कृत्तस्य षष्ठ्यासमासेपि
कारणत्वनीयां तद्योगे हलेन देवदत्तसुंदरकृतिरिति वाक्यमेव न तु तत्र कर्तृकरणे कृता बहुलमिति समा
सः गतिकारककृतिरिति पदांतरघटितत्वेन देवदत्ताधवपवसंघातस्य तत्र कृदंतत्वाभावादिति स्पष्टमा
कारे। किंचित्रिषु विशेषणानामपि नात्र कारकत्वेन ग्रहणमिति समासनञ्पूर्वसूत्रे भाष्यकैयटयोः
तेन परशुद्धिधाकरणमित्यत्र करणत्वनीयां तेन न समासः इति तत्पुरुषे तुल्यार्थ इत्यस्याप्रसक्तिरित्या
दः॥ ॥ पदांगाधिकारे तस्य च तदंतस्य च॥ ॥ तदंतविधिप्रस्तावोत्र संदर्भः। येन विधिरित
स्यायं प्रपंच इति तत्र पदांगाधिकारयोः गृह्यमाणं प्रति विशेष्यत्वमेवेत्यत्र तात्पर्यग्राहकेयं परिभाषेति
न तं अत एव बहुतरपदस्येति परमहाविन्यादौ दीर्घस्य इत्त्वादेवेत्यर्थः उकारपदाधिकार इति। अत्र

चोत्तरपदाकांक्षितमध्याहारलब्धं पूर्वपदान्तमवं विष्यमादायैव तदन्तविधिः । नैतु उत्तरपदमादाय तद्विशेष
कत्वमिति पाचिकतदन्तविधिर्ग्लूचिकेचेति ज्ञापकं तुनिनिषेधरिति भाष्योक्तं नविस्मर्तव्यं ततदन्तग्रहणमिति एवं
च ताहशेषु पूर्वपदस्याध्याहार एव न तु ल्यप्ते अध्याहृतस्यवा तस्य रक्ष्यमाणं प्रति विशेष्यताभाव इति
बोध्यं ॥ ॥ व्यपदेशिवदेकस्मिन् ॥ ॥ तदंशाशाव्याप्तिनिवारकं सूत्रमत्रेतत्परिभाषानिरूपणेवा
रणमिति सूचयन्नाह नन्वेवमिति । ध्यित्र इ न स्यादिति । ननु पूर्वपरिभाषायां तस्य चेति पाठेन स्वस्या
पिग्रहणादित्र सिद्धः नच प्रकृतपरिभाषालब्धार्थानुवाद एव तत्र तस्य चेत्यंशोन तत्पूर्वः स्वशब्दानु
वृत्तिसाध्य इति वाच्यं तथा सति व्यपदेशिवद्भावोपि निपदिकेनेति निषेधविषये राणीति सूत्रेण विधीय
मानस्य णः केवै राणीशब्दादप्रवृत्तिप्रसंगात् तस्मादिदमयुक्तमिति चेन्न धर्मिग्रहकसाजात्यात्तादृश
निषेधस्य सूत्रोपात्तांत्तादिशब्दविषयकतया वक्ष्यमाणतया राणीत्यत्र तदप्रवृत्त्या व्यपदेशिवद्भावेन
वैरोणइस स्यापि सुसाध्यत्वात् पूर्वपरिभाषास्थ तस्य चेत्यंशो निष्फल एवेत्याशयात् । निमित्तसङ्ग

ल

ॐ

वादिति। एतच्चाक्षेपलब्धं व्यवहारे व्यवच्छेद्यत्वमेतावच्छेदस्य हेतुतया विशिष्टव्यवहारहेतोर्विशेष
णस्य सत्वादिति तदर्थः। अदेपा शब्दविवरणं व्यवहार इति विशिष्ट इति व्यवहारो मुख्योपस्येत्यर्थः
मुख्यत्वं च आरोपविषयतातिरिक्तत्वं अतिदेशविषयं निरूपयति यत्त्वित्यादि अविद्यमानमपदेशाद
तिबहुव्रीहिः इदं स्वरूपकथनं [illegible] तदभावविद्देशोप्यकुतस्यावयवार्थे रेवातिदेशापदार्थत्वात् अस
हाय इत्येव तेन शब्दार्थः साहाय्यश्च सजातीयो द्वितीयः अत्र च साजात्यमतिदेशगम्यैस्तयोर्धर्मस्तदा
श्रयत्वेन एवं चातिदिदिशितधर्मावच्छिन्नद्वितीयशून्यत्वमसहायत्वमिति फलितं यथाव्यतिरेकस्या
दोषप्रवृत्तिप्रसक्तयोर्भवेयं निरूपितस्य यस्माद्धि इति रूढादिति तदं तत्स्वरूपातिदिदिक्षितधर्मस्याश्रयांत
राभावात् असहायत्वं सेऽसस्य हरिषु घुरोपी त्यादोतु तथाविधधर्माक्रान्तस्य राज्ञासमयस्य सहायइ
तिनतत्रातिदेशप्रवृत्तिः तत्र धर्मातिदेशोपदर्शनेन सालदाधोरिति पतनिषेधः प्रसंगः तेन तुल्यमिति
फलितार्थकथनमिदं असहायविशिष्टव्यवहारे रवणीव कार्याणि कर्तव्यानीति सूचयितुं गमिति

तत्र स्थ श्रोरवरोत् एवशब्दोऽर्थः उपमेयसत्त्वमीदर्शनेन सत्सम्पातादेव बनेरुचितत्वात् सप्तमी साधं तव
देव् स्मिन्निति सूत्रानुरोधादिति द्रष्टव्यं एवं च याद्दृश विशेषणवैकल्यप्रयुक्तो विशिष्टव्यवहाराभावस्ताद
शविशेषणस्यारोपः प्रकृतपरिभाषया बोध्यते तन्मूलकृत्वाद्व्यवहारस्याप्यारोपविषयत्वं एतावते
वायं व्यपदेशातिदेशातिदेशवधानतु विशिष्टव्यपदेशातिदेशो गौरवात् न चैवं निमित्तातिदेशेन सांकु
र्यं यत्र शास्त्रप्रवृत्तिनिमित्तस्य वस्तुनश्चित्धर्मस्यातिदेशस्य निमित्तातिदेशः यथा ब्राह्मणमिति तत्र स्था
निवत्सूत्रेणादेशे सुपि चेत्सस्य प्रसर्थमंगत्वारोपः अयं तु विशिष्टव्यवहारनिमित्तस्यारोहपोन धं
भ्यामित्यादावारणं च धर्मत्व विशिष्टमवयवत्वमेवारोप्यमाणं सुपि चेत्यस्य प्रवृत्तौ निमित्तं किं तु परस्प
रविरुद्धधर्मद्वयघटितमव्यागां भ्यामित्यभेदस्य सुवचत्वात् यत्तु वदंति अभेदे भेदनिबंधन विशिष्ट
व्यवहारोपपत्त्यर्थमनया परिभाषयाभेद एवारोप्यते विवक्षितविशिष्टव्यवहारप्रयोजक विशेषधर्मः
संबंधविधया भासते तेन तश्च आभ्यामित्यादौ स्थानिष्ठ चरमावयवत्वनिरूपितावयविवत्त्वस्य विशेषणा

तावच्छेदसंबंधविधया सुलभत्वाद्धकारस्याप्यकारेण तमक्षतं येनविधिरीत्या स्यलाघवादूह्यमाणस्य
गादिरूपविशेष्यान्वयिविशेषणतावच्छेदकसंबंधविशेषनियामकत्वमेव। यस्मिंश्च विधिरकारस्याप्येवमे
व अतएवाभेदभेदारोपइतिग्रंथकाराः प्रवेदंतीति नद सतु स्वस्य स्वनिष्ठविधाना। वधित्वासंभवेन
व्याप्तिसंस्यादौ स्वरांतप्रथमावयवत्वनिरूपितावयवित्वसंबंधेन प्रत्ययविधानावधिविशिष्टतायादौर्ल
भ्येनतिङ्विधानावधा। ध्यवधित्वविशिष्टतिङंतत्वप्रयुक्तपदत्वव्यवहारस्यदुर्वचत्वात् लोकेपि
भेदे मात्रारोपेण। धिक्सूर्यपरिस्पंदा [illegible] अथयत्वादिरूपज्ञेयत्वाश्रितां दीनां संबंधविधयाभानं दुर्लभ
मेव तस्मादिदमलंकविशेषधर्मारोप एवावश्यकः एवं स्थितेभेदारोपइतिप्रवादस्य भेदमूलकविशेष
धर्मारोप इत्येवार्थ इति निष्कर्ष इति दिक्। अकारस्यापदं तादिति। अंतत्वं चरमत्वे सत्यवयवत्वमिति
स एवं ज्ञेयो धर्मः अन्तःशब्दः चरमावयववाचीति व्यवहारात् तत्र चरमत्वं विधमानपूर्वकत्वविशिष्टमवि
धमानपरकत्वमिति योगनर्दीयमते चरमत्वावयवत्वयोरानयनार्थमुभौव्यपदेशिवद्भावो एवमादिष्व

मपि प्राथम्यविशिष्टमवयवत्वमिति सखंडोधर्मः प्राथम्यं तु विद्यमानपरत्वे सति विशिष्टमविद्यमान
पूर्वत्वमनतस्तत्रप्युभयेन व्यपदेशिवद्भावो ऽपूर्वानुत्तरलक्षणआद्यंताभावइति कथनमनेनैवावि
द्यमानपरत्वमेवचरमत्वमविद्यमानपूर्वत्वमेवप्राथम्यमितितयोरतिदेशमंतरेवसिद्धत्वादवयव
त्वमात्रसाधकैवैकव्यपदेशिवद्भावइतिविवेकः। एवमस्मिन्निसूत्रे रिति। तदभावेहि योयद्धर्माभावस्
युक्तया तद्दत्राव्यवहाराभाववान् सतद्धर्मारोपेक्षणतादृशव्यवहारविशिष्टः कर्तव्य इत्येव परिभाषार्थः

कु संपद्येत तत्रश्च समासान्तयने सत्यपि भक्तारोरस्य समुदायनिरूपितावयवत्वे यावदनिरूपितप्राथ
म्याभावादप्रवर्तमानआदित्वव्यवहारः तथाविधप्राथम्यारोपोदप्रवर्तेत। तथाच दरिद्रातेरिकारे चर
मत्वारोपप्रयुक्तांतत्वव्यवहारो दुर्वारः एवमस्मिन्निति सूत्रे चालिङ्द्विदिक्षितस्य प्राथम्यस्याश्रयः सकारोऽ
स्तीति तत्तदारोपेणभावकाराकारे समुदायनिरूपितादित्वव्यवहारो नापि दरिद्रातेर्विकारस्य चरमत्वाश्र
यस्य सत्वादिकारे तदारोपप्रयुक्तांतत्वव्यवहार इत्याशयः नचारोपस्य कार्यत्वात् फलाभावएवपर्वोत्

विषये तादृशारोपस्य प्रतिबंधकत्वं इत्यत आह। अन्यथेति घुत्वाद्य इति। घुधर्मस्य चाप्रादिरित्यत्र प्रातिपदिका
धिकाराभावात् यत्किं समुदाय घटकत्ववद् ज्ञानरूपितं भवत्वावकगतप्रादित्वमादित्व समायदा। तदा दर्वेः संज्ञायां च
धाद्य इत्यत्र तदंतविधिना समुदायाद्यप्रत्ययोऽदुर्वारः। न च समासप्रत्ययविधाविति तदंतप्रतिषेध इति वाच्यं
तादृशनिषेधस्य ग्रहणवता प्रातिपदिकेनेत्यस्य तदेकवाक्यतया प्रातिपदिकत्वव्याप्यधर्मावच्छिन्नविषयता
वगाहित्वेन प्रातिपदिकपरत्वस्य वक्ष्यमाणत्वेन घुत्वस्य प्रातिपदिकव्याप्यत्वाभावात्तदप्रवृत्तेरिति चेत्
लक्ष्यानुरोधेन कार्यकालत्वाभ्युपगमात् घुसंज्ञायाः ष्ठप्रत्ययप्रदेशैकवाक्यत्वेऽपि प्रत्यासत्त्या प्रदेशीया दे
शताद्यंशस्य प्रातिपदिकस्यैव यत्तच्छब्दाभ्यां परामर्शेनादोषात्। अत एव गडादिषु समानयाप्रशब्दपाठो
ऽपि सार्थकः। अथ घुसंज्ञाया आदित्यग्रहणात् दानिर्दिष्टमेवादित्वं तन्निमित्तमित्यभ्युपगमान्नैतादृशेषु घुधि
संज्ञाप्रसंग इति चेत्तर्हि [illegible] ज्ञायायं शेयुरित्यत्रापि तदप्रवृत्तिप्रसंगः। प्रत्युत तद्धलङ्दादित्वघ
टकत्वमवयवत्वमेवानारोपितं विवक्षितं स्यादिति समासन्नयनाद्गुरुस्तरान्तप्रवृत्तेः ज्ञाशब्दाच्च तदप्रवृत्ति

रिति महतीदुरवस्था तस्मादतिदेशस्यासहायविषयतायामेव तात्पर्यमाह तूमदिग्रहणमित्युक्तं एवाणेति तद्रक्ष
णोऽजिति अयरत्वचतुर्भवत्येवतत्समयः तत्र अंतत्वव्यपदेशहेतोरवयवत्वस्य चरमत्वस्य वानपेक्षितत्वाश्रय
णीयइति व्यपदेशिवद्भावस्य सुवचत्वात् अतिदेशस्य विशेषविषयत्वमपि धर्मिग्राहकश्लोकव्यादेया वच्छुम्य
तद्व्याह। श्लोकेऽपीति। ज्येष्ठः कनिष्ठो मध्यम इति। ज्येष्ठत्वमधिकसूर्यपरिस्पंदवत्त्वं कनिष्ठत्वं न्यूनसूर्यपरिस्पं
दवत्त्वं मध्यमत्वं तु तदुभयवत्त्वं तथा चेदं त्वावच्छिन्नेषु त्रिषु निरूढज्येष्ठत्वादीनामतिदेशः तादृशाभिलापेन बो
ध्यते तत्रातिदिश्यमानधर्माश्रयस्य पुत्रांतरस्याप्रसिद्धत्वादसहायविषयत्वं सिद्धमतिदेशस्येति भावः। तदा
ह विंशत्येकपुत्रस्तत्त्वे एवेति तच्चाधं तवदेकस्मिन्नित्यनेनैव सिद्धेर्व्यपदेशिवद्वचनं व्यर्थमत आह। अनेन
चेति। अत्राशास्त्रीयस्यापीति। तदंततसंयेनविधिरित्यनेन बोधितं तदादित्वं यस्मिन्विधिरित्यनेन भवतीति तस्या
च्छास्त्रीयं एवाक्त्वं तु तत्केनापि शास्त्रेण बोधितमित्याशास्त्रीयमित्यान्वयः द्विकसिद्धिरिति। ततश्चसमय
विशेषसमभिव्याहारप्रयुक्तयुगपदारोपितभायोगित्वानेकावस्थाविशिष्टसमुदायत्वारोपात् सकलप्र

योगसमवेतस्वरूपः समुदायभूत एवायमिण्धातुः तस्य चाविच्छिन्नरूपत्वावस्थावस्थित एकोवयवैवस्तात्पर्याथ
म्येवञ्चायोरारोपात्तद्धितसिद्धिरित्यर्थः प्रतिपदिवसंचेति वृत्तिचतुष्टयनित्यत्वादावानुमानिकस्थानिवद्भावेन
यथोद्देशशाकुमवत्तायाः संज्ञाया आरोपेण निर्वाहः तद्व्यवस्थितयोः पक्षयोरन्यतरपक्षेपलक्ष्यसिध्येप
क्षान्तरेणानिष्टापादनं युक्तं अतो नेदं पलमित्याहुः नन्वर्थविशिष्टशब्दत्वस्य धातोरन्यपदार्थतया तदंत
र्भूतस्यार्थसहायविहीनस्याचाव्रतिपदार्थत्वेन विनैवारोपं वृत्त्यपटोनुरित्याह एवञ्चत्वस्य सुलभत्वादियायेता
२ दृशोपोदाहरणत्वमयुक्तमित्यतः वृत्त्यपटोनिरवंज्यानि यचित्यादि अर्थस्यत्यागोपादानाभ्यामिति। अर्था।
लिंगितः शब्दः तदनालिंगितत्वेन विवक्षितात्छब्दशब्दात्तद्वानस्यापत्यमितिसूत्रस्थभाष्यसंमतालिंगि
तः शब्दस्वशब्दः दतिरिच्यतद्गतन्यायात् विशेषणवद्विशेष्यस्यापि शब्दस्य विशिष्टांतर्भावो निर्बाध इत्याशयस्त
दाह अर्थवतोधातोरिति वर्णरूपइति अर्थानालिंगितत्वेनाविवक्षितइत्यर्थः अयमपि समुदायसमुदायि
भावो गौण एव अर्थस्यत्यागोपादानाभ्यां परिकल्पितत्वेनविवक्षितत्वात् अतो व्यपदेशिवद्भावः सार्थकुइतिचेतु।

शयः ननु धात्ववयवस्यैवाचो द्वित्वं ननु धातोरेवैकाचः अन्यथा दरिद्रा इत्यादौ द्वित्वानापत्तेः न चाभ्यासो
रेकाच इति यायेत्यादौ न द्वित्वोपयोगिशब्दार्थोभयसमूहरूपस्य धातुत्वस्यैकारेण तदंतर्भूतस्यार्थहीनाय
विहीनस्यावयवत्वोपपादनेऽपि तस्यैकाच्त्वं दुर्वचं अन्यपदार्थस्यार्थविरहितत्वेन वर्त्तिपदार्थभूतत्वमेकाचं भ
स्ववयवित्वायोगात् किंच तथाविधस्यावयवत्वेऽस्याधिकारबलादपेक्षितं प्राथम्यमप्यनिर्देश्यमंतरेण दुर्व
चं न स्यात् प्रथमस्यैकस्याप्यप्रसिद्धिसंभवादिति चेन्न अत्र केचित्। इटि धातोरित्यस्य यत्रानेकाज्घटितधातुर्विषयस्त
चेनोपस्थिते लक्षणे प्रथमस्येत्यस्य संभवो व्यावृत्त्यलाभश्च तत्रैव तत्संबंधावयवः षष्ठ्यंततया धातोरित्यस्य एकाज्धातुवि
षयकत्वेनोपस्थिते लक्षणे कथं प्राथम्यसामर्थ्येन केवलावयवस्य लाभश्चेति तत्र संबंधे न धातोरित्यस्यैव कर्मषष्ठ्यंतत्वमेका
चुरिति तु संभवमात्रेण समानाधिकरणमित्याशयमाहुः। मुख्यव्यवहारसत्त्वादिति। एवं पदा ऊर्णु इत्यादावपादेर्द्वित्ववद्वा
वोदीदाहरणत्वनिराकरणाय स्वार्थेनयुक्तो व्यपदेश इत्युक्तं भाष्ये न च स्वार्थस्य त्यागोपादानाभ्यां परिवृत्त्येति नः समुदायसमु

दयिभावो मुख्य एव न गौण इति इत्याद्येत्यादेर्व्यपदेशिवद्भाव फलत्वप्रतिपादनपरं भाष्यकृतामसंगतं स्यादिति भावः। न च तत्रे
वाच्यत्वव्यवहारस्यात्कृतिरीत्या मुख्यत्वसंभवेन व्यपदेशिवद्भावसाध्यत्वेन गौणत्वोपपादनपरं भाष्यमेव दर्शिन एवेति वैय्यर्थ्य।
शाय इति वाच्यं यथा वाशिष्ठापुत्रस्य शरीरामिति। व्यपदेशिवद्भावविषयस्यारोपितानेकत्वस्थाभ्रलवस्य गौणव्यवहा
रस्य दृष्टान्तत्वसमर्थनपरं तदुत्तरवैय्यर्थ्यं ग्रन्थविरोधापत्तेः। केचित्तु विशिष्टाशिश्वद्धयोः सत्यपि वृत्तौ चिरि द्विशेषणत्वयुक्त
भेदे नाहत्रभेदस्यावयवावयविभावादिरूपसंबंधाविशेषनियामकत्वमनुपपन्नं तस्य स्वतः सिद्धधर्मिभेदेन साध्य
त्वात्। अन्यथा हि नीलघट इत्यादौ षष्ठीप्रसंगः तत्तथार्थविशिष्टशब्दात्मकस्य धातोरवयवत्वं शब्दस्य व्यपदेशिव
द्भावसाध्यं गौणमेवेति न मुख्यत्वसंभवः। ऋगादिशब्दानां पार्थविशिष्टार्थाभिधायकत्वे तत्तदर्थमात्राभिधायित्वे वा
संगाबाधितत्वं केवलशब्दस्य पाठात्मकस्य मुख्यत्वमेवेति नेकपदा ऋगित्यत्र भाष्यविरोध इत्याहुः। अर्थशब्दोभ
यवृत्तित्वेनेति ऋगादिशब्दानां तत्तदानुपूर्वीविशेषविशेषविशिष्टशब्दस्वरूपात्मकपाठे तदर्थे चोभयत्रापि संख
ण्डाशक्तिः फलव्यापारयोर्धातुवत् समभिव्याहारानुरोधी च अन्यतरधर्मिकविशिष्टबोधः प्रकृते च पाठविशिष्ट एवा
र्थः ऋगादिशब्दार्थः एवं च परस्परालिंगितशब्दार्थोभयवृत्तित्वमृगादिपदस्यान्यबोधविषयतावच्छेदकरूपस्य ऋ

त्वादेरिति भावः ननु पाठस्तावत् शब्द एव ऋगादिशब्दानामर्थोस्तु पाठतदर्थोभयशक्तौ गौरवात् अन एवाणुदित्सूत्रेभा
ष्ये ऋगित्युक्तेः पाठमात्रं गम्यतेन स्वार्थो निराधत इत्युक्तं अर्थभानं क्वचिदभेदोपचारात् यथा ऋचमनुसरतीत्यादौ तथा
धं तवस्तत्रे ऋदूनामार्थ इत्यादिभाष्यमुपादायाभेदोपचारात् ऋगादिभिः शब्दैरर्थोऽभीयत इत्युक्तं कैय्यटे वाच्यवाच
कभावेन पदादिशब्दप्रतिपाद्यकेवलशब्दसंबंधित्वस्यार्थरूपतापन्नानां ऋगादीनामव्याप्तत्वादेकपदाऋगित्यत्र भाष्य
विरोधोपि न तस्मात्पाठतदर्थोभयशक्तेरनुपयोगो मानाभावश्चेति चेन्न एकपदा ऋगित्यादौ प्रसिध्या प्रतीयमानस्य
अवयवावयविभावस्य निर्वाहाय खलु व्यपदेशिवद्भावोदाहरणत्वमात्रं स्वार्थेन युक्तो व्यपदेश इत्यादिना समर्थि
तं भाष्ये यदि चेदानीमवयवावयविभावो न प्रतीयेत तर्हि संगत्यमेव समानधास्य तत्त्वतश्च विशिष्टबोधनिर्वाह
कादुक्तशब्दार्थोभयशक्तेरेवेति तदुपयोगः प्रकृतभाष्यमेव च तत्र प्रमाणं ऋदूनामार्थ इत्यादौ तन्मशब्दस्य वाचकशब्द
परत्वात् विपाठविशिष्टत्वतदर्थ एव ऋगादिदिशब्दार्थ इति भाष्यार्थः नास्यार्थः प्रतीयत इत्यणुदित्सूत्रभाष्यस्य
तु अर्थविशेषो न प्रतीयते तत्क्रियामकस्य शब्दविशेषस्यानुपादानात् किंतु ऋगर्थत्वेन ऋगर्थ इत्येत्यैवार्थ इत्याश

यात् अथात्र पक्षे पदशब्दस्य सुप्तिङन्तमित्यादिना संकेतितरूपत्वात् संकेतग्राहकेनार्थानुपस्थितेः शब्दार्थेभियबोधक-
त्वानौचित्येनैकवर्णवरमित्यत्रानुपपत्तिरेवेति चेन्न पदशब्देन पदकार्यव्यवहारप्रसिद्धस्य पृथग्विभज्यमानस्य ग्रहणे
नादोषात् तदेतदभिसंधायमुपसंहरति । तस्मादिति । अवस्थाभिरिति सहयोगतृतीया प्राणिनिष्ठवयःकृतबाल्याद्यव-
स्थाविशिष्टशरीरसमुदायत्वारोपेणेत्यर्थः । असहायपदार्थकतां द्रढयितुं शंकते । नचेति शपमादायेति । अत्र शास्त्रस-
यप्रकृतिनिष्ठप्रथमावयवत्वनिरूपितावयवित्वं धातिदत्त्वं तद्धर्माक्रान्तस्यान्यस्यासंनिकृष्टत्वादसहायत्वं भ्रूइत्यस्य भ-
वशब्दस्तुतिप्रत्ययरूपप्रकृतिनिष्ठतादृशावयवत्वनिरूपितावयवित्वात् कृतांतत्वात् विजातीयतसहायाभावतितिभावः स-
जातीयस्यैव साहाय्यतात्लोकसिद्धेत्यत आह लोकेपीति । इदंतावच्छिन्ने पुत्रेऽतिदिदृक्षितं जेष्ठत्वादिकं पुत्रत्वघटितं पु-
त्रत्वं च जन्यत्वे सति पुंस्त्वं कन्यायास्तु दत्नात्वं न तत्त्वे न विजातीयत्वात् असहायः पुत्रहीन लोकप्रसिद्धं तदभिप्रायः भाष्यवि-
रोधं परिहर्तुं शंकते नचेति । अपर्यालोचनयेत्यस्य निरूक्तसहायार्थकत्वापर्यालोचनयेत्यर्थः नन्वेवं धूगित्यादेरुदि-
त्यादिना ससहायत्वात् समुदाये धात्ववयवत्वातिदेशानुपपत्तिरिति चेत्तर्हि न तत्कार्यसमर्पकता सामानाधिकरण्येनैव धात्ववय-
वत्वादिरूपतद्धर्मो लोकन्यायादतिदिश्यते प्रकृते च भपभावरूपकार्यसमर्पकत्वस्य बकुत्वविरहिते दुर्लभत्वेन तस्या-

मानाधिकरण्यविशिष्टस्यातिदिश्यमानस्य धात्ववयवत्वस्य आश्रयांतराभावात् । असहाय एव धातुरिति न व्यपदेशि
वद्भावानुपपत्तिरित्याशयः यद्वा धात्ववयवत्वमर्थस्य त्यागोपादानाभ्यामेव धातोः सिद्धमिति न तत्र व्यपदेशिवद्भावो
पयोग इत्याशयः न च सहाय एव व्यपदेशिवद्भावाभ्युपगमे अर्थवदसहायेसु रम्यव्यवहारसद्भावान् व्यपदेशिवद्भा
वस्यानुपयुक्तत्वेन अनर्थकस्यैव तदुदाहरणतया तास्यनुदात्तेद्धिंसादिष्वनर्थकं वर्णमुपक्रम्य अर्थवत्ता व्यपदेशिव
द्भावो न चायमर्थवानित्युक्तिर्भाष्यकाराणामसंगता स्यादित्यत आह अर्थवतीति बोध्यबोधकभावापन्न त्वर्थः तत्सहचरेण
अनर्थनेति तदर्थः सादृश्यं चासहायत्वेनेत्याशयः वैयर्थ्यभिमते यथाश्रुतार्थे त्वनर्थकदोष एवेति स्वयमितरूतद
त्यादि अंचामंत्र इति व्यवहारः कदाचित्प्रकृतिमादाय संवेभात् सर्भादिरिति व्यवहारस्तु दुर्लभ एवेत्याशयः इदं तु
बोध्यं यद्धर्मावच्छिन्ने अतिदेशस्तद्धर्मिणः तद्धर्मावच्छिन्ननिरूपितधर्मस्यैवातिदेशः पूर्वोक्तधर्मिग्राहकलोकदृष्टां
तसाजात्यात् तेन रामशब्दे सर्वशब्दस्यत्वनातिदेशः तस्य तन्निरूपितत्वाभावात् दधिमध्वित्यादावजव्यवहितपूर्व
त्वादेति शनयत्वादिप्रसंगस्तु न इकोयणचीत्यादावच्ग्रहणसामर्थ्येनास्ति स्वदिच्चरत्वेस्यैव यणादिप्रवृत्तेर्नकलाभ्युपग
मात् अतो न कोपि दोष इत्याहुः केचित्तु परस्परनिरूप्यनिरूपकभावापन्नयोर्विभिन्नाधिष्ठानावस्थितत्वाभावयोर्ध

र्मयोरेकस्मिन्धर्मिण्यारोपेणावस्थानमनयापरिभाषयाबाध्यते लोकन्यायानेनाप्येतावानेवाश्रयणीयोर्थः सामान्यपक्षपा
ताश्च नत्वसहायपरत्वमिति देशस्य तस्मात्परिभाषायामेकग्रहणं संख्यापरमेव इत्थं च स्वस्येव स्वनिरूपितमवयवत्वमव
यवित्वं चेति यियायेदादौ द्विवचनाभ्यामित्यादौ दीर्घश्चेति सिद्धः यद्येवं दरिद्रातेर्विकरस्य स्वनिरूपितमंगत्वं स्यात्स्वस्मिंस्तु त
त्वं न विशिष्टधातुनिरूपितं तन्निरूपितमेव तत्र प्रत्ययविधानं यथा श्यन्नेसमासन्नयनेभवन्नाकाराश्य स्वनिरूपितावादि देवेस
रूपितत्वाद्विध्युधेद्रस्यतापच्च समवायनिरूपितादित्यस्य दुर्लभतया नवकृत्संज्ञाप्रयुक्तप्रत्ययादिप्रसंगः व्यतिसेद
त्यादौ तु स्वनिष्टविधानावधित्वविशिष्टस्वनिरूपितप्रथमावयवत्वस्य स्वावधित्वविधानाश्रयत्वविशिष्टस्वनिरूपितचरमा
वयवत्वस्य चारोपात्तद्वत्ता सिद्धिः कुरोषीत्यादौ प्रत्ययमात्रस्य न पदपदत्वं वक्ष्यमाणं चान्यन्यायात् अस्तु वा तथापि तत्संप्र
दायेगिरित्यस्य प्रसंगः दधिसेचावित्यादौ सुषुप्सतेः पूर्वसमासे षत्वनिषेधवत्तये पदाद्दादेरिति पंचमीसमासाश्रयणात्
सादिग्रहणेन स्वादिष्विति पदत्वनिष्ठ पदसंज्ञामादायत्वनिषेधाप्रवृत्तेरन्यत्र ज्ञापनाच्च ननु च कुरोषीत्यादौ विकर
णविशिष्टस्य प्रकृतित्वाभावेनतिङ्प्रत्ययत्वनिर्देशस्य तत्र दुर्लभत्वेपि बिभेषीत्यादौ तादौ च निर्देशेन प्रकृतेः पदत्वसंभ
वादेतन्मतेषत्वनिषेधो दुर्वार इति चेत्सत्यं प्रत्ययत्वस्य कथंचित्प्रकृतिनिरूपितत्वेन स्वनिरूपकत्वादतिदेशसंभवे

पित्विङ्त्तस्य पृथगतिदेशस्तस्य तत्त्वनिरूपणत्वाभावादिति विभावनीयं न चैवं बसंभुसलुमित्यादौ प्रकृत्या प्रत्ययत्वातिदे-
शेन प्रत्ययावयवत्वनिबंधनं षत्वं दुर्वारमेवेति वाच्यं षत्वविधावादेशग्रहणात् किसरादिभ्य इति निर्देशाच्च प्रकृतौ प्रत्य-
यत्वातिदेशाभावबोधनद्वारा षत्वाभावबोधनेनादोषात् पृथगन्यथाभवन्मतेपि प्रत्ययलोपोत्तरं प्रवृत्तावतिदेशव्यर्थत्वेन
प्रत्ययत्वेन प्राप्तं षत्वं निवर्त्यते न एवं च समुदायसद्भावेपि वारस्य स्वनिरूपितावयवत्वनिमित्तत्वेनच्छव्यवहारबाधका-
भावेन तिजौ च त्वार एव गृजिति भाष्यं स्वरसं सनत्युपपद्यत इति नदेवाचार्थप्रमाणं एवं व्योबस्यासहायवृत्त्यर्थकत्वाभावादे
वच प्रयोगविचारेपि भाष्यकृता न कृत इति विपश्चितां विचारणीयोयमर्थ इत्याहुः॥ ॥ ग्रहणवता प्रातिपदिकेन
तदंतविधिर्नास्ति॥ ॥ यद्यपि प्रकृतं व्यपदेशवद्भावेनातिव्याप्तिवारणार्थायोत्तरपरिभाषाया इह निरूपणं न्याय्यं
तथापि तत्र ग्रहणवत्पदसंबंधसूचनार्थमस्याः परिभाषाया उल्लेखः तत्सत्वे तु उत्तरपरिभाषाशेषमलग्रवस्फुटीभवि-
ष्यति। अनुवाद इति अपूर्वत्वे गौरवं स्पष्टमेव अतएवतोरचेसत्र तदंतविधिद्वयं सिद्धं अन्यथा तस्यासिद्धांतेरादेश-
मात्रविधायकतया प्रत्ययविधित्वाभावेन समासप्रत्यये त्यादिनिषेधाप्रवृत्तावप्यनया द्वितीयतदंतविधिनिषेधो दुर्वारः त-
दनुवादत्वाच्चात्र प्रत्ययविधावितिस्याध्याहारः वार्तिके च प्रातिपदिकेनेत्यस्य समासविधावित्यस्य तु नायमनुवादः।

धर्मिग्राहकत्वे त्वाज्ञाप्यत्व आख्यातमाख्यातेन क्रियासातत्ये इत्यत्र प्रातिपदिकग्रहणाभावेन तिङन्तानां तेन समर्थेन समासप्र

संगाच्च आख्यातमेवेत्यस्यानुवादत्वादेवेत्यर्थः द्वितीयस्य तु प्रत्ययविधिर्विषयत्वादेवेत्यर्थः अनुवादफलं दर्शय

ति सोपीति तत्तद्रूपेणेति प्रातिपदिकत्वव्याप्यधर्मपुरस्कारेणेत्यर्थः ग्रहणेन प्रातिपदिकस्य सूत्र एवेति बहुव्रीहिग

र्भः कर्मधारयः प्रातिपदिकग्राहकत्वेन तदंतविधिर्नेत्यत्र तात्पर्यमेतत्फलं ङ्टिड्ढेति सूत्रे टिड्ढेत्यत्र तदंतविधिनिषे

धकत्वनयावगतिक्रमात् ... न चैवं तत्रोपसर्जनानुपसर्जनसाधारण्येन तदंतविधावुपसर्जनांशे तज्ज्ञापकत्वेऽनु

पसर्जनादित्यस्यावश्यकत्वेन तदंतविधिज्ञापनपरभाष्यासंगतिरिति वाच्यं तावन्मात्रफलकत्वे अनुपसर्जनादि

ति समस्तपाठेनैव निर्वाहे व्यस्तपाठो ज्ञापकस्तत्रायातः यदि तु अनुपसर्जनाभिव्यक्तज्ञापिततदंतविधिनैव

निर्वाहस्तथापि तदुत्पन्नगुणिद्रव्यविषयेऽनिषेधात्प्रवर्तते गुणिद्रव्यपर्युदासस्य सार्थक्यं पूर्वत्राभावः फलं किंच वासुदेवबाच

व्यादव्यारान्ते विहितेन ङ्ग्रीषमात्रप्रयोगयोग्यत्वे प्रसङ्गः प्रत्ययमात्रग्रहणव्यक्तावस्येय ग्रहणपरिभाषाभ्यां तदंता

शास्य प्रसक्तिसंभावेऽपि प्रातिपदिकमात्रबोधकत्वे सौभावेन प्रकृतानिषेधात्प्रवृत्या येन विधिरित्यनेन तदंतविधित्र

योजनमिति स्पष्टुः ननु प्रमाणत्वे तुल्यादयुक्तत्वेन ... यमर्थद्वयमत आह धर्मिविभक्तीति भाष्ये इति तन्नहि असमास

प्रयोजन ग्रहणं प्रस्तावेऽठग्विधिघटकत्पर्युदासवलल्लभ्यान् गोधुक्छादीन् अथ प्रत्ययग्रहणे तदन्तग्रिस्तत्र तदन्तविधौ परमनि
ष्कुल्ये कुद्वानुठभ्रूसिधिं फलतेन मद्धदत्यपदणवे नेति निषेधस्तु नमकर्मनिर्देशादित्युक्तं यदि समासप्रत्ययविधावि
त्यस्य साधारणतान्तदा ननिषेधस्य दुर्वारत्वमातदीविषयतापि वक्तुमुचिता तदनभिधानाद्युक्तमेतत् भयोस्तु त्वविष
यता स्यविवेतिभावः। अथ समासप्रत्ययविधाविन्यस्य प्रकृतपरिभाषैकविषयतायामित्यादेश्वगुरुमतानुकरम्
सत्वश्चादित्तस्य प्रातिपदिकग्रहणे साधारणतया तन्निषेधाप्रवृत्तेरित्यर्थं तादृशधातोरन्तप्रत्ययप्रसंगः न
थानोच्चचरस्त्र तदन्तविधिना ध्यक्ष्यंताश्चवक् चोपितन्त्यसयप्रसंगरिति हीति चेन्न इत्यादेरित्यत्र इत्वाराति सिद्धा
वादिग्रहणेनानोच्च चरस्त्र अनेकाच इत्यस्य विशेषणग्रहणेन च तदन्तविध्यभावइत्याशयात् केचित्तु वर्णितु
परिभाषयोरनयोरेकवाक्यतया विषयतायां ज्ञरजन्ययोस्सर्वनामसंज्ञाविधाने सामर्थ्यात् संज्ञाविधावित्यप
रिभाषाभवात् इत्यनुपपन्नं किं सर्वनामवदुभ्य इत्यत्र निषेधाप्रवृत्या तदन्तविधिनाचूलरत्त्रेत्यादिरूपसं
पादनेनचारितार्थ्यात् तथा बहुगणेति सूत्रेण संज्ञा स्वात्संज्ञाविनेतिप्रत्यये तदन्तग्रहणसामर्थ्यादित्यपु

युक्तं संख्यायाविधार्थेत्यत्र भेदेनोक्तं गौरिधिनाकृथितेनिरूपसंपादनेन कृतार्थत्वात् एवं चकृतेन । मांकलीना
दीनामसिद्धिः तस्मादत्र कृतत्वं तरमन्वेवरीत्या यस्मिन्नाहुः । परिभाषाभ्युपगमे प्रमाणमाह अत्र च ज्ञापकमि
ति सर्वोच्चेति यत्तु केवलानन्दकृताज्ञसामान्यतः प्राप्तस्य नरसय समनियमेन केवलान्ताभ्यामेदि । ते मिथर्थंस्ता
र्थकमिति कथं ज्ञापकत्वमिति स्पादुक्तादत्वात् सत्त्व वचनज्ञापनेन विधायकत्वाभावपक्षे नियमार्थत्वे तस्य घटाभावात्
त्विं च नियमेन साक्षाद्विधिबाधकल्पनापेक्षया वचनज्ञापनेन गुणशास्त्रबाधकल्पनमेवोचितमिति दिक् । ॥
मपदेशिवद्भावोऽप्रातिपदिकेन ॥ ॥पृथग्योगकरणमिति च कृतरत्तु प्रत्याख्यानं च कृतं समहांतर्भूतकेति
भावः ज्ञापकपरभाष्यप्रामाण्यादिति अत्र येन विधिरिति सूत्रस्थत्वादिः अनिष्टत्वादिति न च केवलयोगो निर्दि
ष्टानेकदेशेऽप्यनुवर्तत इति परिभाषया योगविभागमंतरेण तदनुवृत्तेः सोऽन्त्यप्राप्तपरिभाषाज्ञापनमनुवृत्ति
श्चेदुभयमपि पृथग्योगकरणेन सिध्यति अनिष्ठास्वादीनामनभिधानेनानाभाव इत्याशयेनाह एकयोगेति
अत एवेमस्य परिभाषांगीकारादवस्थः चरितार्थमिति न च स्याः परिभाषायाः फलं निबंधकमयत्वस

वक्ष्यमाणत्वाच्चोक्तादेशव्यासंदेहस्य स्यागृमिर्विधित्वाच्च कथं चरितार्थप्रतिपादनं न च प्रत्ययपरत्वाल्लु
एवं च मं च मदेशादेशोपचारणायदिश्यो पूसूत्रे भादिवृत्राश्रयणं कृत्रोपि नेत्याय परमनुकूलमिति वाच्यं अत्र
विभिन्नत्वात् षट्कृत्वा सन्नहः सबंधाभावे पृथक्त्वापि प्रत्ययत्वापत्तेः न च तत्रापि पृथुदूरस्थवाल्लु तन्नश्वत्वप्रभा
वोऽपि प्रनिर्बाध इति वाच्यं जस्त्वनपदान्तादितिनिषेधेन निष्ठप्रसंगात् तस्मादयुक्तमिदं पूर्वापरविरोधा
दिति चेन्न वक्ष्यमाणग्रंथे प्रत्ययविधित्वेन प्रत्ययाधिकारविधि विलक्षणेनादेशपागु अत एव सर्वादेशा
देशेति लुक् सर्वनभीने सार्वद्दस्य च व्यपदेशवद्भावेन न भवति तथा सर्वस्य सोन्यत्र स्याद्भावस्य विधीयमान
स्यादेशपरत्वा सर्वदेशत्र न भवति। प्रातिपदिकग्रहणमेवेति अत्रापि ग्रहणवत्पद संबंधादित्याशयः।
न दोष इति। प्रातिपदिकमात्रग्रहणाभावादेव पूर्वपरिभाषाया अप्रवृत्या तदंतविधावुगिदंतादि सर्वेपि प्रवृत्त
परिभाषायामध्यय वचनेरियतीभवतीति सादृश्यप्रवृत्तौ रूपोदोषो नेत्यर्थः तत्रैव सूत्रे इति यतीभिधिरसमेर
त्यर्थः भाष्यवृत्त्युपदयोरिति भाष्ये अर्हादगोपुच्छे सूत्र प्रतिविधीयमानेषु गोपुच्छादिषु ग्रहणवत्त्वेन तन्नि
मित्तस्य तदंतविधेः पुनः प्रापणमसमासग्रहणप्रयोजनमितिसंभिसंधायविधौ स्तनिषेधः प्रतिषेधश्चा

यस्मिन्निति प्रयोजनं मत्वारब्धानं कैयटेनैवात एव व्यपदेशिवद्भावप्रतिषेधोऽपि न स्यात् एवं च धर्मिग्राहकसाजात्यसि
मनयोः प्रत्ययविधिविषयत्वं समासग्रहणमिति भावः अत्र केचित् यत्र तु चेत् प्रमाणानीति गृहकसाजात्यंग्दिशब्दो
पादानं तत्रैव निषेधः मद्रूपपरिभाषया बोध्यते ज्ञापकसाजात्यादिवस्य मभ्युपेयं अत एव रोगिणीति सूत्रेण वि
धीयमानस्याण्प्रत्ययस्य पाक्षिकत्वादपि प्रवृत्तिः ननु तदंतविधिरेव दुर्लभः ग्रहणवतेति निषेधात् न च सा च प
रिभाषा सूत्रोपात्तांग्दिशब्दविषयत्वेनेति वाच्यं गर्गादिभ्यो यञिति सूत्रे कथं विदादिशब्दघटितत्वेन तदंतवि
धिनिषेधसंभवे पिढकत्व मंडूकादित्यादेः स्थलं तदंतघटितत्वेन निषेधाप्रवृत्तेः संगादिति चेन्न येनविधि
रिति सूत्रस्थभाष्यकारोदाहरणीत्यत्र वाचनिकतदंतविधेरभ्युपगमात् एवं रथसीताहलेभ्यो यदिति सूत्रेभ
भीष्टेन तदंतविधिना रथार्थं नाज्ञायमानस्य प्रत्ययस्य कैवल्यादपि प्रवृत्तिः पूर्वं स्पष्टमिदं येनविधि
रिति कैयटे तथाचासमासे निष्कादिभ्य इति सूत्रे कैयटे प्रतिषिध्यमानेषु गोपुच्छादिषु अंतादिशब्दघटि
तत्वाभावेन मद्रूपपरिभाषाबाधप्रवर्तौ विधित्वाभावादप्रवृत्तिरिति यत्तूक्तं तदेतन्नाहि दोषाच्चिंत्यमेवेति
तदवस्थं वप्रयुक्तमस्याः प्रत्ययविधिविषयत्वात् अन्यतरस्यां किंच तदीत्यापद्रूपपरिभाषायाः प्रत्यय

विधिविषयत्वे अर्हादिति सूत्रे गोपुच्छादय इव नान्तादसंख्यादेरित्यत्र संख्यादेरपि प्रतिषिध्यत इति
परिभाषास्वरूपयोगात् ननु कथमन्तरेणैव त्यादि स्वरीयः ग्रंथः संगच्छते अंतादिशब्दानामनियतदिग्दिक्षित
धर्मोपस्थापकानामेव विवक्षणात् षट्स्वस्रादिभ्य इत्यनेन चतुर्भ्यः स्वस्रादिभ्यो निषेधसिद्धिः पाल
कुंतान्ते नेति निषेधस्य तत्तद्ग्रहणवत्त्वात् वेलक्षण्ये नेति सर्वमनवद्यमित्याहुः॥ ॥ यस्मिन्विधिस्तदा
वल्ग्रहणे॥ ॥ यत्कारादावित्यर्थलाभः कथमिति। यतइत्यर्थापत्तिरिति नोक्तं तादृशार्थस्यासं
भवात् न च गोमयमिति गोमयात् तमाख्यायां गोमय्यादित्यत्र अइच्कुण्डादेशे तनं स्थानिवत्त्वाभावेनेल
संभवतीति वाच्यं बहिरंगपरिभाषयात्रस्यापि यांतत्वायोगात् अपवादेयमिति। एतेनास्याः परिभाषायाः सं
दर्भो दांतविशेषणेऽएव प्रवृत्ताव उपायउत्सर्गसमानदेशा अपवादा इत्यस्यपरस्यापि सूचितं। ननु कथमपवादत्वे
वांतोयीत्यस्मिन्त्र तदंगविधेरसंभवेन तदादिविधेः सावकाशत्वादिति चेन्न उत्सर्गेण प्राप्तियोग्यतावि
रहविशिष्टलक्ष्यवत्त्वं अपवादस्य सावकाशत्वं यत्र तु यांतमप्यय परत्वोत्सर्गबाधात्मकलक्ष्यासंभवप्रयुक्तं तदं

तद्विधेरनुपयुक्तं नहि ज्ञापकज्ञानं तद्विधिप्रसिद्धयोग्यतायोभ्भावः किंच ज्ञापकमात्रफलकत्वे यद्ग्रहणेन
वसिद्धे प्रत्याहारग्रहणं व्यर्थमतो निरुक्तं। शब्दमेवेत्याशया परिभाषायामल्ग्रहणमिति करणस्तु पाठेनेन कु
र्मधारयः यच्चवक्तव्यं बुधिस्वपरामर्शेन या सत्संग्रहबोधकं सत्यमिति तत्रैव नामर्थ्यग्रहित्वादेवं चाल्बोध
कं सत्यमते सति प्रत्यासत्या नकरणत्वायोग्यविधिः सनदाह्नोबोध्य इत्यर्थः एवं च वांतोयीत्यत्र तदंतविधेरसंभवे
पि रद्धवासि स्याद्विव मतुर्थलक्षणया यद्वारवति प्रमयरत्यर्थे गोयुगादो वति प्रसक्तिस्तद्वारणमस्याः फलं
अल्ग्रहणमिति तु प्रियवन्त्रेवदः खचू इत्यादेः प्रियादीनामुपपदविशेषणानां तदादिविधिवारणाय। वाचनि
क्षीति। नुन। क्षोः चूत्स्तु रुषे चिरलेवो सभे रथवदयोश्चेति सूत्रमस्या ज्ञापकं अन्यथा क्षोः वृद्दिस्यत्र तदंतवि
धि। अजंत उत्तरपदे इत्यर्थे रथवदशब्दयोरजंतत्वविशेषणात्तद्व्यर्थं स्पष्टमेव न च रथवदशब्दा
भ्यां प्राचारीद्वरं नाभ्यांकर्तरि क्विपि अतोल्लोपो तरमजंतत्वाभावेनाप्राप्तस्य वृद्ध्यादेशस्य सिद्धये तत्सूत्रमा
वश्यकमिति वाच्यं स्थानिवद्भावेनानजाप्यजंततायास्सुलभत्वात् क्षौ तु इत्यमिति तु ह्वे निमित्तवृद्धिव्याकिते।

स्पष्टमावृद्धैरिति चेन्न तत्सूत्रबलादुक्तवचनवैयर्थ्यानापेक्ष्यान्यग्रहणस्यश्रूयमाणानंतपरत्वकल्पना
यां तथैवेनोपदर्शितसूत्रे वृद्धादेत्र्यगिति सूत्रे तत्र सार्थक्यसंभवात् आर्धधातुके कस्मिंश्चित्तत्र तदार्धधातु
स्यांगसंज्ञापदसंज्ञयोः सार्थक्यं एवं च ज्ञापकाभावाभावाद्धात्वित्यस्य समेवगतेदेशविधेरिति भावः स्वरू
पसंज्ञेति। अर्थविशेषानाश्रिता सप्तमीश्रुतिरस्याः परिभाषायाः लिंगं यदि वृद्धाचेदर्थांतराभिधाय
नी सप्तमी तथापि प्रवर्तते वैषा परिभाषेत्याशयः। सामर्थ्यादिति नन्वादिग्रहणाभावे धीत्युक्तावार्ध
वक्र धातुकस्येत्यनेन विभक्तिवृत्त्या सामानाधिकरण्यायोगात् निर्दिष्टपरिभाषायाः पूर्वस्याव्यवहितत्वं
शयोरूपस्थाने तयोः प्रधानाच्च यस्य स्यात्यचात् त्रैदन्त्वर्णाव्यवहितपूर्वस्यार्धधातुकस्येत्यागमस्यार्थेऽभिधि
नेत्याक्षेपे तदप्रवृत्तिप्रसंगः इति चेन्न निरुक्तीतिनिषेधाच्छमितायसेतिनिर्देशाच्च गुणः वृत्तान्तसंस्कार इ
तिन्यायावलंबेनांगविशेषणतया तदन्वयबोधने क्षत्यभावात् किंच तदादिविधिप्रवृत्तिप्रयोजकं सामा
नाधिकरण्योपायतया वस्तीति सप्तम्यापि षष्ठ्यंतत्वेन निर्दिष्टपरिभाषायां प्रवृत्तिर्हेतोरोपश्लेषादि
का

वारणरूपार्थस्य वैकल्यादेव तत्तत्तीरभावोपि स्यान्निमयुक्तविरुद्धाच्चवर्त्स्याद्ः सादेःपदस्येति नार्थ इति ननु सांगस्य
पदस्येत्यर्थवारणार्थं विपरीतविशेषणविशेष्यभावस्यावश्यकतया तत एव तदादिविधेरप्यप्रवृत्तौ विशेषणविशेष्य
योः सम्बन्धनियमस्य नेदं फलमिति चेत्सम्बन्धा न तदंगविधिनिवारणार्थो विशेष्यविशेषणभावव्यत्यासः किं
तु श्रुतसंभूटि सिद्धं वाच्यमिति वर्णितं पूर्वं तानदंगविधेरुक्तनियमात् तदादिविधेश्चाप्रयोगसंगराभावाद्‌ाथीय
ते तथाविधव्यत्यासो वैयर्थ्यधिक्करण्यं च एवं च प्रकृतनियमाधीन एवात्रपदाव यवस्य सम्बन्धेसर्थत्वाभ्युपगमविभा
वनीयं तदादिविधिप्रवृत्तौ च पष्ठ्युरसादेः धुटुनापि निर्देशः इति दिक् ॥ निरूपितमिति तमिति सोऽत्र त्यादनुवृत्तवत्ता
देरित्यत्र तद्विशेषणीभूतवस्तुपदार्थस्य व्यवहारेण विशेषणात्वारूपवत्त्वादेरित्यक्षरार्थः एवं सेसिचित्यादावपि
सप्तमीनुप्रथमार्थस्यैवेति नीषसमेति एतेनोक्तमित्यर्थः नव्वार परके च्छ्वसादपरस्य वत्त्वादेरितिबुनार्थः यतः स्वान
यवोर्वविशेष्यवाचकपदांतर समभिव्याहृतत्स्यात्ल्बोधकसंबन्धं न स्य प्रकृतपरिभाषारंभबलेन विशेषणमा
त्रपरत्वमेव ननु स्यान्तंत्र्येण परसम्बन्धं तत्त्वमित्यपि नियमयः स्त्रीक्रियतइत्यभिमानः अत्रेदमवधेयं यदि

विशेषणविशेष्ययोरुभयोरपि सम्बन्धेन त्वमिति नियमरूपादातुः सम्भ्यहणेति सूत्रस्थभाष्यविरोधः नन्विह
पसिभसोर्हल्यिति सूत्रादनुवृत्तस्य हल्ग्रहणस्य सम्बन्धेन तस्य हेरिति षष्ठ्यन्तविशेषणतामादायानया परिभाष
यानदादिविधिरस्तु यदि च विशेष्यवाचकपदसमभिव्याहृतस्यान्वयबोधकसम्बन्धस्य विशेषणमात्रबो
धकत्वं नियममपहाय हल्लोपस्य परसम्बन्धेनान्वयित्वम् हल्य रवृत्त्युच्चत्वं नापरस्य हेरिति संबन्धे स्यादेवेति
त्यर्थः फलमिति भाष्यमुपपद्यते न तु आर्धधातुकस्येड्वलादेः इत्यत्र वलोऽमुमा वपिपरसम्बन्धेन तदंगविशेषण
ताभ्यां विनैवादिग्रहणमभीष्टं सिध्येः स्वामिशेषचरितार्थत्वाभावात् विशेषणविशेष्ययोः सम्बन्धेन नि
यमज्ञापनस्यैव विरोधः न स्यादयुक्तमेवायं नियमः किं तु कारनाम्नि च प्राचां हलोऽन्त्यात् नादो च सति वृत्त्य
ताविस्तादावपि ग्रहणेनान्वयबोधकसम्बन्धस्य समानाधिकरणभावेन सार्वत्रिकत्वमिति ज्ञाप्यते नेनजः सिध्
ज्यादौ वैयधिकरण्यस्याभावः आर्धधातुकस्येड्वलादेरित्यत्र ग्रहणं तु वलोपस्य परसम्बन्धेनान्वयात् स्तुनसंब
धस्य वलीमस्त्यार्धधातुकविशेषणत्वेन ग्रामान्निष्टवारणार्थमेवं स्यादर्थमित्याहुः अपेतस्याः परिभा

पाया: पूर्वलाभ: कृतांतोऽपि प्रत्यये स्यादिभेदो वृक्षशब्दवन्निबद्धवर्णविनश्वकाधारत्वविवक्षया प्रत्ययोपकारः त
सरयो रैदोतोरित्येवं संबंधे प्रत्ययोपकारादिरित्येवं रीत्यैव कृत्प्रत्ययादावनिष्टप्रसंगभंगात् अमि पूर्व इत्यादावव
स्य कर्तव्यायमर्थः अन्यथा पूर्वपरयोरित्यधिकारघटकपरशब्देन सर्वनाम्ना प्रथीनिर्भूतस्यामादेरेवपराम
र्शे पूर्वरूपादेशेन भवकारादेरपि निवृत्तिप्रसंगः न च परशब्दबोधितमप्रत्ययादितंस्थाने त्वमादेः परस्य
स्येनाधक्षरे परिसमाप्यतादृशनिवाच्यं यत्रपरस्यैव कार्यं तत्रैवादेः परस्य स्याप्यवत्तेरभीष्टत्वादन्यथा भोमा
ऊः श्वेति परस्तपादेशोऽपि शिवायोऽस्मि सोकारपर्यन्तस्यैव स्यादिति सर्वथा मकारद्वयाश्रवणापत्तिः न च वांतो
यीत्यत्र तदादिविध्यभावे गोगोयुगमित्यत्र गोयुगच्छप्रत्ययसंबंधिन ओकारस्य तदीयपकाराव्यवहितत्व
त्वमादाय वांतादेशप्रसंग इति वाच्यं प्रत्यये ओकारोच्चारणमहिम्नैव तत्र वांतादेशनिवृत्तिसंभवात् न च गो
त्रे लुगचीत्यत्र तदादिविध्यभावे प्रागदीव्यतीयप्रत्ययस्थानविषये गोश्च प्रत्ययस्य लुगित्यर्थेन अजादौ घटकत्वं
(र्ण) परत्वेन विवक्षितत्वार्थेन वा न दोषः ७) धातुत्वेनामोनोभानोरिति न तत्र प्रसंगः यदि भत्वादेः परस्यस्य

अनेकाल्शित्वेन परत्वाबाधनान्नदोषइत्युच्यते तर्हि शिवायनमः इत्यत्र न इं सवृ संबुध्यं तस्य शिवेत्यस्य ओमापर
रूपेपूर्वातिवङ्गावे प्राग्दीव्यतीयप्रत्ययविवक्षायामित्यर्थस्यैवपर्यवसन्नतया गर्गरूपमित्यत्र हल्ङ्याबाभ्योपितत्प्रसंग
सइतिवाच्यं प्राग्दीव्यतीयप्रत्ययघटकत्वतच्चरमावयवत्वयोरव्यभिचरितत्वेन अन्यतरणसामर्थ्यात्तादृश
वा प्रत्ययादिभक्तस्यैवोपग्रहणमित्यभ्युपगमेनादोषात् प्राग्दीव्यतीयप्रत्ययघटकवर्णपरत्वेनविवक्षितेइत्यर्थेनवा
नदोषः नचलणइत्यत्र हल्ङ्याब्भ्य इतिसार्वधातुकेति सङ्गीतिविध्यभावेनादृशसार्वधातुकेलहरी
लुशावतणेङिस्यत्रांतरंगत्वात् लउपादिलोपप्राधान्यनवर्णाश्रयत्वात् प्रत्ययलक्षणाभावेनेरिमागमापत्ति
रितिवाच्यंअग्निपदविधित्वेनेमागमस्याप्यंतरंगतयापरत्वेननिर्बाहात् हल्ङ्यादिलोपस्यशाब्दंतराप्ता
स्यानतिसः यद्वाप्रत्ययलक्षणसूत्रस्यनियामकत्वमभ्युपगच्छतोभगवतोभाष्यकारस्यसरणिमनुसृत्यहल्डि
सस्यानुवृत्तिंविहायनाभ्यस्तस्येतिसूत्रादीचेनेसनुवृत्त्यासामान्यतोविहितस्येमागमस्यापित्तिनिषेधाभ्युप
मादर्देषः नचऊर्णोतेःस्यादिप्सस्यऊर्णंतपदाभरस्यपदस्थस्याचेपिऊर्णुतिलर्थेपरमदंडिनाविस्पष्टवुल

रपदस्य कार्यित्वाभावेन प्रत्ययलक्षणनिषेधाप्रवृत्तेरंजवर्णनिमित्तभक्तिमाश्रित्य न रलजस्य पदत्वेऽदोषात् रस्य च
विशिष्टसमुदायमादाय पदत्वस्य त्वाच्च भात्र स्पष्टमुदाहरणाय जश्त्वादिविधिसंपादकत्वं नापरिभाषेयमावश्य
कीति वाच्यं अचः परत्वं न पदात्परस्य देशस्य पदपरत्वं न पदात्परस्याचो वा तदा मुख्यमर्थेनान्वयात् न च
मिदेर्गुण इत्यादौ शितीत्यस्य लिङ्गात्मनेपदैकवचने दोषवारणाय कर्मधारयत्वांगीकारे जश्त्वादिविधिसंपादना
र्थमियमावश्यकीपरिभाषा न हि तत्र प्रत्ययघटकत्वं संज्ञकत्वाकारे इत्यर्थः संभवतीति अनुबंधविनिर्मुक्तस्यैव प्र
त्ययसंज्ञोद्देश्यतया शावकारस्य संज्ञाविशिष्टस्य तद्घटकत्वायोगात् प्रत्ययसंज्ञकशकारादिलं तु भक्तपूर्वंग
त्या सुलभमिति वाच्यं अनुबंधानामेकांतत्वादेशिति त्वांजेन तस्य लोपे इति लोपवचनादनुमानेनकृत्नस्थानिवद्भावेन
सानुबंधकानामनिरनुबंधकाग्रहणे इत्यादेरनभ्युपगमोऽदनुबंधकापेक्षित्वनित्यविधाविति प्रतिषेधाभावेन प्रत्ययस्थानि
वत्वेन संज्ञकत्वाकारादिश्रमिव तदादिविध्यभावेपि संज्ञकत्वाकारकत्वे स्थानिवद्भावप्रसक्त्या पूर्वमीत्रयाज्ञानव

नां सुबचनयानस्य प्रत्ययघटकत्वाभावेपि प्रत्ययपरत्वसंतत्वशब्दपरत्वैरस्समिदेरित्याद्यर्थेनादोषात् न स्याद्व
थैवैषा परिभाषेति चेन्नहि बहुविधाभिः कृष्टवृत्त्यनभिसत्वत्रत्वफलान्यथा साधनापेक्षया परिभाषाश्रयणे
त्वः प्रयासः आश्रीयमाणायां परिभाषायां अमिहर्वईत्यादौ परिभाषाप्रवृत्तिः जप्रयोजनत्वं समानाधिकरणमिति
तत्पक्षादेवमाणुत्याख्यानिर्वाह इति सर्वमुपपन्नमित्याहुः॥ सर्वोद्वंद्वे विभाषैकवद्भवति॥ ॥व्यपदे
शिवदित्यतिदेशबाधकपरिभाषानिरूपणमतीतमनुसंधाय इदानीमतिदेशकपरिभाषाणामारंभः ननु परिभाषा
यां द्वंद्व इत्येकवचनमनुपपन्नं द्वंद्वसमासानां सार्वबहुत्वात् नच द्वंद्वत्वेन द्वंद्वसमासानामेकत्वस्य जातिपरतया निर्देश इति
वाच्यं सर्वपदान्वयप्रसंगात् अन्यथा द्वंद्वे विधायकशास्त्रपरत्वमपि दुर्वचं तस्यैकत्वादिति चेत्सत्यं द्वंद्वशब्दोत्र तत्समा
ससमूहपरः सर्वशब्दस्त्ववयवकार्त्स्न्येन वर्तते सर्वः पटो दग्ध इतिवत् एवं च सर्वावयवावच्छिन्नो द्वंद्वसमाससमूह इत्यर्थस्य
दोषः एकशब्दः एकत्वसंख्याविशिष्टबोधकपरः ननु एकवचनत्वार्थं लभते इत्यर्थेनानया परिभाषया विकल्पेनैकवचनमतिदि
श्यत इति भावः ननु सर्वशब्दबलान्नियमविषयाणां प्राप्त्यं गादिद्वंद्वानामपि ग्रहणापत्तौ नियमशास्त्राणामानर्थक्यप्रसं

गः नचैतेषामितरेतरयोगे एकैकवद्भावविधायकत्वेनैकवचनं संपादकत्वात् पाणिपादमित्यादिपुंल्लिंगैकवचनानां प्रयोगसाधनाय
सार्थक्यमिति वाच्यं द्विवचनमिति साहचर्येण द्वंद्वश्चेत्यादिषु समाहारद्वंद्वस्यैव ग्रहीतव्यत्वेनोक्तार्थासिद्धेः नचैवं दधिपयसी
इध्माबर्हिषी इत्यादावपि पाक्षिकैकवद्भावो दुर्वारः निषेधस्य जातिरप्राणिनामिति नियमव्यावर्तनेन कृतार्थत्वादिति वाच्यं दधिप
य आदीन्यनन्तरं निषेधस्य जातिरप्राणिनामिति सूत्रबोधितैकवद्भावनियममात्रनिवर्तकत्वाभ्युपगमे तद्गणे ब्रह्मप्रजापतिशब्द
पाठवैयर्थ्यस्य दुर्वारत्वात् तस्मादिह सहचार्यादिना सर्वथा समाहारद्वंद्वनिषेधपरत्वेन नियमशास्त्रवैयर्थ्यमेव परिभाषो
यां सर्वशब्दग्रहणस्य दोष इत्यत आह द्वंद्वश्चेत्यादिप्रकरणविषयः सर्व इति सर्वनाम्नां बुद्धिस्थपरामर्शित्वान्नियमशास्त्रवैय
र्थ्यान्यथानुपपत्त्या तद्विषय एव द्वंद्वराशिः सर्वशब्देन बोध्यत इति भावः अविशेषेण इत्यस्य लक्ष्यविशेषानादरेणेत्यर्थः
न्यायसिद्धमिति ननु सिद्धान्ते समाहारेतरेतरयोगयोरुभयोरपि समूहस्यैव प्राधान्यादितरेतरयोगे समुदायावयवभेदविव
क्षामूलकतया संपादनीयस्य द्विवचनादेर्विना प्रमाणमनुपपन्नत्वात् कथं न्यायसिद्धत्वमत आह ज्ञापकमिति इदं सूत्रं व्यर्थ

सूत्र

मिति बहुवचनपरत्वविशिष्टं सूत्रं व्यर्थं न तु सर्वथा वैयर्थ्यमेव एकवद्भावे एकवचनस्य द्विवचनविधानाय सार्थकत्वादिति बो
ध्यं तदुक्तं छित्त्वा तस्यापि जातिप्राधान्य एवायमेकवद्भावनियमो न तु व्यक्तिप्राधान्ये तस्यैवं कल्पनया पुलिङ्गतोयोगिककल्पः
द्वोधकत्वस्यापीति तदर्थः यथाश्रुतेऽस्मिन् सूत्रे वैयर्थ्यप्रसंगात् एवं च जातिप्राधान्ये नक्षत्रद्वंद्वाभावात् प्रकृतसूत्रारम्भ

न्तरेवेति व्यक्तिप्राधान्ये समाहारेतरेतरयोगयोस्तोल्येन समूहप्रधाने चेमीतरेतरयोगस्याङ्गत्वावयवभेदविवक्षावलंबेन
द्विवचनादिविषयत्वमित्यर्थबोधनद्वारा निरूढपरिभाषाज्ञापनेन बहुवचनग्रहणस्य स्वस्मिन्नेवोचारितार्थत्वमिति भावः ननु
उक्तज्ञापकात् समाहारस्यैवोक्तावयवभेदविवक्षायां निबंधनं द्विवचनादिकं न चेतरेतरयोगस्येति वैपरीत्यमेव कुतो न स्यादिति चे
न्मैवं समानमध्यममध्यमवीराश्चेति पुंल्लिंगबहुवचनांतप्रयोगस्य पूर्वापराधरोत्तरा इमे इत्यत्र नपुंसकैकवचनांतप्रयोगस्य च स्व
रसतामसंगतिप्रसंगादिति दिक् अत एवास्य ज्ञापकत्वसिद्ध्येन प्रकृतपरिभाषाभ्युपगमादेवास्यार्थः विपरीतनियमो नेति
अन्यथा प्राप्स्यादीनामितरेतरयोगद्वंद्वस्य न भिन्नत्वे नित्यत्वे तु न त्विति स्यादिति भावः एवं च व्यक्तिप्राधान्येनियमप्र
करणविषयस्य घटपटं घटपटाविमादेः प्रकृतपरिभाषोदाहरणत्वं निर्बाधमेवेत्यभीष्टसिद्धिरित्याहुः॥ सर्वेविधयः
छंदसि विकल्प्यंते॥ सर्वशब्दघटितत्वेन विकल्पबोधकत्वेन च पूर्वपरिभाषासाम्यादिति देशप्रकरणमध्ये निरूपणमस्याः
परिभाषाया इति बोध्यं बहुलमिति योगविभागेनेति। स्वतंत्रप्रकरणद्विकरणत्वाभेदव्यत्ययबोधकत्वमित्याशयः युध्यती
त्यादि अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति चेतदुदाहरणस्य प्रकृतपरिभाषायाः साधनपरत्वेनोक्तभाष्येण विरोधाच्चिं
मित्याशयः॥ ॥प्रकृतिवदनुकरणं भवति॥ ॥क्षियः इति सूत्रपत्नं निर्देशाति। क्षियो दीर्घादिति निष्ठानत्वे

धायकसूत्रेऽस्त्यर्थः अनुकरणस्यानुकार्यशब्दस्वरूपबोधकत्वेऽपि क्रियावाचकत्वाभावात् धातुत्वाशास्या तन्निबंधनेयमादे
शोत्थानुपपन्नः प्रकृतपरिभाषां ज्ञापयतीति भावः ननु त्रहस्वांतस्यानुकरणंउत दीर्घस्य वा नाद्यः पंविः राभ्यां नेति त्रेवप
रत्वान् घेङ्ः जी तिगुणस्येव स्येवन्यायतयात्ताऽपि ज्ञाप्यामपि परिभाषामभियुक्तनिर्देशानुपपत्तिपरिहारासंभवात् नांत्यः नि
र्देशादेव दैर्घ्यग्रहणे लब्धे क्षिपुनदीर्घग्रहणस्य वैयर्थ्यापत्तेः एतेन सूत्रे सस्वरस्पष्टत्वात् एवं च क्वचिदजाद्यादेशं प्रात्प
वत्स्य धातोरनुकरणे निष्ठायामिड्यः विशिष्टरूपोऽपलभ्यादुपलक्षणविधयायस्यानादावेनादेशं रूपं तथाविधादीर्घा
तांतं क्षिधातोरित्यर्थः आवश्यकत्वनिर्देशानुपपत्तेर्विरहात्कथं ज्ञापकत्वं तथा च सूत्रशेषभाष्ये अथाप्येतन्नास्तिप्र
कृतिवदनुकरणं भवतीति एवमपि न दोषः धातोरत्याक्षेपसूपं नङ्गनुक्रियन्त इत्युक्तं अत एव क्षियइत्यस्यापि दीर्घविधायकसू
त्रत्वस्यापि नन्निर्देशस्य न ज्ञापकत्वसंभव इति चेत्सत्संकृत दीर्घस्येव क्लिजन्निर्देशो दीर्घग्रहणं तु स्वरूपस्थानि वयत्
विशिष्टस्यानुकरणमिदमिति भ्रमनिराकरणार्थमित्याशयेन ज्ञापनोपन्यासः वस्तुतो भुवो वुग्वोदोर्गियड्यादेरज्ञापकत्व
युक्ता अनुकार्यानुकरणयोरर्थभेदेन भेदादर्थवत्परिभाषा अत्र चत्वा स्त्रीबायायरव प्रकृतेराश्रयणमनयाच श स्त्रीय
स्येव प्रतिधर्मस्यापि देशाद्गनिस्य षमलुकू सूत्रभाष्यवृद्धयोः धर्मियाहरणत्वं सामान्या भत्रबीजं तेनाप्रत्ययादनुकर

णेषु नापूर्वावद्यत्वं न पि भसंज्ञायामित्यादावशास्त्रीयार्थवत्त्वानिर्देशनिबंधनं प्रतिपादितत्वमितिबोध्यं यत्तु गौवित्येमात्रेस
त्र तादृशार्थवत्त्वानिर्देशप्रयुक्तप्रतिपादितत्वाभावः शास्त्राबोधितधर्मानिर्देशाभावप्रयोज्यमिति तदसत्सत्त्व अर्थवत्त्वा
निर्देशाभावेपि शास्त्रीयप्रतिपादितत्वानिर्देशस्य दुर्वारत्वात् तस्मादिहोत्सर्गिकत्ववचनप्रवृत्तिरूपाभ्यां पक्षांतरेण प्रा
प्तस्य त्राकृतवत्त्वारत्वापस्य निवृत्तये वक्ष्यमाणपरिभाषानित्यत्वेन प्रतिपादितत्वानिर्देशाभावरूपे प्रयुक्तः यथा भनु
वृतस्य स्वरूपभंगप्रभीतिस्तु न शास्त्रप्रवृत्तेः प्रतिबंधिका उक्तरीत्या दोषगुणानुपपत्तेः पदत्वादिस्वादौ जन्त्वानुपपत्तेश्चे
ति दिक् अतिव्याप्तेयमिति। इदमनित्यत्वं कार्यभेदेन न तु लक्ष्यभेदेन। एवं चैतद्विषये अतिदिश्यमानधर्मविरु
द्धस्याश्रयधर्मप्रयुक्तकार्याभावइति नाश्रीयत इत्यत्र तात्पर्यं तेन यत्तदेनेभ्य इत्यत्र सदृशादित्वानिर्देशादत्वं स्वाश्रय
तदभावनिबंधश्चैतच्छेषाभावइति सर्वं सुस्थमित्याहुः॥ एतद्देशविकृतमनन्यवद्भवति॥ ॥कार्यकालपक्षेतु
तु यथोद्देशे तु कार्यविशेषानुसंधानमंतरेण नित्यादप्येवं देशात्पूर्वमपरिनिमित्तत्वं तेनांतरंगत्वात् प्रवृत्तायाः प
दसंज्ञाया आनुमानिकस्थानिवद्भावेन समुदाये सुलभत्वात्तेन न्याया पयोगः ननु कार्यकालपक्षेपि तादृश
स्थानिवद्भावेन समुदाये सुबंतत्वमस्ति अपदसंज्ञा सुलभा न च सुबंतत्वस्य संस्कृतत्वेन अशास्त्रीयत्वादन

तिदेश इति वाच्यं स्थानिवत्सूत्रेण षष्ठीशास्त्रीयस्यातिदेशः अत एव प्रत्ययलक्षणसूत्रस्य नियामकत्ववर्णनं भाष्यकृ
तोक्तमुपपद्यते अन्यथा प्रत्ययलोपोत्तरं तत्तत्प्रत्ययांतत्वस्य स्थानिवत्सूत्रेणातिदेशे मनःकल्पनया तत्प्रयुक्तकार्यनिर्वाह
यावत्सत्वस्य तस्य सूत्रस्य कथं नियामकत्वमिति तदनुपपत्तिः स्पष्टैव कथमन्यथा विशिष्टादेशानां वस्सादीनां सु
बंतत्वातिदेशः सर्वत्र परांगवद्भावायं तीत्यादौ प्रकृत्यादिषु प्रत्ययविधानावधित्वरूपप्रकृतित्वातिदेशेन समुदायेतिङं
तत्वमाश्रित्य प्रवर्तमानस्तिङ् तिङ इति निघातः श्च सिध्येदिति इति चेन्न सुप्त्वस्यादेशमात्रवृत्ति धर्मावच्छिन्नप्रकृत्यादेश
स्थानितावच्छेदकधर्मत्वादनल्विधाविति निषेधेन तद्घटितसुबंतत्वस्यातिदेशासंभवरस्यात्रायातु भाष्यकारीय
संतासु यथोद्देशपक्षे वेति नियमस्तु यत्र परस्परविरोधेन संज्ञाद्वयप्रसंगस्तत्रैव बाध्यबाधकभावस्थापनार्थमिति तत्प्र
कृते तद्विरोध इति बोध्यं अंतादिवद्भावाभावादिति इदं प्राचामनुरोधेन स्वमते तत्प्रभयथाश्रयणेप्यंतादिवद्भावस्यात
एव परंतु पौर्वापर्यलक्षणव्यपवर्गस्तेन दुर्लभः तावतैवाभीयादित्यावेर्निवृत्तिरिति न ह्रस्वः प्राप्नोति यत्र दौ स्थानिवद्भावेन
व्यपवर्गाश्रयणात् लत्वमित्यन्यत्रोक्तं एवं च प्रकृते व्यपवर्गस्यानुपयुक्तत्वेन यस्मादित्यादिहितत्वादादिवदंतवत्त्वांतादिवद्भा
वेनाविशिष्टे सुलभत्वात् समुदायपदत्वमक्षतं अत एव बार्धादिकविचारस तेन प्रकृत्याय स्याप्रवृत्तावपि कृत्वात्वादो

ष्टार्थवत्त्वे पदसंज्ञा न स्यात् द्वाभ्यामत्रोमासपर्वरस्यादौ सुब्लुकुत्तरं विशिष्टे समासत्वसंपत्तिरेतत्परिभाषारंभप्रयोजनं तत्रायम
दस्यार्थायां रचौ नस्येव ममप्यर्थवत्त्वेनानुमानिवृत्त्याभिवद्भावेन समुदाये तदतिदेशस्य दुर्लभत्वादियमेव परिभाषा तत्समर्थ
नेकदेशः फलं तु पूर्वत्र न समास इति शास्त्रप्रतिषेधः परत्र तृतीयासमास इति सर्वनामसंज्ञाप्रतिषेधश्च स्यादिद्ध्यं ॥ अन्यव
भेति वक्तं तेन नञ्समासो न तु नञ्समासाद्वृत्तिरिति भावः अथ नञ्समासमासाद्वृत्तिरेवास्तु उक्तरीत्या प्रसज्यप्रतिषे
धाश्रयणे गौरवात् अन्यत्वस्य विरुद्धप्रतियोगिवृत्तेर्न विवक्षणादन्यशब्दो विरुद्धपरः एवं देशविरुद्धशब्दस्तु त
तीयातत्पुरुषेण विरुद्धवाचीति तत्रत्यविरुद्धविवृद्धिवृत्तिः व्यायंत्त भेदस्यार्थसंपत्तौ विरुद्धाविरुद्धयोर्भेदस्य प्रत्यक्षसि
द्धत्वया सादृश्यस्य भेदघटितत्वेऽपि न क्षतिः न चान्यत्वस्यापि स्वीकृतविरुद्धप्रतियोगित्वमपेक्ष्य विरुद्धप्रतियोगिवृत्तवृत्त्यना
यानैचित्यतेनान्यशब्दस्य विरुद्धपरत्वे विरुद्धं स्ववदित्यादावर्थापत्तौ सादृश्यस्य भेदघटितत्वानभ्युपगमेन कथंचिदर्थाप
त्तावप्यतिदेशवैयर्थ्यं दुर्वारमिति वाच्यं स्ववदित्येव सिद्धावतन्यवदित्युक्तेरतिदेशवैयर्थ्याद्विरुद्धप्रतियोगिक
स्यैवान्यत्वस्य विवक्षितत्वेनादोषात् कथमन्यथा प्रसज्यप्रतिषेधवादेऽप्यस्य दोषस्य निस्तार इति चेत् अत्र केचित् पर्युदा
सपक्षे अन्यत्वस्य यावत्प्रतियोगिवृत्त्यप्रसिद्धत्वेऽपि यत्किंचित्प्रतियोगिवृत्तत्वस्य सुप्रसिद्धत्वात् तादृशमेव सामान्येनान्य

त्वंग्रहे तद्विशिष्टाविरुद्धप्रतियोगिकत्वेन तादृक्कक्षायां मानाभावात् न तथ्वकमप्यायां तदा कलिहत्राव्ये तत्पदवृत्त्यादिसमासाद्य
चक्षाणेणिजंतहित्वेपि सुद्दामलिङ्गमत्र स्वभिन्नाव्ययीभावभिन्नबहुव्रीह्यादिदर्शनेन तत्र सुभ्याम्भिसित्वरापत्तेः प्रसज्यप्रति
षेधेतु यत्किंचिदन्यत्वस्य तद्वत्त्वान्यत्वनयानदवच्छिन्नप्रतियोगिताकसादृश्यस्यभेदघटितत्वस्यासिद्धत्वान्नद्धि नञ्प्रतियो
गिताकसादृश्यग्रहणेनतस्याः कृतत्वान्यत्वपि तेन तन्निषेधासंभवः सिद्धेः सादृश्यस्यभेदघटितत्वाभावेपि यत्किंचिदन्यत्वविशिष्टस्य
निरूपितसादृश्यस्य स्वस्मिन्दुर्वारत्वेन तन्निषेधानुपपत्तेश्च गत्यंतराभावेन तन्त्रद्धिकारापादानत्वारणीभूतविरुद्धप्रतियोगिक
त्वेवान्यत्वस्य स्वीकर्तव्यत्वेन न प्रागुक्तदोषानवकाश इति तल्लक्षणसमन्वयः मुद्गाववंति नादृशादिति विकारविशिष्टादित्यर्थः
यत्तु शास्त्रीयविकारविशिष्टादिति तदर्थः अत एव शास्त्रीयविकारविषये राम शब्दस्य ग्राम शब्दार्थबोधकत्वाभावेपि
न क्षतिरिति तदसत् प्राञ्छीव्यतरसत्रदीव्यतिशब्दे वृद्दत्वानुकरणभूतदिव्यच्छब्दस्याशास्त्रीयविकारविशिष्टस्यार्थबो
धकत्वानुपपत्त्यावर्थस्यावधित्वाभावप्रसंगात् न च दीव्यच्छब्दस्येवावावधित्वमस्त्विति तदर्थपर्यालोचनेनेति वाच्यं त
था सत्यर्थानामवधिजातीयानामवधित्वनियमाभावेन तत्तल्लक्षणानामेवानवधिमत्त्वापत्तेः प्राग्दीव्यतोऽणित्यादावणाद्याः प्रकृतयः ताभ्यो
ऽप्यपत्यसामर्थ्येनापवादविषयेष्वुत्सर्गत्वस्याणादेः प्रवृत्तिः प्रसंगादिति भाष्ये एवस्पष्टत्वात् न च निर्देशेनैवानेनलोप

स्यापि बोधनादन्यत्रानुमीयमानानमिव त्रणास्त्रीयत्वे बाधकाभावाद्दोष इति वाच्यं तथा सति तत्स्थानिवत्त्वेनैवार्थबोधकत्वस्य सु-
लभतया तदुपपत्तिसाधकत्वेन प्रवृत्तस्य प्रकृतपरिभाषाज्ञापनपरभाष्यस्य निर्बीजत्वापत्तेः तस्मान्न्यायसिद्धत्वेनोक्तबु-
चिदर्थबोधकत्वाभावोपि सेवयुक्तमिति दिक्। अनयाचानुपूर्वीभेदेप्यविकृतत्वेनाशेषारोपाद्बोध इति भावः इदं मूलं स्थानिव-
त्त्वाविषयत्वे द्रष्टव्यं तद्विषये तेनैव सिद्धेः। अर्थसमाश्रयत्वमिति अर्थस्येमानि आर्थानि साधनानि तेषां समाश्रयेण सम्ब-
न्धेन यत्स्वं संपन्नमित्यर्थः अत एवेत्यस्य लोकन्यायसिद्धाया अप्यस्याः परिभाषायाः शास्त्रे आश्रयणीयत्वादेवेत्यर्थः
ज्ञापयतीति स्तपितायां तु परिभाषायां शब्दलाघवसंपादकतया कथंचिद्विकृतनिर्देशस्य स्वांशोच्चारितार्थबोध्यं एतेन
लोकन्यायसिद्धत्वेन अपास्तमिति लोके विकारकार्ययोरशास्त्रीयत्वेपि प्रवर्तमानस्यास्य न्यायस्य शास्त्रे तन्मात्रवि-
षयत्वेन संकोचकल्पनायां प्रमाणविरह इत्याशयः ननु धोः पंथा इत्यादाविन्द्विधाविति निषेधेन स्थानिवत्त्वप्रवृत्तावप्यने-
न न्यायेन दत्वं न त्वगिदेशमाश्रित्य हल्ङ्यादिलोपो दुर्वार इत्यत आह विकृतावयवनिबंधनकार्ये इति दुरुपपादत्वमिति
ध्वनितमिदमलुक्सूत्रे भाष्ये न त्रिहि रत्नवीयमित्यत्र कादेशेन रमनेनन्यायेनाग्नं न त्वादलोपमात्रं भ्रमम एव तदित्यादौ
श्वयुवेति संप्रसारणवारणाय कात्यायनबोधितस्य नकारस्यापवर्णनेन तद्वारोक्ताव्यंगग्रहणादेपर इति समहितं तन्नेव

{ सद्दनमसावृत्व }

य

मपि भैश्शब्देऽउभयशब्दे स्व निबंधनं सर्वनामत्वं दुर्वारमेवेत्यत आह अनुपरिमाणे यदि अनुं प्रतिके स्वा रूपेण गृहीतं परि
माणमानुपूर्वीविशेषो यस्य तादृशार्थबोधकशब्दग्रहणे इत्यर्थः यद्यपि लौकिके द्रोणाढकादिष्वेव परिमाशब्दस्य व्यवहारो निरूढ
स्तथापि परिच्छित्ति साधनतापुरस्कारेणान्यत्र गणस्येन तद्वर्णानुपूर्वीविशेषेपि तथा व्यवहीयत इत्याशयः उक्तयुक्तेरिति द्रो
णादिपरिमाणशब्द इव त्वां न मुख्यत्वं भाष्यकारोक्तयुक्तेरित्यर्थः एवं चानुपूर्वीविशेषलक्षणो धर्मो नेन न्यायेनातिदिष्ट इति
तात्पर्यं ननु गंगाप्रविष्टनदी इव त्वां न मुख्यत्वेन नेदमदसोरिति सूत्रस्थककारकाभ्यां पर्युदासबोधितेन तन्मध्यपतितन्यायेन य
थापरिच्छित्तिपरिमाणधर्माणां धातुत्वसर्वनामत्वादीनां साम्ये आरोपः तथाडीव्यङ्गणाहादिमनुत्पन्नेनानापि न्या
येन तथाविधानां धर्माणामारोपो दुर्वार इत्यत आह भाष्येत्यादि य इति तत्र अनुपरिमाणानामर्थानां याः संज्ञाः तासां धातु
त्वसर्वनामत्वादीनां द्रोणादिपरिमाणसंज्ञा इव त्वां तेन न्यूनातिरेकाभ्यामन्यथाभावो न शब्दस्वरूपेन प्रवृत्तिनिमित्ताशांश्ये वं तर्हि चा
यप्रवृत्तिनिर्दोषपर्याप्तिजदेव देशाभ्यां संग्रहणे न गौरवं तदित्यदर्यं नेदमदसोरिति सकककारयोरिदमदसोः प्रतिषेधं शास्त्रसमुक्तं
यथोक्तदेशाविकृतन्याय ईदृशे विषये प्रवर्तेत तर्हि न्यूनताधिक्ययोरपि निराकरहेतुत्वाविशेषादनेनैव न्यायेनोपपत्तौ प्रयत्नां
तरानुसरणं भगवतो भाष्यकारस्य परं वैफल्यमेव स्यादतस्तेनेदं ध्वनितमिति भावः अत्रेदं तत्त्वं नेदमदसोरित्यत्र ककारपर्युदा
सः तन्मध्यपतितन्यायं वस्तापयन् सद्विशेषधर्मातिदेशबाधनर्वपाकं तस्यानुपरिमाणग्रहविषयतां नवाधयेत्तर्हि स्वांशेचा

रित्तार्थ्याभावात् ज्ञापकत्वानुपपत्तिः दीर्घग्रहणं चेदेकदेशविकृतन्यायं ज्ञापयदपि अविकृतपदीयार्थप्रतिपादकत्वात्म्यादिरूपसा
मान्यधर्मावच्छेदेन बोधकत्वात्कल्पनयैव कृतार्थत्वादतः परिमाणग्रहणविषयतां न्यायस्य कल्पयितुं न प्रभवतीति। एतेन लोपा
गमवर्णविकारज्ञ इत्यादौ भाष्ये विकारागमस्य पृथग्ग्रहणनाउङ्क्षु भ्रमित्यादिनदीयोदाहरणस्वारस्याच्च रूपान्तरापत्तेरेव वि
कारपदार्थतया श्रमकृचोश्वत्वाभावेन प्रकृतन्यायप्रवृत्तिप्रविषयत्वाभावाद् ऊभाष्यध्वननात् संवेभा। नकृथमतु परिमा
णग्रहणविषयत्वोऽभावो न्यायस्येत्यपास्तं किञ्च अस्तु रूपान्तरापत्तिरेव विकारः परन्तु एकदेशविकृतमिति तृतीयान्तसरूप
वचनात् सामुदायिकत्वासौ न्यायप्रवृत्तावुपयोगी अनरवत्वात् न पाणिपरभाष्यसंगतिः अन्यथा लोपस्याप्युक्तरीत्या विकारपदार्थ
त्वाभावात् न तद्संगतिः स्पष्टैव प्रसिद्धश्च न्यूनांगवद्धिकांगेपि विकृतत्वव्यवहारो लोके देवदत्तो विकृत इत्यादिति नत्वथ
स्तनमकृष्कृत्यविकारस्यापि सामुदायिकत्वस्य न्यायप्रवृत्तिप्रयोजकत्वे बाधकाभावेन युक्तमेवेदं मूलग्रमितिवदन्ति अथैतन्न्या
यस्यानुपरिमाणग्रहणविषयत्वानभ्युपगमे युजेरदवामित्यादौ पूर्वांगवत्त्वेनैकदेशविकृतशिष्टपूर्वपदत्वादकृशब्दस्यानेन न्यायेनऽदक्
शब्दत्वादकृतेदक्केवल इति पूर्वपदान्तोदात्तत्वप्रवृत्तिरित्याशयकं मन्तव्यङ्ग प्रयोजनप्रतिपादनपरं मन्तव्यमिति दिक् सूत्रस्थभा
ष्यं विरुध्येतेति चेन्न पूर्वान्तरपदमिति मितवाच्यान्तपूर्वमन्तरंगोप्येवादेशोनेति परिभाषामादाय तत्रैकादेशः सर्वमेव स्वर

प्रवृत्तेरव्याघातादन्यथासिद्धोदाहरणप्रदर्शनपरस्य तद्भाष्यस्यैकदेशोक्तित्वेनादोषात्। विप्रतिषेधादेकादेशात्पूर्वस्वरप्रवृत्तिराव
श्यकी स्वरितो वानुदात्ते पदादावित्यनेन प्रबन्धसमर्थितमित्यपि तत्रैव भाष्ये स्पष्टं केचित्तु येनाविधिरिति सूत्रस्थभाष्यबलादागमज
न्यविकारस्य प्रकृतन्यायप्रयोजनकृत्याभाव एव कुत्स्यनीयो न त्वन्तुपरिमाणग्रहणस्य अनर्थकत्वाय सावित्यत्रैवादेशेन तरं सा
नस्यांगत्वातिदेशमाश्रित्यनुमापादनपरं तथा मतिरिति थिवूदसत्र दसे स्फेतिलोपो न रं नांतस्यानेन न्यायेनांगत्वातिदेशेन वृद्ध
शापादनपरं च स्थानिवद्भावप्रयोजनप्रस्तावे भाष्यकारानु मचः परस्मिन्निति सूत्रस्थं संगच्छते अन्यथांगसंज्ञासूत्रस्थ
भाष्यबलात् नस्संज्ञाया भत्तुपरिमाणसंज्ञात्वेन तदतिदेशासंगतिः स्पष्टैव तन्नदादानुपूर्वीविशेषस्यांगसंज्ञानिमित्तमिति
तदाशयः अंगत्वातिदेशपरभाष्यस्यैकदेशोक्तित्वकल्पनायां तु क्लेशः किंचैवं पचत्विमादावेरुरितिसूत्रेण त्वसुत्तरं कार्यकल्लप
दशायानेन न्यायेन लिङ्त्वातिदेशादस्येवं प्रतिपादनपरमच्यचः परस्मिन्निति सूत्रस्थभाष्यं कथं संगच्छतां लिङस्यघकपरि
माणसंज्ञात्वं स्फुटमेव तस्माद्यथा त्वपरिमाणग्रहणेष्वनिष्टाप्रकृतन्यायप्रवृत्तिस्तत्र वक्ष्यमाणपरिभाषानित्यत्वमेवशर
णमिति युक्तमित्याहुः॥ नन्वनेनैव न्यायेनैवं सिद्धौ स्थानिवद्भावो व्यर्थ इत्याशंक्याह। यत्रात्वर्धनदीधकुबेत्यादि तत्रा
र्धविवृ रोजर त्वे रस्तु ठत्वूर्ण इत्यादौ नदीधकुविकारागमपर्यन्तादेशेषु तदीय इत्यादौ भातिव्यंजनवृत्ति चिकनाविकनयोर
भेदप्रतिपत्तिसाधर्म्योऽत्रजातिः विकृतानलरूपाति तेन यत्र शब्दादाव्वक्ष्यमाणशिजंताद्विपितिष्यन्नाभ्यद्

इत्यस्मात् स्थानिवत्त्वेनासंजातत्वमाश्रित्यास्मायामेधास्रजो विनिरिति सूत्रात् मत्वर्थे विनिः सिध्यति किंच यत्र सर्वस्यैव
विकारः चिह्नमः कुरुत्सादिना यत्रैव परिच्छिन्नपरिमाणसंज्ञाया अतिदेशस्तत्र स्थानिवद्भावस्य चारणं नचैवमप्यभी
यादिमत्र एकादेशोत्तरमनेन न्यायेन भांतस्य पदत्वाज्जश्त्वापत्तिर्दुर्वार इत्यत आह कुचिदित्यादि अभीयादिति यत्तु भांत
स्योपसर्गत्वादनेन न्यायेनैकादेशोत्तरं नेर्लिङीति णत्वापत्तिर्दोष इत्याशयस्तन्न दसन् परिच्छिन्नपरिमाणसंज्ञायाः प्रकृत
न्यायेनातिदेशमनिच्छतोऽपलकारस्यमते प्रकृतन्यायेनोपसर्गत्वस्य दुर्लभतया णत्वापत्तेर्दुर्वारत्वात् कुचित्तु नैतन्न्याया
श्रयणे प्रयोजनं नच वाप्यश्व इत्यत्र द्वौ सुपू बलुकुत्तरं समासे तत्प्रयोजनमिति वाच्यं कार्यकाले प्रत्ययलक्षणेन सुबं
तत्वमाश्रित्य पुनः समासंज्ञायाः सुवचत्वात् नहि व्यवस्थितयोः पक्षयोरन्यतरपक्षेण लक्ष्ये सिद्धे पक्षांतरेण दोषोपन्या
सो न्यायः तस्मात् पथोद्देशमादायनात्र समास इत्यनुपपत्तिर्दोषः नच ध्वंगुलमित्यादावंतरंगत्वाद् गुणादेशोत्तरमनेन न्याये
न तत्पुरुषत्वाद्गुले दीर[illegible]णिति सामांतः प्रयोजनमिति वाच्यं तादर्थ्यात्तच्छाब्द्यमिति न्यायेन सामासार्थत्वेनैव
प्रक्रियावाक्यादेव समासांतोत्पत्तिनिर्वाहात् नच ध्यूभी इत्यादौ वनजादेशोत्तरं बहुव्रीहौ चातिदेशेन बहुव्रीहेरूधस
इतीनिवृत्तिप्रसक्तिर्नियमिति वाच्यं अनर्ज्विधौ बहुव्रीहित्वस्यैवादेशपनावच्छेदकतया स्थानिवत्सूत्रेणातिदेश

शेषाबाधकत्वाभावात्तच्छ्रुतिविधानसामर्थ्यादेव नत्युपपत्तेश्च न च विभुत्सुरित्यादावभ्यासांशे हलादिःशेषोत्तरं सुत्वप्रत्ययनासंपाद
नेन सुविभक्तिर्दुर्भ्यर्हत्तिषत्वसमर्थनस्य मा न्यायस्य प्रयोजनमिति निवाच्यं एवं त्वग्निसीय मद्द्विर्वचने साभ्यसस्य षत्वोत्तरमेव
द्वित्वप्रवर्त्तनेनादोषात् न चाभ्यासविकारेषु बाध्यबाधकभावाभावेन हलादिःशेषोत्तरमजादिगणादिसत्वाभ्यासांशे गणादु
पगि देशादीचगणहसस्य प्रवृत्तिः प्रयोजनमिति वाच्यं भून एवं गत्वा गणरूपत्वमादायपि जत्वे तस्य सुवचत्वात् किंचाभ्या
सगमेन तत्राग्निजन्योपस्थितिविषयस्यार्थस्य बोधाबोधकत्वाभीमानत्तु न रखंजगनत्राग्निजन्योपस्थितेः प्रतिबंधकत्वात्स्मनया
बोधविषयत्वानभ्युपगमेप्युपस्थितिस्वीकारे बाधकत्वाभाव व्यापदार्थोपस्थापकत्वरूपस्यार्थवत्तस्य सुवचत्वादानुमानि
कस्थानिवद्भावेनैव हलादिः शेषोत्तरमभ्यासांशे गणरूपत्वं ईदृशमेवार्थवत्त्वमानुमानिकस्थानिवद्भावे प्रयोजकमन्यथा
एव चकारेत्यादावुरदत्वोत्तरमर्थविकारे चिन्हितस्य प्रवृत्तन्यायविषयत्वाभावेप्याभ्यासत्वमानुमानिकस्थानिवद्भा
वेनेति निष्कर्षः पुनरभ्याससंज्ञाप्रवृत्तिरप्येतादृशस्थानिवद्भावप्रयोज्य द्विरुक्तधातुपूर्वभागत्वमिति देशेनसाध्यान
स्मादनावश्यकोयं न्यायः अत एव स्थानिवत्सूत्रे भाष्ये स्थानिवदित्येवससंबंधित्वादेवादेशेलब्धेपुनरादेशग्रह
णमानुमानिकादेशग्रहणार्थमित्येवाभ्युपगतेनानुमानिकस्थानिवद्भावेनैकदेशिन्यायः प्रत्याख्यातः एवं च रामवि

स्यादेशपदत्वाय यथोद्देशपक्ष एव युक्तः दीर्घग्रहणमपि विनैव न्यायतः प्राप्तत्वान्नामुपपद्यते अर्थनिर्देशे तु स्वरूपस्यानुपयुक्तत्वा
द्दिग्योगपंचमीमादाय अथ मा सा भा ना धा धि वृ ग्रहणप्रलक्षणेन चात्र प्रत्ययेन तदुपचेप्१ स्पष्टमिदं अत्रैव सूत्रे भाष्ये इत्या
हुः ॥ इदानीमन्तरंगपरिभाषामुपपिपादयिषुस्तदुपयोगाय प्रदर्शयति ॥ ॥ पूर्वपरनित्यान्तरंगापवादाना
मुत्तरोत्तरं बलीयः ॥ ॥ निषेधनिषेधशास्त्रस्याद्दिति एतेन प्रकारान्तरसिद्धमेव बलीयस्त्वं प्रनुधतेनतस्यैव नद
नेन बाध्यत इत्युक्तं वक्ष्यमाणपरिभाषावतरणेनैवैतदुदाहरणं स्फुरति तेषु तदुदाहरणान्तरप्रदर्शनमनुपयुक्तमित्याशयेना
ह नन्वेवं भिंधीत्यादि न तस्थुः भिंतादित्युदाहरणमित्याशयः नोतउत्त बाधितं इति दृष्टान्तप्रदर्शनार्थमेतन्तु धितं स्यादिति
निषेधशास्त्राणां प्रभावांशेऽपि विधीयमानत्वेन तात्पर्यात् तदुपक्षेनेन बाधितः पश्चात्स्थानिवद्भाव नहि तुषौ सत्याम
पि यथा न भवति तथा तदीयाभावांशेन बाधितोऽपि भावः पक्षान्तरेऽपि न स्यादित्यर्थः इदं चिन्त्यं प्रासंगिकभाषा स्वभावांशस्यसि
द्धतया विधेयत्वायोगेन भावांशस्यैव विधेयत्वात् अन्यथा नपरे न इति विधीयमानो नकारः क्विन्तु न इत्यादावनुस्वारं यथा
बाधते तथा तदीयाभावांशः किन्तु नरत्यादावपि तं बाधते भवतनरत्रत्वाशोपाद्दिभाषोपगिसूत्रे भाष्ये चोपग्रहणं व्यर्थमित्याभ्यः
प्रकृतिभ्यः समासान्ताः विधीयन्ते ताभ्यः कुप्रमाभृत् नैतदस्ति प्रयोजनं ये प्रतिपदं विधीयन्ते तेनैव बाधकाभवन्ति भनव

देशोऽस्त्रं तस्य प्रतिषेध इति भाष्यवार्त्तिकयोरपि यक्षानुरूपो बलिरिति सकृद्गतिन्यायेन तस्य स्त्रया च रव्यो तादिर्दिमेहोपन्यस्तं वस्तुनः कुरु
तादित्यत्र परत्वात्कृति स्थानिवत्त्वेन हित्वाद्गुणे च स्थिति दीर्घं तु पूर्वप्रसंगः च तस्त्रः निषण्णीत्यत्र च गत्स्यभावो चरं चतुरनडुहोरित्याम्
प्रसंगश्च। निर्विचिवृत्तो दोषः ॥ सकृद्गतौ विप्रतिषेधेन यद्बाधितं तद्बाधितमेव॥ ॥परस्परविरोधविशिष्टयोर्द्वयोः
शास्त्रयोरेकत्र प्रवृत्तौ सकृद्बाधितं पुनर्न प्रवर्तत इति परिभाषार्थः परिभाषाद्वयमपीदं न्यायसिद्धमेवेति दर्शयति तत्रेत्यादि।
अयं भावः लोकदृष्टान्तस्यापि शास्त्रव्यवस्थापकतया तत्र तत्र प्रामाण्यपरिग्रहीतत्वादिह तु जात्यादिशास्त्रीयदृष्टान्तपरिपन्थिभा
वस्तुन्यबलयोरित्यादिलोकदृष्टान्तस्यानायुक्तः ततश्च परस्परविरुद्धाभ्यामाभ्यामुभयथा विपरिणामादुभयन्यायसिद्धिः लो
कदृष्टान्तात्पुनः प्रसंगविज्ञानं शास्त्रीयदृष्टान्तात् सकृद्गतिन्यायो लक्ष्यानुसारात्सर्वं व्यवतिष्ठत इति अत्रैके यदयः
व्यक्तौ पदार्थे सकृद्गतिन्यायो जातौ तु तस्मिन्पुनः प्रसंगविज्ञानमिति न्यायद्वयसिद्धिमभ्युपगच्छन् तद्दूषयन्ति यत्त्वित्यादिश
ति लक्ष्यं लक्षणोपप्लुवादिति व्यक्तिपक्षे लक्ष्यव्यक्तीनां भेदात् तत्तत्संस्कारकत्वेन प्रातिस्विकतया लक्षणानां भेदः जातिपक्षे तु
सकृल्लक्ष्यस्य तु स्वजात्यात्मना जातिरेव शब्दतो लक्ष्यं तच्चैकमेवेति लक्षणभेदस्योपयोगः किंतु लक्ष्यसंस्कारकमेकमेव मादृशानां
ततश्च व्यक्तिपक्षे सुपि चेत्यादौ रामशब्दस्य दीर्घत्वत्यादिरथो नैकरूपो जातिपक्षे तु दंताग्रस्य दीर्घत्वमेकरूपत्वार्थः जातौ पि

धीयमानं कार्यं तत्र बाधनदाश्रयव्यक्तिषु संक्रामति व्रीहीन् प्रोक्षतीत्यादिभिर्विधीयमानं प्रोक्षणादि कर्मिवेत्याशयः सत्प्रतिप
क्षन्यायेनेति नित्यत्वाभावसाधकेन कृतकत्वरूपहेतुना सत्प्रतिपक्षत्वात् श्रावणत्वहेतुः शब्देयथानित्यत्वं साधयितुमपर्याप्तः
तथा पूर्वपरशास्त्रे च सुपि च बहुवचनेऽस्मिन्नित्येतेन परस्परंविरुद्धत्वात् रक्षेभ्य इत्यादौ स्वस्वकार्यं साधयितुं न प्रभवत इति दृ
ष्टांतसमुच्चयः एवं च शास्त्रचारितार्थ्यमप्रवर्त्तनोहेतुस्तदभावाच्च पर्याप्ततायामपि तेषां निष्कर्षः मानाभाव इति जा
तिपक्षेऽपि सकलव्यक्तिषु प्रवर्त्तस्वभावे सामान्यज्ञाते कार्यविधानमनर्थकमेवेत्यचारितार्थ्यविरोधस्तु पक्षद्वयसाधार
ण इति भावः किंच नायमर्थः प्रकृतभाष्यानुग्रहीतो भाष्ये नरविरुद्धश्चेत्याह न ब्राह्मणमित्यादि सकलव्यक्तिवि
षयत्वार्थमिति व्यक्तिपदार्थतायामेकवचनान्तेन ब्राह्मणशब्देनैकब्राह्मणव्यक्तिबोधनासंभवादसर्वव्यक्तिविष
यत्वं निषेधस्येति भाष्याशयः यथा स्युद्दिश्यगतसंख्याया अविवक्षणेन निषेधस्यैव निगमनाविरहान्निरवच्छिन्नव्यक्ति
विषयत्वं वक्तुं युक्तं व्यक्तिवादेऽपि तथा गौरनुबंध्य इत्यत्रैकवचनापरिच्छिन्नस्यैकत्वस्य गोत्वज्ञानाव्यभिचारित्वेन वि
धेयगतसंख्याया अविवक्षितत्वायोगेन नरव्यक्तिद्वारकेण संबंधेऽस्वीक्रियमाणे जातिवादेऽपि सकलगवानुबंधनाप्र

सत्त्वे नैव कर्मण्यवैगुण्यदोषः तथापि पक्षान्तरेणोपपत्तावुद्देश्यगतसंख्याया अविवक्षा विधेयगतसंख्यायाश्च परंपरया
संबंध इति प्रयासो विफल इति भाष्याशय इति बोध्यं भाष्यस्थस्यावयवेनैतस्य विवरणं साकल्येनेति ऽसर्वगतेरित्यस्य
अलब्धव्यत्वेनेति निखिलव्यक्तिप्रतीत्यभावादित्यर्थः यत्तु व्यक्तिपक्षे विशेषरूपेण वचनोपपत्तावानन्त्यलक्ष्यविषयाणां ते
षां नैष्फल्यापत्त्या लक्ष्यावर्तनेन विधेयस्य सकललक्ष्यव्याप्तिरावश्यकी जातिपक्षे तु लक्षणैक्यात् क्वचिदवप्रसक्तावपि
चरितार्थस्य सुवचतया सति विरोधे लक्ष्यावर्तनमपेक्ष्य लक्षणावृत्तिरेव वरं ऽतो न सकललक्ष्यव्याप्तिः सामान्यशा
स्त्रतो कार्यविधानं च स्वविषयत्वमात्रेण विरोधिशास्त्रान्तराप्रवर्तकतया चरितार्थं न ब्राह्मणं हन्यादित्यादौ च न केनचिच्छा
स्त्रेण क्वचिदपि विरोध इति सकललक्ष्यव्याप्तिरव्याहता ऽतो न प्रकृते तद्दृष्टान्तसंभव इति युक्तमेव कैयटाद्युक्तमित्या
हुस्तन्न सति जातिपक्षेऽपि लक्ष्यसंस्कारकत्वे हि ज्ञातो बाधितो विधिस्तदाश्रयेषु व्याप्रियेतेति तत्र क्वचिद्विरोधिशास्त्रा
न्तरोपस्थितौ प्रमाणाभावेन तदीयवाक्यार्थपरिज्ञानस्य दुर्लभतया सकललक्ष्यव्याप्तेर्दुर्वारत्वात् यदि तूत्सर्गापवादन्याये
न विरोधिशास्त्रसंभावनया जायमानप्रकृतशास्त्रीयवाक्यार्थबोधाप्रामाण्यसंदेहनिवर्तकत्वेनावश्यकत्वे तदीयो
पस्थितिः प्रयुक्तवाक्यार्थपरिशीलनेन तुल्यन्यायात् तद्विरोधित्वेन प्रकृतशास्त्रस्य प्रसक्तस्याचरितार्थत्वादन्यत्र

द्वयोरपि परस्परविषयपरिहारेण प्रवृत्तिकल्पनायामर्थतः सिद्धो विरोधविषये प्रवृत्त्यभाव इत्युच्यते तर्हि व्यक्तिपक्षेप्येवं री
त्या परस्परविषयपरिहारेण वचनोपपत्तिकल्पनायामेतादृशविषये प्रवृत्त्यभावः सुवचः यदि चापवादविषयपरिहा
रेणोत्सर्गशास्त्रप्रवृत्तावपवादशास्त्रवैयर्थ्यं प्रयोजकमिह तु न विरोधि शास्त्रवैयर्थ्यम् अपि तु विरोधमात्रं तत्
स्य च शास्त्रीयदृष्टान्तबलात् पर्यायतावत्त्वकल्पनमेव न तु सकललक्ष्यव्याप्तिप्रतिबन्धकत्वमित्युच्यते तर्हि जाति
पक्षेपि न तुल्यं न देवदत्तादि किं चेति न मानमस्तीति पक्षविशेषानुपक्रमेण भाष्यप्रवृत्तिरित्यर्थः ननु जातिपक्षे दृष्टा
न्तोऽत्र चरितार्थमूलकत्वस्य च विरोधमात्रेण कथं प्रकृते प्रवृत्तिः स्यात् तस्मात् कथंचिद् चरितार्थ्यं संपादनीयं व्य
क्तिपक्षे तत्तद्रूपेण लक्ष्यव्यक्तीनामुपस्थितेः विनिगमनाविरहेण विरोधविषयेपि लक्षणोपप्लवो न्यायः विरोध
स्य शास्त्रीयतया शास्त्रप्रवृत्तिविघातकत्वायोगात् अत एव तत्तल्लक्ष्यविषयकयोर्लक्षणयोः चरितार्थ्यं संभवती
ति प्रकृतदृष्टान्तसंगतिः जातिपक्षे तु व्यक्तीनां शब्दानुपस्थितेरेवं किं तु जातिमात्रस्य तत्र विरोधात् तदाश्रयव्य
क्तिषु क्रमेणावतरतो विधेर्यत्र विरोधाभावस्तत्र वृत्तिचरितार्थ्यात् विरोधविषये नेत्र दृष्टान्तसंगतिरतः

कैय्यट उद्भावितो युक्तश्च भाष्याशयश्चेति चेन्नहि वैपरीत्यमेव कैय्यटोक्तिराषधे तस्याशयेनाह अपिचेति क्वचित् पक्षेपीति।
अत्र पक्षे हि व्यक्ती नामानं सामान्यं ग्राह्यत्वं वाक्यानुरोधेन लक्षणापक्षे च वृत्त्यनायाव्यक्तत्वाद् उपस्थितेन लक्ष्यानुरोधिनी
लक्षणवृत्त्यनानन्तश्च परस्परविरोधेन कार्यद्वयप्रवर्तनेवृत्तयो शास्त्रयोरन्यत्र विरोधाभावे चरितार्थयोरानर्थक्यभीत्यभा
वेन तादृशं लक्ष्यं स्वानुपस्थितिद्वारा स्वविषयत्वं लक्षणं नोपपद्यत इति भावः जातिपक्षेपीति अस्मिन्पक्षे संग्राह्यत्ववाक्यजन्य
बोधविषयलक्ष्यलक्षणानुरोधेन लक्ष्यवृत्त्यनायानि किंचिद्बाधत्वं तथाच शास्त्रप्रवृत्तियोग्यलक्ष्यवृत्त्यनानां जातिरेकैवेति
त्वं साचाविरोधविषयेपि कथं तस्य परित्यागः विरोधो वा न शास्त्रप्रवृत्तेः प्रतिबंधकत्वमिति तेषामुपस्थापकतेति भावः विनिगमना

वर्तनेरेवेति

भावइति इत्यपि वक्तुं शक्यमिति शेषः तस्मादिह चरितार्थ्यम चारितार्थ्यं वा न विवक्षितं किंतु विरोधमेव पुरस्कृत्यप
क्षद्वयेपि शास्त्रप्रवृत्तो लोके दृष्टान्तः पर्यायतायां च शास्त्रीयदृष्टान्तो अत्रैव भाष्यकारैरिति युक्तं अतएव शास्त्रप्र
वृत्तिप्रघट्टके प्रकृतसूत्रे भाष्ये तव्यदादिषु नियमवृत्तितया शास्त्रस्य परस्परविरोधेन धातोर प्रवृत्तिरित्येवं रूपो दोष
उद्भावितः चरितार्थस्यैव शास्त्राप्रवृत्तिप्रवर्तकत्वे हि तेन तव्यदादीनां धातुमात्रात् लब्धापि विरोधपरिहारेण चरितार्थ
स्य दुर्लभतया तदनुपपत्तिस्पष्टैव विरोधस्यैव तत्प्रयोजकत्वे तु वर्तत एव तव्यदादीनां तुल्यबलविरोध इति हृत। पतितेरि
त्वादुः ननु तुल्यबलविरोधस्यैव शास्त्रे दृष्टान्तद्वयस्यापि प्रवृत्तिहेतुत्वे सर्वत्रैव द्वयोः प्रसंगात् परस्परविरोधाच्छा

रस्त्रीयत्वया प्रबलेन तत्त्वादिदृष्टांतेन तस्येव दृष्टांतस्य बाध एव स्यात् चरितार्थाचरितार्थयोः सामस्येनेति हेतुस्तेनु विभक्तवि
षयत्वात्तायं दोष इत्याशंकायामाह तत्रेत्यादि लक्ष्यानुरोध एव तयोर्दृष्टांतयोर्विषयविभाजकस्तया बाध्यबाधकभावं नि
रावर्तुं प्रभवतीति निष्कृष्टोयं चरितार्थाचरितार्थापर्यालोचनापरिष्कृतार्थ इति भावः यत्तु विरोधमात्रेणैव तत्त्वादि
दृष्टांतस्यात्र शास्त्रे पर्यायनियामकत्वे सामान्यविशेषयोरपि पर्यायतापत्त्या बाध्यबाधकभावविलयप्रसंग इत्या
हुः तदसत् तत्र वैरोध्यादिरूपन्यायविशेषेण तत्र बाध्यबाधकभावस्य सुवचत्वादित्यादि ननु विप्रतिषेध इति सूत्रे
भाष्ये द्वौ प्रसंगावन्यार्थौ वेककस्मिन् स विप्रतिषेध इत्युक्तं प्रसज्येते इति प्रसंगौ विधी इति कैय्यटेन व्याख्यातं ततश्च एकस्य
कार्यद्वयप्रयोगो विप्रतिषेध इति पर्यवसन्नं तादृशस्य विप्रतिषेधो दक्षेभ्य इत्यादावेव स्यात् कारस्य सदीर्घाभ्यां यो
गाहृत्तत इति युक्तं प्रतिषेधसूत्रस्य परबलीयस्त्वनियामकत्वं शिष्टादित्यादौ तु तातङ्त्त्वाभावयोः कार्यभेदाद्विप्रतिषेधा
भावेन कथं परबलीयस्त्वमत आह द्वयोरित्यादि एकोगुणवृत्तिसूत्रे कैयट इति इदं भाष्यस्याप्युपलक्षणं तत्रापि द्वयमर्थोद्द
स्यतेऽशिष्टादित्यादावपि विषयसप्तमी एवंविधरूपसंपादितात्स्कौर्विक प्रक्रियावाक्ये इति तदर्थः स्वस्मिन्निमित्तानंतर्या
संभव इति अयमसंभवः कार्यित्वेन तत्त्वयायोगपद्यासंभवप्रयुक्त इति इदं त्वं एकस्थानिसंबद्धस्येति ननु सर्वैर्गीसा व्यं

दीर्घयथारोपधयोर्द्वयोस्स्थानिनो रेकृरमागमनिवार्यत्वं तथा नान्तराधिभावयोरेकस्थानिनिवर्तकत्वमविरुद्धं क्रमेण च तयोः प्रयोग

इत्यत आह अंगरूपनिमित्तानन्तर्यस्य चेति अंगानन्तर्येण ह्रस्वोच्चारणप्रसंगे विधीयमानस्यादेशस्यान्[illegible]नन्तर्येणैव प्रयोगस्था

था

वरूपकत्वेन युगपत्संभवत्तयोः नान्तराधिभावयोरुभयोस्तदानन्तर्यमसंभवतीति भावः नुम्नुटोरिति वारिणामित्यादौ विशेषो

षः एवं प्रियत्रीष्टनीत्यादौ नुम्नुड्वत्ताभ्यां युगपदेकस्य स्थानित्वं यत्र विद्वित्तयोरसंभवान्न बोध्यं अन्यत्र विस्तर इति यत्र पूर्वपर

त्रगस्त्राभ्यामेव बाध्ये बोध्यते यथा वृत्तेत्यादावस्थानि सनेन सर्वनामस्थाने चेसनेन च दीर्घः यत्र चैकस्यैकनिमित्तानन्तर्यविधान

कृतं नान्यस्य यथा राजेत्यादौ हल्ङ्याब्भ्यो लोपस्य दीर्घनिमित्तानन्तर्यविधानकृतं न तु दीर्घस्य हल्ङ्यादिलोपनिमित्तानन्तर्यवि

धानकृतं नादन्त्रोषु प्रवृत्तिबीजाभावान्न विप्रतिषेधशास्त्रस्य व्यवस्थापकत्वमिति स्पष्टं सरवरादौ विस्मर्थः ॥ [illegible] ॥ विकरणे

भ्योऽनियमो बलीयान् ॥ ॥ परत्वादिति । प्रार्थधातुकनियमस्य चानित्यविकरणानां च चारितार्थ्यमिति तुल्यबलत्वं पूर्व

परशास्त्रयोरिति भावः ननु सामान्यतो स्यादेशेषु कृतेष्वनियमात्सर्वमिदं नियमानन्तरमपि विकरणप्रवृत्तेः सुवचतया कृताकृत

प्रसंगित्वेन विकरणानां नित्यत्वसंभवात् कथं परत्वोक्तिरिति चेत्सत्यं यस्मिन्लक्ष्ये शास्त्रान्तरप्रवृत्तिसाधारण्येन स्वस्य प्रसं

गस्तत्र नित्यं इह तु नियमस्यानिवृत्तिरूपत्वात्तत्र प्रवृत्त्यानिवर्तनेन लक्ष्ये विकरणप्रसक्तिरसंभावित एव कथं तत्र लक्ष्यान्तरे

तनोऽनित्यत्वाभावइत्याशयः यदि तु नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिरुच्यते निषेधमुखेन प्रवृत्तावात्मनेपदादीनां वि
रुद्धलक्षणयातद्भिन्नपरत्वे कृते तु तत्र सामान्यतः प्राप्तस्यैवात्मनेपदादेः पुनर्विधानबलादुत्सर्गशास्त्रस्य तद्विषये संकोचकल्प
नायामनिष्टनिवृत्तिवदर्थतः सिद्धा तन्निवृत्तिर्वर्तमानमेवैधतेत्यादिनियमशास्त्राणां लक्ष्यं तत्र नियमशास्त्रप्रवृत्तेः पुन
रविकरणप्रसक्तेरविरोधात् पुनरेव नित्यत्वं विकरणानामिति चेन्न दर्शितदनादरेणायं ग्रंथ इति बोध्यं तङ्विधानं ज्ञापकमि
ति यद्यपि तत्र दोषात्तदनन्तरीसतः परस्मैपदस्य वाक्यप्रयुक्तत्वेनात्मनेपदस्य च संबंधात्परस्मैपदस्यैव विभाषया विधानं शब्दो
लभ्यते तथापि तङ्विकल्पः फलतीत्याशयः यद्वा भतङ्विधानं परस्मैविधानमिति तदर्थः सामान्यशास्त्रेणोभयसि
द्धेरिति। उत्सर्गसमानविषयत्वादपवादानां त्वादेशोनन्तरमेव शाबाधपवादस्य प्रत्ययस्य प्रवृत्तिरित्याशयः ननु ज्ञापितायां
परिभाषायां नियमप्रवृत्तिवेलायां अस्य प्रत्ययपरत्वासंभवेन विकल्पाप्रवृत्तेर्नियमस्य निष्पत्तिपक्षे तद्विकल्पासिद्धिः न च परि
भाज्ञापनेन कृतार्थस्यापि विकल्पविधानस्य तक्रकौंडिन्यायमूलकत्वेनापवादत्वे बाधकाभावादुपजीव्यमाणन्यायसहकृ
तेन तेन नियमबाध इति वाच्यं तथा सति नियमात्सर्वमेव विकरणप्रवृत्तिरिति तद्व्यवधानात्तक्रकौंडिन्यायमूलापवा
दविषये पुनरुत्सर्गप्रवृत्त्ययोगाच्च सामान्यशास्त्रविहितस्य पदद्वयस्य सुलभतया विकल्पविधानवैयर्थ्यात् अथ

कथं स्वांशे चारितार्थ्यमत आह विषयसप्तमीति यावता विनानुपपत्तिस्तावत इति न्यायात् विषयसप्तमीत्वमपि ज्ञाप्यते तेन तश्च नियम
मबाधनेन विकल्पविधानस्य स्वांशे चारितार्थ्यं सुवचमिति भावः भाष्यकैयटयोरिति नत्वहि परत्वाद्विकल्पेषु विकल्पैर्व्यवहि
तत्वान्नियमाप्राप्तेरिति नेष दोषः आचार्यप्रवृत्तिर्ज्ञापयति विकल्पेभ्यो नियमो बलीयानिति यदयमनुपसर्गाद्वेति विभाषां शा
स्तीत्येवोक्तं भाष्ये कैयटेतु एतच्च विकल्पविकल्पविधानं लिट्लिङर्थं चक्रमे चक्राम क्रम्यात् क्रंसीष्टेति तस्माज्ज्ञापकं दिक्प्रदर्शि

स्य

नाभाष्यकृता ज्ञापकं तु वदस्यैवेत्यस्य नोरित्यत्र स्पृशविभाषाविधानमित्युक्तमिति दिक् अत्र पक्षे स्वेदंस्य विषयसप्तमीत्वस्वी
कारेणानिष्टपरिभाषाया बाधकल्पनायां गौरवमतो लाघवसहकृतं पक्षान्तरमाह विकरणव्यवधानेपीति चोदेशिन इति नन्वत्र हि
उपसर्गपूर्वस्य नियमे अड्व्यवायउपसंख्यानं म्यवर्शिषि लेति विकल्पनेन बाधितेन तदुपपादनाय भाष्यकारेणोक्तं अत्र खल्वा
देशे कृते। त्रीणि कार्याणि युगपत्प्राप्नुवन्ति विकरणागमो नियम इति तत्र यदि सर्वत्र पूर्वं नियमो लभ्येत तत्तु न लभ्यमिति
यद्वीयं परिभाषा स्यात्तर्हि तदसंगतिरेव विकरणात्पूर्वं नियमप्रवृत्तौ बाधकाभावात् तथा च भाष्यकारः प्रकृतमर्थं ध्वनयतीति
भावः कैयटेतु स्पष्ट एवायमर्थः नत्वहि न तु विकरणेभ्यो नियमस्य बलीयस्त्वं साधितं न तु किमुच्यते ननु न लभ्यमिति उच्यतेऽ
न्यथापि ज्ञापकं समर्थयितुं शक्यते कृतेपि विकरणे अनव्यवायकरत्वं अत्र पक्षे स्वेड्स्य परसप्तमीत्वेपि न क्षतिः स्वस्य यथा
व्यवहितपूर्वत्वात् विकरणव्यवहितस्य लस्य सर्वत्र संभवात् न तु विकरणेभ्यो नियमस्य बलीयस्त्वेपि नियामकं चादेरागमः तद

पेक्षयानित्यत्वाद्धिकरणः नतोवस्तीयस्त्वान्नियमइतिकृतश्चेवूणनियमस्यपूर्वमप्रवृत्तेरितिभाष्याशयात्त्वुथनुपदर्शितार्थध्वनिः न
चनियमस्यापरनिमित्तवृत्तेनांतरंगत्वादडागमपरस्यत्वात्पूर्वमप्रवृत्तिप्रयोजनवृत्त्वायोगेनचत्र्यूवृत्त्याप्रसक्तेरितिवाच्यं नथाविधांतरं
गस्य तत्र स्त्रीवाकृरैवीकरणाद्डागमात्पूर्वमेवनियमस्य सुवचत्वयात्वुथमात्मभोक्तरितिभाष्यासंगतेः प्रकृतपरिभाषास्युपगमवै
यर्थ्यापत्तेश्च नच चत्र्वृत्तदोषस्यैवनियमशास्त्रीयप्राथमिकप्रवृत्तिप्रतिबंधकत्वे चत्र्वृत्त्युद्दिष्टतावच्छेदकेति तत्र तत्र भाष्यकारो
पदर्शितरीत्यैव प्रकृतेपिदोषनिवारणसंभवे तदवष्टंभेनवार्तिककारंभस्य प्रकारांतरेण तच्छस्माख्यानसमारंभस्यस्यैव भाष्यकृ
तोनिर्बीजत्वापत्तेरितिवाच्यं यत्रशास्त्राणांपुनःप्रवृत्त्या त्वकृतचत्र्वृत्त्याणलक्ष्यस्यापरिनिष्ठितत्वप्रसंगो यथाप्रार्च्छदित्यत्रासात्
वृस्यच्छिभावेपुनराट्पुनश्च ऋच्छिभाव इति तथाविधेयविषये लक्ष्यानुरोधिनाल्लक्ष्येलक्षणन्यायमित्यनेन कथंचिदप्युप
गतात्तशास्त्राणांपुनप्रवृत्तेर भीष्टव्यवस्थापनायैवभवतिनात्तुनिष्पादनायेति चत्र्वृत्युद्दिष्टतावच्छेदकस्यार्थः इहतुपरस्य
एविरुद्धैर्हेतुभिः नवृत्स्यापिशास्त्रस्य लक्ष्येत्रप्रवृत्तेरिति वैषम्यान्नास्ति नादृशसिद्धान्तविषयत्वमित्याशयात् अत्राहुः नियमशा
स्त्रीयप्राथमिकप्रवृत्तिप्रतिबंधकं चत्र्वृत्त्यमित्यैवयदिभाष्यकाराशयः स्यात्तर्हि प्रागुक्तवार्तिककृतस्याख्यानपरत्वदुक्तयुक्तयंथैविरुध्येत
तत्र नैर्मैराड्त्यादावुपसर्गस्य षष्ठ्यंतनामाश्रित्य तथोक्तार्थवाचकत्वाभावादिति स्थिते न व्यवधानेपिनियमप्रवृत्तेरित्युपसंहृतंनहितदा

वनाचकृतदोषो निरस्तः प्रथममजागमप्रवृत्त्यानुपायाभावान्न येन नद्रुपप्राप्तिः स्यात् किंच प्रवृत्तत्वेन प्रथममजागमप्रवृत्तस्य योगादद्रुवा
योपसंख्यानमिति वार्त्तिकं वा कथं संगच्छतां तस्मादुपक्रमोपसंहारबलेन परिभाषानादर एव भाष्याशयप्रतीतेर्युक्तमेवमुक्तोक्ता
मिति ननु परिभाषाज्ञापनपक्षे स्येदस्य स्वविषयसप्तमीत्वकल्पनायां तस्मिन्निति परिभाषाबाधः इदानीं तु विकरणव्यवधानेऽप्र
वृत्तिकल्पनया तस्मादिति परिभाषाया बोधः इति नास्ति विशेषः न च विषयसप्तमीत्वकल्पनायामव्यवहितत्वपूर्वत्वयोर्द्वयोरप्यंश
योर्बाधनात् तस्मिन्निति परिभाषायाः सर्वांशेनाबाधः व्यवधानेऽप्रवृत्तिरिति कल्पनायां तु व्यवहितांशस्यैव बोधो न तु परत्वांशस्य सां
शबोबाधस्तस्मादिति परिभाषायाः इति लाघवमिति वाच्यं विषयसप्तमीत्वकल्पनया तस्मिन्निति परिभाषायाः सर्वांशेनाबाधः
क्वचित्तु व्यवहितप्रवृत्तिकल्पनया तस्मादिति परिभाषाया अंशिकबाधस्त्वनुदात्तङित इत्यादिषु बहुप्रदेशेष्विति लाघवान
वकाशात् यदि च स्थादेशोत्तरं स्यतास्योः प्रवृत्तौ येन नाप्राप्तिन्यायेन स्वविषये सर्वत्र प्रसक्तस्य त्रासो बाधनेन भविष्यति भविता सा
दौ चरितार्थस्तयोर्द्वित्वे विष्यति देवितेत्यादौ परत्वाच्छ्नादिभिर्बाधो माभूदित्येव स्यमभ्युपगन्तव्येन आर्धधातुकानुवृत्त्यादि नास्य
तास्योर्लावस्थायामेव प्रवृत्तिरिति स्यतासीलृलुटोरिति सूत्रस्थाकारसंमतेस्तिसिंश्चानेत्यादेरविधोपातात् रित्यस्य विहितपंचम
न्ताया सकलमनसाधारण्येऽप्यनुदात्तङित इत्यादेर्दिग्योगपंचम्यंततया नियामात्रावृत्त्या वैयर्थ्यमाश्रित्यस्यापि कल्पयित्वा

नेन कथंचिदुक्तपरिभाषाज्ञापकत्वसमर्थनेपि स्वामित्वोपचरितार्थसंभूपन्नयेनियमशास्त्राणांहि विशरणव्यवधानेपि प्रवृत्तिरित्यर्थज्ञा
पनस्यापि वृगलेपनितत्वेन लाघवोत्प्रथमनत्स्य तदर्थज्ञापनेन निर्वाहात् परिभाषाज्ञापनपक्षो नयुक्त इत्युच्यते तर्हि नियामकत्वपक्षेनि
यमशास्त्राणां व्यवहितप्रवृत्तिज्ञापनेभिन्नवाक्यतया नियामकेषु अनुदात्तङित इत्यादिषु बहुषु तस्मादिति परिभाषाबाधकत्वमेव
मपरं च तदुपपत्तये लादेशविधौ धातोरित्यस्य व्यवहितपंचम्यंतत्वकल्पने मनिगरित्वेन प्रकृतज्ञापकेन वेतिगौरवं लादेशविध्येक
वाक्यतया नुदात्तङित इत्यादीनां विधायकत्वाभ्युपगमे तु लादेशविधिघटकस्य धातोरित्यस्य व्यवहितपंचम्यंतत्वकल्पनामात्रेण त
द्विशेषणीभूतेष्वनुदात्तङित इत्यादिषु नानिरिक्तत्वेन तस्मादिति परिभाषाबाधकत्वं नेति लाघवं तस्मादयुक्त एवायं नियामकत्व
पक्ष इत्यस्वरसादाह वस्तुत इति विहितपंचमीति विहितशब्दाध्याहारप्रयुक्ता तदर्थाश्रितपरत्वनिरू[illegible]पितावधित्वबोधिका
पंचमीत्यनुदिक् शब्दाध्याहारप्रयुक्त तदर्थनिरूपितावधित्वबोधिकेत्यर्थः इदं च विषये पंचमी तु यस्मादित्यस्य विधिरिति निर्देशबला
दित्यवगंतव्यं यत्तु विहितशब्दाध्याहारेण तदर्थभूतविधानक्रियानिरूपितअवधित्वबोधिकापंचमीत्यर्थ इत्याहुः तदसत् वि
धानस्यावधिनिरूपकतायाकुत्राप्यदर्शनात् तथा योगपरत्वानपेक्षया स्वातंत्र्येण पंचम्यनुशासनकल्पनायां विप्रस्य विहितं तस्त्रतमि
त्यादावतिप्रसंगाच्चेति न किंचिदेतत् पूर्वमेवेति सार्वधातुके परतः शब्दादीनां विधानादित्याशयः नियम इत्यस्य आत्मनेपदपरस्मै
पदेव्यवस्थेत्यर्थः अत्र पक्षे परिभाषात्वमनुदात्तङित इत्यादीनां तद्द्वारेणैवेषां लादेशविध्येकवाक्यताज्ञापनात् तदुक्तमनुदात्तङि

तदुक्तं च भाष्ये यदीयं परिभाषा विज्ञायेत निर्दिष्टं कृतं भवति कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं ॥ लस्यानिवादयो भवंति
इत्युपस्थितमिदं भवति अनुदात्तङित इति भाष्यवार्त्तिककारौ इत्यमित्याधु पलक्षणं यथोद्देशपक्षे ङित इत्यत्र स्थित्वैव यदशीला
विध्येकवाक्यतायास्तु वचत्वात् परं तु यथोद्देशपरिभाषादेशविध्येकवाक्यतार्थकालं तु प्रदेशरवेति भागुपदर्शितो विशेषः ननु
धातोरित्यस्य स्याधिकृतत्वं पंचम्यंतत्वमनुदात्तङित इत्यादीनां च परिभाषात्वं कल्पनीयमस्त्वेवाचापि पक्षे कूत्राद्यस्य त आह यद्वेति उ
मात्रापेक्षत्वादिति। लकारघटितसमुदायानपेक्षत्वादित्यर्थः लकारविशेषापेक्षत्वादिति लकारविशेषोपस्थापकं तल्लुङ्रूपस
मुदायापेक्षत्वादित्यर्थः एवं च शब्दतः स्यादिनिमित्तभूतलुङ्रूपसमुदायघटकनिमित्तकत्वात्तिबादीनामंतरंगत्वं तद्घटितस
मुदायनिमित्तकत्वाच्च स्यादीनां बहिरंगत्वमिति भावः एतेन सामान्यापेक्षाद्विशेषापेक्षं बहिरंगमिति वक्ष्यमाणत्वादिदं
चिंत्यमिति सपास्तं अथ अत्राक्षेपः स्यस्य सतोरित्यस्यानिवादिविध्येकवाक्यतायां अनुपपत्तिः लादेशात्पूर्वं स्यस्य तस्यानुवृत्त्या
स्यपरत्वासंभवात् एकवाक्यत्वानभ्युपगमे च लादेशविध्येकवाक्यतापन्नेनानुदात्तङित इत्यनेनांतरंगत्वादात्मनेपदे लकाराभा
वात् स्यपरस्मैपदविकल्पविधानस्यानुपपत्तिरत आह अत्र पक्षे इति यद्वेतिपक्ष इत्यर्थः विषय इति व्यायल्वमिति
विषयसप्तमीति भावः यद्यपि पूर्वस्मिन्पक्षे विहितत्वं पंचम्याश्रयणं तत्र तु विषयसप्तम्याश्रयणमिति नाप्तिताप्तवेगौरव
कृतो विशेषः तथापि विहितत्वं पंचम्याश्रयणेन तस्मादिति परिभाषाबाधः तत्तच्छास्त्रैकवाक्यतापन्नेषु बहुषु वाक्येषु

विषयसत्त्वमाश्रयणेन तस्मिन्निति परिभाषाबाधः क्व चेदेवेति लाघवमिति तण्ढभिसंधिः क्वचित्तु लावस्थायां स्यतादीनां वि
हितपंचम्या चेति वादयद्रस्येवस्तुतं अन्यथा देविता देविष्यता सादृश्यवं नरंगत्वान्तिवादिषु प्रवर्तयिष्यमाणयोः स्यतास्योः स्व
विषये सर्वत्र प्रसक्तस्य शायो बाधनेन तत्कार्थयोः परत्वाच्छ्यनादिभिर्बाधावमिति भाष्यवार्त्तिकयोरदूषितं दोषस्य दुर्वारत्वापत्तेः
यदि तु स्यतादिविध्यौत्राबूयहणानुवृत्तेर्विभक्तिविपरिणामाभ्यां स्यतादीनां शावादेशत्वाभ्युपगमेन तद्दोषपरिहारस्तु चोक्ते न
हि क्वचित्स्यस्य एव विकं चदो... नामुक्तप्रकारेणानंतरंगत्वात्प्रथमतः प्रवृत्तिरिसंपियुक्तं स्यतास्योरपि तत्र लुङ्ंशो भानिपदोन्तत्वे
नांतरंगत्वस्य सुवचत्वात्तत्त्वोभयोरंतरंगयोः परत्वं व्यवस्थापकमिति पूर्वेति वादयदृतिवाच्यं स्यतास्योः कृताकृतप्रसंगि
त्वेनेति नित्यत्वात्तिवादयो हि स्यतास्योः प्रवृत्तौ न ध्वंवथानात्तुवारस्य न प्रवर्तंनत इति नित्याः अपि चेद्दिग्योगपंचम्याश्रयेऽवि
शिष्टेन्यादौ परत्वात्स्यतिपदोत्तरत्वाच्च प्रथमतः सीयुडिधातो रव्यवहितस्य निर्दिश्यमानस्य लस्याभावात्लादेशानामप्रवृत्तिरिति
स्यात् माभूदात्मनेपदेति सूत्रे भाष्ये नस्मादिह यद्देव्यादिपक्षे ध्विंस्यदृस्यातुः अथात्मनेपदवाक्यताया असंभवः आत्मनेदपर
स्मैपदसंज्ञाभ्यां विधानं विहितानां च तत्संज्ञेत्यन्योन्याश्रयादत आह आत्मनेपदशब्दादविति भविसंतेति भविष्यदा
त्मनेपदादिसंज्ञास्तत्योग्यावति वादयो भवंतीति वाक्यार्थ इत्याशयः इदामेनी वाक्यतापक्षस्य प्राशस्त्यबोधनाय इति
या मतत्वपक्षे गौरवमुपपादयति भिन्नवाक्यतयेति अंगीकार्येति यदि च लुङादिभिरनुसन्निरेवान्वाख्यायत इति

नन्वदृष्टांतनवृत्तेनेनियमशास्त्रेपि सामान्यशास्त्रसंकोचो नतुस्यान्नियमोनेति रुच्यते नोर्हिनियामकत्वपक्षस्येव विलयः स्यादाश
यः नैयर्थ्यापत्तेरिति नद्वैयर्थ्यमेव मुक्तं वंतम्मितिन्यायाश्रयणेवीतमितितत्वं नतु नियमशास्त्रवैयर्थ्यादिदूषणापक्षए
वस्वीकृत्य तामित्थं वस्तुतस्तु वंतम्मिति न्यायोप्यादृतस्वभवतीति किंभिन्नवाक्यतयानियामकत्ववृत्सतया तत्राहष्याविततमिति
स्थानेंतरतमइति सूत्रे भाष्ये इति तत्रहि स्थानेंतरतम सूत्रस्य भिन्नवाक्यतया शास्त्रांतरस्य संदेहे निवर्तकत्वमुक्तं न
मितिन्यायविरोधेनाज्ञानिवृत्त्युपयोगात् शास्त्रवैयर्थ्यमापाधसमाहितं उक्तवाक्यमुक्तं सिद्धं तु अष्टध्यायी वृत्तपाठादिदसेकवा
क्यतापक्षेण तत्र पक्षांतरस्यानुक्तत्वात् तेनेति वाशब्देनायमेवार्थः सूचित इति भावः नतु शास्त्रवैयर्थ्यमेव पक्षांतरं किं न
स्यादत आह शास्त्रानर्थक्यमित्यादि वृद्धिसंज्ञासूत्रे भाष्ये इति तत्रहि प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावव
काशे प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म तत्राशक्यं वर्णेनाप्यनर्थकेन भवितव्यं किं पुनरियता सूत्रेणेत्युक्तं
नन्वेवं स्याः प्रकृतेनैवैषां त्यदादीनामव्यवहितपरत्वेनोपस्थितेरेव दुर्लभत्वात् कथं नियमेनेत्याशंक्य निवृत्तिरत आह सामान्य
शास्त्रेणेति अन्यत्र विस्तर इति इदं तु बोध्यं विकरणेभ्यः पूर्वं ल्लादेशाः सामान्यविहितानां च अनुदात्तङित इत्यादि
नानियमेनेनिवृत्तिरितिपक्षे सति ज्ञापकस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इत्यस्य नापूर्वं चेत् तास्यनुदात्तेत्लादिना तासेः प
रस्य लसार्वधातुकस्य विधीयमानानुदात्तत्वं ज्ञापकमिति वक्तुं शक्यत्वात् लादेशेभ्यः प्रथमतो विकरणा एव बाध्यन्ते

याचश्चिन्हितपंचम्यांविधानमितिपक्षेपश्चात्प्रवर्तमानलसार्वधातुकप्रत्ययापेक्षयाचानवकाशभायानत्रप्रवृत्तस्यनासिद्धरस्यतापत्त
त्यासंवाभावादपूर्वत्वमेवोक्तार्थस्येत्याहुः ननुपरान्नित्यस्यस्यबलीयस्त्वंकुतइत्यतआह कृताकृतप्रसंगित्वादिति तत्रोनिप
रनित्ययोरित्यर्थः नित्यस्यबलवत्त्वेबीजमिति नचयंलौकिकोन्यायः कथंप्रतिषेधशास्त्रंबाधतेसत्यंचरितार्थाचरिता
र्थयोरिवकृताकृताभाववत्त्वाकृताभाववतोरपिप्रबलदुर्बलभावस्यस्वतःसिद्धतयातन्नादिदृष्टांतस्यलोकदृष्टांतस्यवात्र
वर्णयितुमशक्यत्वेनविधायकत्वप्रतिनियामकतयावाधिप्रतिषेधशास्त्रप्रसंगत्वशास्त्रस्यप्रथमप्रवृत्तिप्रयोजकत्वमचा
रितार्थस्येवनित्यस्यापितियुक्तमित्याहुः॥ ॥कृताकृतप्रसंगिनित्यंतद्विपरीतमनित्यं ॥कृताकृतयोःशा
स्त्रांतरप्रवृत्त्यप्रवृत्त्योःप्रसजतीतिकृताकृतप्रसंगि यच्छब्दजितसंबंधितयेति यथापिबंतीत्यत्रशबंतयोःपररूपं
तथाचपिबादेशात्पूर्वंनित्यत्वात्पररूपप्रवृत्तिप्रसक्तेनित्यपरत्वात्पिबादेशस्तस्यंतद्भावस्यप्रयोजनमुक्तमंतादिवत्सू
त्रेभाष्ये ॥शब्दांतरस्यप्राप्नुवन्विधिरनित्योभवति॥ ॥अत्रशब्दांतरत्वंचस्त्रुप्रवृत्तंतेनातिदेशबलात्तत्वकोपि
नक्षतिःशब्दांतरप्राप्नुवन्निति इदंशदेश्रोत इतिसत्रएवभाष्येध्वनितं नत्रहिन्यविशतेर्मादार्वदुत्तुकरणनियमेषुपदांत
रसापेक्षान्नियमादंतरंगत्वादत्तुकरणयोर्नित्यत्वात्सत्यामविकरणेविकरणांतभक्तस्यात्आगमस्यधातूपसर्गयोर्मध्यपातित्वा
न्नियमाप्राप्तिरित्याशयेनप्रवृत्तस्यात्वाबोपसंख्यानमितिवार्तिकस्याकर्तव्यत्वोपायतयाभ्यथापिविकरणात्पूर्वमटलभ्ये

न एवमपि कृतं स्यात् ननु तल्लभ्यभंगात्सर्वं विवरणायेपि तव्याइत्युक्तं तेन च परत्वाद्धि कारणात्सर्वमप्यगमेधातुभक्तत्वान
स्यधातूपसर्गयोः व्यवधायकत्वाभावादात्मनेपदनियमसिद्धिरिति वार्त्तिकमनानर्थकमित्यभिप्रायोगम्यते यदि त्वाब्दांतरात्प्रा
प्नुवतामनिमत्तं न स्यात्तर्हि नदसंगतिरेव न त्वेतु शब्दांतरस्यप्राप्तस्यागेऽडागमस्येव शब्दांतरात्प्राप्तस्यापि विवरणस्यानित्यत्वा
दुभयोरनित्ययोः परत्वं व्यवस्थापकमिति भाष्यसंगतिः शब्दांतरेप्राप्नुवन्नड्विति इदं वस्येकाज्झादघसमिति सत्रे भाष्येध्वनितं
न त्वाद्धि विभिद्धनित्यादौ विवरणाय कृतेद्वि र्वचनेयरएवद्विजित्व्यास्यापविंवतत्वमेनत् नहि वृथमनुच्यमानं गस्यतेएवमनुप
दृष्ण सामर्थ्यादित्युक्तं शब्दांतरेप्राप्तस्यानित्यत्वाभावेतु नदसंगतिरेव न त्वेतु शब्दांतरात्प्राप्नुवन्नड्जागमस्येव शब्दांतरेप्राप्नुवतो
द्विर्वचनस्याप्यनित्यतया परत्वेन व्यवस्थास्यादिति भाष्यसंगतिः असिद्धवत्सूत्रे इति भाष्ये ध्वनितमिति शेषः वैयरे नोक्तमि
ति न त्वाद्धि कुर्वद् इत्यादावुकारलोपोपचारं न स्यादसिद्धत्वात् नउत्सार्वधातुके इत्युक्तमिष्टं स्वानां रंभेकृथंसिध्यतीति श्लोकवार्त्तिकव्या
ख्यानप्रयोजनमुपादायनित्यत्वात्सर्वमुकारलोपः पश्चाद्गुणः कृतेपुकारलोपेप्रत्ययलक्षणेन भवन्गुणोलक्षणांतरेणप्राप्नुवन्निर्वि
धिरनित्यइत्यनित्यः न तस्यादिष्वर्थ चः पूर्वोकारइत्युत्तविधोनास्तिरुद्धानिवकमित्युक्तं नन्वेवं तुदती त्यादौ गुणे कृते शब्दां
तरात्प्राप्तस्यानिवस्त्वेन प्राप्त्याच्चविकरस्यस्यानित्यत्वं स्यात् अत आह यदापि त्वादि कृतावकृतप्रसंगित्वमात्रेणेति ॥
व्यक्तिभेदलक्षणभेदयोरनादरेणेत्यर्थः इदं हि भवति भ्यां चेति सत्रस्थभाष्यवलाल्लभ्यते न त्वाद्धि भूर्वैवेत्यादौ गुण

बाधितिवारणार्थमारब्धं किंतु भुवो वुगित्यत्र न भत्वा रव्यालं यथुगुरीत्यानित्यत्वमनभ्युपगतं स्यान्नहि गुणवृद्धोरुक्तयोः
शब्दांतरप्राप्तिलक्षणांतरप्राप्तिभ्यामनित्यत्वे मे वुगागमस्येति तदसंगतिः स्पष्टैव यस्य च लक्षणांतरेण निमित्तं विह
न्यते न तदनित्यं आतोनुपसर्ग इति सूत्रे भाष्ये स्फुटमेतत् । नत्रहि अतः प्रच्छ इत्यादौ संप्रसारणस्यैव तदुत्तरं प्रवर्तिष्यमा
णस्यांतरंगेण पररूपेण बाधितस्याप्याकारलोपस्योनेनैवार्थेन रुतात् न प्रसंग इत्यात्रमुपादाय नित्यत्वात् द्वयोरपि नित्य
योः परत्वादाकारलोपेनस्यामीत्यनेन सिद्धत्वात्संप्रसारणान्तरमुक्तं भावे यथाभीष्टसिद्धिः वृद्धिर्यो सर्वत्रप्रसारणिभ्योड
इति वार्त्तिकमनावश्यकमित्युक्तं यस्य च लक्षणांतरेण निमित्तं विहन्यते न तदनित्यं संदृदंशि प्रतिषेधसूत्रभाष्यबलाल्ल
भ्यते तत्रस्योतरत्यत्रोठू नेम सक्रुयोर्यण्गुणयोरंतरंगत्वात् यणि स्थिवदतोभाष्यकारस्य नित्यत्वाद्गुणात्पूर्वमूठ्
गुणस्त्वं तरंगेण यणा बाधितत्वादनित्य इति गूढाभिप्रायः इति प्रतिभातीति नत्रहि श्वः वृद्धेत्यादौ लसार्वधातुकानुदात्त
त्वस्य यथा शब्दांतरस्य प्राप्नुवन्विधिरनित्यो भवतीति अनित्यत्वं तथा उरोरसामपि स्वरभिन्नस्य प्राप्नुवन्विधिरनि
त्यो भवतीत्यनित्यत्वं न तत्र द्वयोरप्यनित्यत्वयोः परत्वाल्लसार्वधातुकानुदात्तत्वपुनः प्रसंगविज्ञानादुदात्तदेशेटिलोपे उदात्त
निवृत्तिस्वरेण सिद्धमभीष्टमंतोदात्तत्वं ननु परस्परमिति द्वंद्वीभावेनान्यत्र प्रथमप्रवृत्तिप्रयोजनवत्त्वमिति याभ्वु

तेन दृष्टानां परत्वादीनां यत्रैकस्मिन् समावेशस्तत्र तादृशाबलवत्तानियामकत्वं समुदायपरिसमाप्त्येत उत प्रत्येकमिति संदेहे
आह यत्रेत्येति अन्यतरदुभयं वेति उभयत्रापि भाष्यदर्शनादुभयथापि न तत्त्वेनेति भावः एकदेशिन इति समावेशस्थले
प्रत्येकं क्लृप्तबलवत्तानियामकत्वस्य त्यागः समुदाये चाक्लृप्तं तन्नियामकत्वमिति कल्पनायां गौरवादेकदेशित्वमेव तथानि
धभाष्यस्य न्याय्यमित्याशयः विप्रतिषेधसूत्र इति तत्र हि वार्णादाङ्गं बलीय इत्यस्य प्रयोजनप्रस्तावे प्रत्ययविधेरेकादेशा
दन्तरंगतः प्रयोजनमस्तिरिदं इति भाष्यमुपादाय कैय्यटेनोक्तं विभज्यान्वाख्यानेयधापि प्रत्ययस्यानित्यत्वं तथाप्यन्तरंगेणैवासि
द्धत्वात्तदाश्रितमिति एवं च प्रत्येकं बलवत्तानियामकत्वं स्पष्टमेवोक्तमित्याशयः णौ चङीति स्थान एवेत्यादिः नित्यत्वाद
न्तरंगत्वपुकृद्धित्वस्येति ह्रस्वस्य चङ्णिश्रित्वेनुभयनिमित्तं द्वित्वस्य तद्धटकबहिर्भूतत्वेनान्तरंगत्वमित्याशयः योगपद्यासंभव ए
वेति बाधकस्य बाध्यसमानविषयकतायामौचित्यमत्र हेतुरित्याहुः नित्यादपीति अपि हि परसमुच्चायकः नच
स्तु नित्यान्तरंगयोर्यत्र योगपद्येन प्रसंगस्तत्र यौगिकबलवत्त्वोपहितनित्यादन्तरंगस्य ज्ञापकसिद्धबलवत्त्वोपहितस्य ब
लीयस्त्वं न्यायापेक्षमालिंगस्य प्रबलत्वात् यत्र तु परान्तरंगयोः प्रसंगस्तत्र वाचनिकबलवत्त्वाक्रान्तपरापेक्षया लिंगज
न्यबलवत्त्वाक्रान्तस्य कथमन्तरंगस्य प्राबल्यं श्रुत्यपेक्षया लिंगस्य दौर्बल्यौचित्यात् एतेन परादन्तरंगस्य बलवत्वे

विप्रतिषेधशास्त्रमेव हेतुः ज्ञापकदेशमादाय बहिरंगपरिभाषा हि परत्वयुक्तमेव तुल्यबलत्वाभावादिति चेन्नैवं अं
तरंगबलवत्त्वाज्ञापकत्वेन ओमाङोश्चेत्यादौ ग्रहणेनैवोक्तार्थसिद्धेः अन्यथा शिव आ इहेत्यादौ परत्वात्सवर्णदीर्घे पश्चादा
द्गुणे शिवेहीत्यादिसिद्धौ ज्ञापनेपि चारितार्थ्याद्योगात् ज्ञापकत्वमेव भज्येतेत्याहुः॥ ॥असिद्धं बहिरंगमंत
रंगे॥ ॥अत्र पांतः अंतर्बहिःशब्दौ व्याप्यव्यापकपरावंगशब्दश्च निमित्तवाची निमित्तगतश्च व्याप्यव्यापकभा
वः संख्याकृतो विवक्षितः ततश्च बहुसंख्याकनिमित्तापेक्षमल्पसंख्याकनिमित्तापेक्षे कर्तव्ये जातं समकालमात्तं
असिद्धमानवदिति परिभाषार्थः अंगशब्देन च तत्कार्योपकारकत्वेन शास्त्रे गृहीतं सर्वं परामृश्यते ननु शब्दस्वरू
पमेव ग्रहोपगानाभावात् एवं चात्र संज्ञाविशेषस्य अर्थस्य च निमित्तत्वेन ग्रहणं निर्बाधं अत एव येनविधिरिति सू
त्रे भाष्यं स्योयणचीत्यादावपि तदंतविधौ स्योन इत्यत्रांतरंगत्वाद्यणो गुणबाधकत्वमिष्यते तन्न सिध्येत् उत्तशब्दमाश्रि
त्य यणादेशो नशब्दमाश्रित्य गुण इत्युक्तं न स्याद्धि सीव्यतेर्बाहुलकात् औणादिके नप्रत्यये गुणवलोपोठां प्रसंगे उठ्यप
वादत्वाद्वलोपं बाधते गुणं त्वंतरंगत्वात् गुणो ह्यंगसंबंधिनिमित्तलक्षणां लघ्वीमुपधामाश्रित्य धातुकं चाश्रयति ऊठ्त्व
वरांतरंगमनुनासिकादिं च प्रत्ययमित्यो ऽपेक्षत्वादंतरंगत्वात्प्रकृते यणगुणौ प्राप्नुतः तदिति केप्यं ऽपोपवर्णि

तोऽभिप्रायः ततश्च संज्ञानिमित्तकत्वेन गुणस्य बहिरंगत्वं स्पष्टमेवाभ्युपगतं बह्वपेक्षं बहिरंगमल्पापेक्षमंतरंगमिति
त्राप्ययमेवाकरः प्रमाणं तथा वर्णो वर्णेनेति सूत्रे भाष्यं समानाधिकरणसमासात् बहुव्रीहिर्विप्रतिषेधेन समाना
धिकरणसमासस्यावकाशो वीरः पुरुषो वीरपुरुष इति बहुव्रीहेस्तु कंठेकाल इति इहोभयं प्राप्नोति वीरपुरुषो ग्रा
म इति बहुव्रीहिर्भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः अंतरंगः कर्मधारयः कृंतरंगता स्वपदार्थे कर्मधार
यः अन्यपदार्थे बहुव्रीहिरिति इदं च बहुव्रीहेरर्थनिमित्तकत्वेन बहिरंगत्वं स्पष्टमेवोक्तं निमित्तकृतानामपि धर्मा
णां निमित्तत्वाद्विशेषात् सामान्यापेक्षात् विशेषापेक्षं बहिरंगमित्यपि सिद्धं विशेषो हि षे निमित्तत्वेनोपादीय
माने न विदग्नाभूतस्य सामान्यस्य निमित्तत्वेन ग्रहणं न्यायप्राप्तमिति विशेषापेक्षमुभयनिमित्तं भवति सोय
मंतरंगबहिरंगभावो लक्षणेनैवं सिद्धो न लक्ष्यपर्यालोचनमपेक्षते यश्च पष्ठ्यामृध्यो मादौ पूर्वं पूर्वमंतरं
गं परं परं बहिरंगमिति सचः परस्मिन्सूत्रे भाष्यकारोपदर्शितोऽस्तोकदृष्टांतसिद्धोऽन्तरंगभावः स इह लक्ष्यलद
र्शनापेक्षः प्रक्रियाक्रमाधीनकार्यगतपूर्वापरस्थितिज्ञानस्य तत्पर्यालोचनामंतरेण दुर्लभत्वात् पूर्वं धातुरु
पसर्गेण युज्यते इति पनेन सिद्धं धातूपसर्गयोः कार्यमंतरंगमित्यप्येतन्मूलकमेव अत एव संचस्कारेत्यादौ षं

नरंगत्वात्सुडिपश्चाद्धिर्वचनेनाप्रभी१ सिद्धाप्यर्थं सुद्धास्त्वर्वइतिप्राप्त्यास्थानं पाष्ठे भाष्ये अथास्मिन्वह्वपेक्षं बहि
रंगमल्पापेक्षमंतरंगमिति निष्कर्षे ज्ञापकभूमिर्विरोधः तथाहि ज्ञानबहिरंगस्य असिद्धत्वविषये वाहऊठ्सूत्र
त्रस्थमूठग्रहणं ज्ञापकं तद्धि वाह्ऊठ्धर्थमन्यथा संप्रसारणमात्रविधानेपि ण्विनिमित्तकलघूपधगुणेन औत्वर्थं ग
दिति ज्ञापकता संभवः यदि त्वबह्वपेक्षत्वं बहिरंगत्वं संज्ञायाश्च निमित्तत्वं तर्हि लघूपधासंज्ञासापेक्षादार्धधातुक
संज्ञासापेक्षाच्च गुणादंगभसंज्ञामात्रसापेक्षस्य संप्रसारणस्य बहिरंगत्वानौचित्यात् चरितार्थयोगेन ज्ञापकता
भंगः बह्वपेक्षया संप्रसारणस्य गुणस्य वानबहिरंगासिद्धत्वेन चरितार्थसंभवः बध्यावंतरंगेनाज्ञानंतर्यर
ज्ञिनिषेधेन प्रवृत्तपरिभाषाप्रवृत्तिदौर्लभ्यादिति चेत्स्यां वाहनं वाह नीतिबाहवादूतस्य वाहनो हरत्यादो माथि
मित्वस्यवहः संप्रसारणव्याव्रजयेष्वक्तूरुति सूत्रस्थभाष्योदाराप्रदर्शितदिग्जणभसंज्ञाक्षिप्तयजादिसर्वनामस्था
नस्वादिप्रत्ययसंबंधस्यावश्यकत्वेन गुणापेक्षया संप्रसारणस्य बह्वपेक्षत्वं सूपपादमिति दोषः अनंतर्यविषुरप
रिभाषानुनेह प्रवर्तने ध्वंसवर्णनद्वर्णयोरित राश्रयबाधानरवृत्तमत्वरन्नोरितिदिक् अत्रेदं बोध्यं ज्ञातबहिरंगासि
द्धत्वमंतरस्यांगप्रवर्तकं यथा पचावेदमित्यत्र गुणस्यासिद्धत्वेन निमित्ताभावादेत एत्वस्याप्रवृत्तिः समन्वालभ्या

सबहिरंगासिद्धत्वं तु बहिरंगस्यैव यथा वाहुड्वदित्यत्र चऊर्निमित्तवृद्धेर्बहिरंगत्वेनासिद्धत्वात् लघूपधगुणस्याप्र
वृत्तिरित्याहुः अंतरंगशास्त्रमेवास्याः विषयः परिभाषायाः लिंगं अथापि कार्यकालपक्षे त्रिपाद्यां प्रवर्तनतः एवं न
सक्षे संज्ञापरिभाषाणां वेधिदेशीयत्वाभ्युपगमेन प्रकृतपरिभाषादृष्ट्या अंतरंगे त्रैपादिकासिद्धत्वस्य दुर्वचत्वात् न
नु परिभाषादृष्ट्या त्रैपादिकांतरंगस्यासिद्धत्वाभावेपि सपादिकबहिरंगशास्त्रदृष्ट्या तदसिद्धत्वस्य दुर्वारत्वेन युगप
दुभयोरपि स्थानयोः समावेशासंभवादंतरंगबहिरंगभाव एव दुर्लभः अंतरंगे हि बुद्धिस्थे तन्निरूपितं बहिरंगत्वेनाभि
मतस्य बहिरंगत्वं लभ्यते न तथा बहिरंगनिरूपितमंतरंगत्वमप्यंतरंगत्वेनाभिमतस्य बहिरंगे बुद्धिस्थे न तस्य परस्प
रनिरूप्यनिरूपकभावापन्नबहिरंगत्वांतरंगत्वरूपद्वंद्वधर्मद्वयप्रयोजकयोर्द्वयोरपि शास्त्रयोर्यत्र योगपद्येनोपस्थितिः
न तत्रैवांतरंगबहिरंगभावः यत्र त्वन्यतरस्यासिद्धत्वं न तत्रंगाद्वयाधर्मद्वयप्रयोजकयोर्द्वयोः शास्त्रयोरसिद्धासिद्धभा
भावेन युगपदुपस्थितिविषयता लक्षणस्यैकबुद्ध्युपारोहस्यासंभवात् एवं च अथमंतरंगबहिरंगभावः तदुक्तं विसर्जनीय
सूत्रे भाष्ये नाकुटादौ विसर्गाभावाय विसर्जनीयोऽनरपदेनाव्यावबहिरंगलक्षणत्वात् ण१ इति वार्तिकमुपक्रम्य नैष युक्तः
परिहारः अंतरंगबहिरंगयोर्मिथः प्रतिद्वंद्विभावेनावस्थितयोः असत्यंतरंगे बहिरंगं न सति च बहिरंगे अंतरंगं न चात्रांतरंग

वहिरंगयोर्युगपत्समवधाननास्तिविनाकारणं असिद्धत्वादिति न तन्श्चत्वथंत्रिपाद्यामंतरंगपरिभाषयाव्यवस्था
स्यादितिचेन्नैवं पूर्वत्रासिद्धमितिसूत्रे इति वक्तव्ये इत्यध्याहारेण पूर्वशास्त्रीयत्वेनव्यवस्थायां जातं समकालप्राप्तं वा
परमसिद्धमित्यर्थो ननु पूर्वशास्त्रप्रवृत्तिविषये परमसिद्धमिति अन्यथा गोमान्धीमानित्यादौ नलोप
प्रवृत्तिविषयतामादाय पूर्वसंयोगांतलोपस्याप्रवृत्त्यापत्तेः नाकुंठादौ चत्वधुत्वरमसिद्धत्वादेव विसर्गप्र
वृत्तौ वार्त्तिकारंभवैफल्याच्च तस्माज्जातबहिरंगविषये त्रैपादिकासिद्धस्यांतरंगबहिरंगभावप्रतिबंधकत्वा
योगेन परिभाषाप्रवृत्तेरव्याहतत्वात् प्रागुक्तभाष्यं समकालप्राप्त्यांतरंगबहिरंगभावविषयकं तत्संगात्जात
बहिरंगभावविषये प्रवर्तितं वेनाप्येतद्देशिनाभ्युत एव जातबहिरंगविषये त्रैपादिकांतरस्यासिद्धत्वा
भावतात्पर्यकं नानभिनिर्वृत्ते बहिरंगेऽन्तरंगं प्राप्नोति नत्रानिमित्तमेव बहिरंगमंतरंगस्येति तद्धुत्तरभा
ष्यं स्वरसतः उपपद्यते अनभिनिर्वृत्तत्वं हि सपादिकं बहिरंगं पूर्वत्रासिद्धमित्यस्याविषयः न त्वत्र तथा
येन त्रैपादिकासिद्धत्वादंतरंगबहिरंगयोर्युगपदुपस्थित्यभावप्रापयेतितद्राज्ञायः न च निमित्तं बहिरंग
मंतरंगस्य विनाकारणं असिद्धत्वादिति जातबहिरंगमुदाहार्यप्रवृत्तस्य तद्धुत्तरभाष्यस्य असंगतिरिति वाच्यं

नस्य यथोद्देशाभिप्राय एवं एकदेशपक्षे तेनादोषात् यथोद्देशपरिभाषां मात्यंतरंगस्यासिद्धतया नान्निरूपेण बहिरंगत्वस्य बहिरंगे
दुर्ज्ञेयत्वे नांतरंगबहिरंगभावप्रयुक्तायाः प्रकृतपरिभाषाया अभावः इत्यायदंतरंगत्वेनाभिमतं तन्निरूपेण बहिरंगत्वाभिप्राय
स्य बहिरंगासिद्धत्वं प्रतिनिमित्तत्वं नेति तदर्थः अत एव कथमिति प्रश्ने यावता पूर्वत्रासिद्धमित्यसिद्धपरिभाषायाः सुचरितंभा
वे असिद्धे यस्यांतरंगस्यासिद्धत्वादप्रवृत्तेः परिहारार्थः ननु सिद्धांतिना कार्यकालपक्षमाश्रित्य प्रकृतपरिभाषायास्त्रिपा
धां प्रवृत्तौ साधितायां पूर्वत्रासिद्धमित्यत्र वार्तिके इत्याहगरमन्याने नैकदेशिनोक्तो न धूखस्वेन तद्द्वयोः परिभाषयोः
साकूतं वाक्याश्रयाः समवस्थितयोः पूर्वत्रासिद्धमित्यसिद्धं बहिरंगमंतरंग इति च पूर्वत्रासिद्धमित्येतावुपमर्द्य असिद्धं ब
हिरंगमंतरंग इत्येतया व्यवस्था भविष्यति न पुनरसिद्धं बहिरंगमंतरंग इत्येतावुपमर्द्य पूर्वत्रासिद्धमित्यनया व्यवस्था स्या
त् अतः एकदेश्युक्तं चक्रकदोषात् तद्द्वयोरप्रवृत्तौ नाकटादौ रेफस्यासिद्धत्वं स्यात् दुर्निरूपमिति कार्यकालपक्षाश्रयणात्
तद्विरुद्धं भवतीति तदाशयः ननु सिद्धांतिनाभिमतो युक्तः परिहारो न वा बहिरंगलक्षणत्वादिरूपसंग्रहं वार्तिकव्यवस्थाहा
रात् कृते पूर्वत्रासिद्धमित्यस्यापत्तेः निष्प्रतिपक्षया बहिरंगपरिभाषया व्यवस्था भविष्यति मा भूद् वार्तिकव्यवस्थाहा
रः चक्रकेऽपि दुष्टो व्यवस्थेति बहिरंगपरिभाषामाश्रित्य व्यवस्था भविष्यतीनस्मादुक्त एवायं परिहारो न वा बहिरंग

लक्षणत्वादिति तदर्थः इत्थं च कार्यकालपक्षे त्रैपादिकं तं अन्तरंगमाश्रित्य बहिरंगपरिभाषाप्रवृत्तौ न कश्चिद्विरोधः अत एव
एकोऽङ्ग इति सूत्रे भाष्ये वर्णैकदेशा वर्णग्रहणेन न गृह्यन्त इति पक्षे मातॄणामित्यादौ णत्वार्थं णत्वविधौ ऋवर्णग्रहणं
कर्तव्यमिति गौरवमुद्भाव्य यद्यप्येतन्न गृह्यन्ते तथाप्येष न दोषः आचार्यप्रवृत्तिर्ज्ञापयति भवति ऋवर्णाच्चोणत्वमिति
न यदयं क्षुभ्नादिषु नृनमनशब्दं पठतीत्येतेनैतदृशो ज्ञापकं वध्यर्थमेतत्स्यात् नान्तर्मनिरिति यत्नहि तृन्मोनित्रशब्दं पठति
यच्चापि नृनमनशब्दं पठति न तु चोक्तं वध्यर्थमेतत्स्यात् बहिरंगासिद्धिः अंतरंगेण त्वं असिद्धं बहिरंगमन्तरंगे तु इत्युक्तं तथा रदा
भ्यामिति सूत्रे भाष्ये कृतस्यापत्यं कार्तिः हितस्यापत्यं हैतिरित्यादौ निष्ठानत्वाभावाय यत्नः अंतरंगनिमित्ताश्रितेपि वर्णे
कृतुपक्रम्य सा तर्हि प्रतिषेधो वक्तव्यः नहि बहिरंगलक्षणत्वात् न वा वक्तव्यं बहिरंगलक्षणत्वात् बहिरंगासिद्धिः अंतरंगेण
त्वं असिद्धं बहिरंगमन्तरंग इति प्रत्याख्यातं अत एव नृ रम् तोरपत्यं नार्मतइत्यादौ मदुघाधाशइति वत्वाभावो न वक्तव्यस्या
पत्यं नारक्रास्त्रिरित्यादौ विसर्गाभावश्च सिद्ध इति सर्वमिदं संगृहीतमिति प्राहुः उपाध्यायास्तु वक्ष्यमाणदोषे प्रागुक्तदोषैश्च
तत्रासांगत्वं मन्यमानः प्रकारान्तरेण व्याचष्टे अंतर्मध्ये इति मध्यत्वस्य सनिरूपकत्वादाह बहिरंगशास्त्रीयेत्यादि नि

भिन्नसमुदायश्च लक्ष्यगतो विवक्षितः तत्रैव घटितघटकत्वभावोपपत्तेः एवमुत्तरत्रापि तत्रस्थलक्ष्यगत एवायं बहिरंगा
न्तरंगभावः सर्वत्र वार्यायामिति निष्कर्षः अत्र बहिरंगशब्देन बहिरंगत्वेनाभिमतं विवक्षितं एवं तदीयनिमित्तसमुदाये
त्यत्र तत्पदेनाप्यंतरंगत्वेनाभिमतमतो नान्योन्याश्रयः बहिरंगमिति एवं च यदीयनिमित्तसमुदायघटितनिमित्तकं य
त्तदपेक्षया तद्बहिरंगं तथा यदीयनिमित्तसमुदायघटकनिमित्तकं यत्तदपेक्षया तदंतरंगमिति परमार्थः शब्दस्वरू
पं निमित्तमिति अतो द्वित्वस्यापि निमित्तत्वेन ग्रहणमंगशब्दस्योपकारकमात्रपरत्वात् नहि द्वित्वीर्ययोस्तिन्यायस्तु नात्र प्र
वर्तते ऊठ्ग्रहणेनैतत्परिभाषाज्ञापनपरभाष्यप्रामाण्यात् अन्यथा निर्विवादः परस्परभंनंतर्भूतत्वेन तदसंगतिरेव
ज्ञापकत्वभूमिविरोधात् षष्ठ्यंतोपात्तस्यापि निमित्तत्वेन ग्रहणे तु लघूपधगुणोद्देश्यघटितसमुदायोद्देश्यकत्वस्य संप्रसारण
स्य बहिरंगत्वं संप्रसारणोद्देश्यघटकसमुदायोद्देश्यकत्वस्य लघूपधगुणस्यांतरंगत्वमिति परिभाषाप्रवृत्तिसौलभ्याज्ज्ञा
पकत्वभूमिविरोधः नापि सूत्रस्थस्वरूपनीत्या भसिद्धिः अन्यथा परनिमित्तकत्वेनांतरंगत्वादूठः पूर्वं द्वित्वप्रसंगः सिद्धां
ते तु द्वयोरप्यंतरंगत्वेन परत्वाद्व्यवस्था सुवचेत्याहुः अर्थनिमित्तकस्येति उपकारकत्वाविशेषात् आत्मनिमित्तत्व समर्थस्ये
ह नाश्रीयते इति भावः उक्तमर्थं प्रमाणयति अत एवेत्यादि नतिसृ इति अंतरंगत्वात्त्रयादेशेन तत एव दीर्घप्रसक्तौ निसृ
देशे तस्यासिद्धत्वादीरेत्रो दीर्घप्राप्तिस्तन्निवृत्तये तल्लक्ष्येलक्षणस्येति न्यायेन तद्बाधितत्वात्त्रिरिति वैय्यर्थ्यमिस्या

शयः प्रतिपदविधित्वमलक्यं निरुक्तादेशस्यांतरंगत्वं तु नदीर्घस्यापि निमित्तांशे प्रतिपदोक्तत्वेन नन्मलक्यं तु अंतरंगत्वस्य सुन
चत्वात् न च तत्र लक्ष्ये इत्यन्यायेन तु ढंबाधितात्रयादेशे पश्चाच्चुयेः प्राप्त्या व्यर्थत्वापत्तिनिषेधः इति वाच्यं तस्यानित्यत्वेना
परस्य सार्थक्यसंभवात् त्रयादेशस्वं तस्येति त्रयोदेशो वृत्तवत् स्थानिवद्भावेन तस्यांत स्यत्रिशब्दत्वं नेति तदर्थः तच्चर्थ
स्यनिमित्तत्वानभ्युपगमे वर्णाद्वर्णे नेति सूत्रस्थभाष्यविरोधः तत्र हि कर्मधारयापेक्षया बहुव्रीहेरन्यपदार्थापे
क्षत्वेन बहिरंगत्वमुक्तमिति चेन्न कंठेकाल इत्यादौ सप्तमीविशेषणे बहुव्रीहाविति ज्ञापकादेव बहुव्रीहिसिद्धिमास्था
य पचंभिभुक्तमस्येत्यर्थे बहुव्रीहिवारणाय समानाधिकरणानामेव बहुव्रीहिरित्यर्थस्यावश्यमभ्युपगंतव्यतया निरव
काशत्वादेव वीरपुरुषकस्मादावन्यपदार्थविवक्षायां बहुव्रीहिणा कर्मधारयनिवृत्तौ समानाधिकरणसमासात् बहुव्री
हिर्विप्रतिषेधेनेति वार्तिककृरंगः तत्त्वं तु नोपपद्यते न या बहुव्रीहिकर्मधारययोः अंतरंगबहिरंगभावोपवर्णनमितरयोरद
योरप्येकदेशपुंस्त्वनादोषात् यत्तु दिक्संख्ये संज्ञायामिति नियमेन संख्याया एव दिक्संख्ययोः कर्मधारयत्वेन संज्ञा
यां बहुव्रीहेश्चागिनार्थ्यं तथा पात्रोदकरत्यादेः समासगतस्योदकत्वे प्रसिद्धकर्मरूपार्थस्याप्रसिद्धे आरोपेण समास
स्य वक्तव्यतया तत्र यानशब्दस्य प्राप्तिमात्रबोधकत्वेन सामानाधिकरण्याभावात् कर्मधारयाप्रवृत्तेश्च तस्य चरिता
र्थ्यं

[OrderDescription]
,CREATED=21.09.19 16:53
,TRANSFERRED=2019/09/21 at 17:14:37
,PAGES=189
,TYPE=STD
,NAME=S0001892
,Book Name=M-2161-PATANJALI YOGSHASTRA MAHABHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF

FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF

FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF

FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF

FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF

FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,